ज्ञातव्य—माधव ने यह प्रकरण, रसेन्द्रचिन्तामणि (अ० ३।२) से उद्धृत किया है।

यद्यपि अभ्रक सत्व ग्रास के जारण किये बिना बन्धन नहीं होता है, ऐसा भी गोविन्दपाद का एक सिद्धान्त है, यथा-

मुक्त्वैकमभ्रसत्वं नान्यो रसपक्षकर्त्तन समर्थः।
तेननिरुद्धप्रसरो नियम्यते बध्यते च सुखम्॥

(रस हृदये, आयुर्वेदप्रकाश अ० १)

परन्तु अभ्रक सत्व ग्रास का जारण किये बिना भी दिव्यौषधियों के स्वरस से मर्दन करने से भी पारद बंध जाता जाता है और इसी को मूर्ति बद्ध पारद कहा जाता है। यथा—

यो दिव्यमूलिकाभिश्च कृतोऽत्यग्निसहोरसः।
विनाऽभ्रजारणात् सस्यान्मूर्ति बद्धो महारसः॥

(आयुर्वेदप्रकाश अ० १ श्लोक)

यह मूर्तिबद्ध पारद भारी, सूर्य के समान तेजस्वी तथा अग्नि स्थायी होता है। यथा—

गुरुत्वं मरणत्वं च तेजसा सूर्यसन्निभम्।
शिखिमध्ये धृतंतिष्ठेन्मूर्ति बन्धनलक्षणम्॥
शलाका जारणा द्वापि मूर्तिबन्धत्वमिष्यते।

(रसार्णवे, रसकामधेनौ ३१९-३२० पृष्ठ)

पारद का बन्धन करने वाली दिव्य औषधियाँ—

सोमवल्ली आदि चौंसठ दिव्यौषधियों के खरल से पारद को घोटने से पारद का बन्धन होता है। इन दिव्यौषधियों का

वर्णन रसप्रकाश सुधाकर, सोमदेव रचित रसेन्द्रचूड़ामणि, मन्थान भैरव, रससार तथा रसार्णव आदि रसशास्त्रों में मिलता है। यथा—

(१) रसप्रकाशसुधाकरे—

अथ दिव्यौषधीनां तु नाम संकथ्यते मया।
चतुः षष्टि मिता सम्यग्रसबन्ध कराः पराः॥
सोमवल्ली तथा सोमवृक्षः सोमकलालता।
चतुः षष्टि रिति प्रोक्ता दिव्यौषध्यो महाबलाः॥
एकैकस्या रसेनापि सूतो बन्धत्व माप्नुयात्।
तास्तु लक्षण संयुक्ताः सोमदेवेन भाषिता॥

(रसप्रकाश सुधाकरे अ० ६)

(२) रसेन्द्रचूड़ामणौ—

मन्थान भैरव महागम सम्प्रदिष्टा।
दिव्यौषधीर्वदति सम्प्रति सोमदेवः॥
वार्धक्य रोग हरणाय रसायनाख्या।
सूतेन्द्र बन्धवधजारण कर्मनिष्ठा॥
चतुः षष्टिरिति प्रोक्ता दिव्यौषध्यो महागुणाः॥

(रसेन्द्रचूड़ामणौ अ० ३)

(३) रससारे—

(२०वें पटल में देखिये)

(४) रसार्णवे—

रक्तस्नुही सोमलता रुदन्ती रक्त चित्रकः।

(रसार्णवे, रसकामधेनौ, ३३ पृष्ठे च)

(सुगमरसशोधनोपाय निर्देशः)

अथ यदि स्वेदनादि संस्कारान् कर्त्तुमसमर्थः तं प्रति सुगम रस शोधनोपाया अप्युक्ताः सन्ति। ते यथा तत्र पारदग्रहणे तत्परीक्षामाहुः।

प्र०-सुगम रसशोधनोपायं निर्दिशन्नाह—अथेति-अथ यदि चेत् रसवैद्यः स्वेदनादि संस्कारान् कर्तुमसमर्थः=अशक्तः स्तर्हि तं रसवैद्यम्प्रति सुगम रसशोधनोपायाः=सरलाः=पारद शोधन-प्रकारा अप्युक्ताः सन्ति, ते पारदशोधनोपाया यथा-अग्रे निर्दिश्यमाना=सन्तिः।

ज्ञातव्यम्— यथा चोक्तमग्रे १५४ संख्यके श्लोके स्वय मेव माधवेन-एता वतस्तु संस्कारान् सूतस्य कर्त्तुमक्षमैः तन्मुख्यान् कियतः कृत्वा ग्राह्योरोगापनुत्तये प्रोक्त पारदशोधन कर्मणि पारदग्रहणे तत्परीक्षां पारदपरीक्षा माहुः शास्त्रकारा। इति शेष।

पारद के शोधन के सरल उपायों का निर्देश।

उ०—यदि रसवैद्य, पारद के स्वेदन आदि संस्कार करने में असमर्थ हो, तो उसके लिये पारद शोधन के सरल उपाय भी शास्त्रों में कहे हैं जो कि आगे बताये जांयगे।

ज्ञातव्य—माधव ने स्वयं आगे आयुर्वेदप्रकाश के इसी प्रथम अध्याय के १५४ वें श्लोक में इस का फिर वर्णन किया है। यथा—

एतावतस्तु संस्कारान् सूतस्यकर्त्तुमक्षमैः।
तन्मुख्यान् कियतःकृत्वा ग्राह्यो रोगापनुत्तये॥१५४॥

शास्त्रकारों ने पारद शोधन के लिये, लेने योग्य पारद की परीक्षा भी आगे लिखे प्रकार से बताई है ।

(पारद परीक्षा)

यथा—

अन्तः सुनीलो बहिरुज्ज्वलोयोमध्याह्नसूर्य प्रतिमःप्रकाशः ।
+योज्योऽथधूम्रः परिपाण्डुरश्चचित्रो नयोज्योरसकर्म सिद्ध्यौ*
॥१४४॥ इति ।

प्र०—पारदस्य परीक्षा माह-यः=पारदः, अन्तः, सुनीलः सुनीलवर्णः, बहिः, रुज्जलः=स्वच्छः, मध्याह्नकालिको देदीप्यमानो यः सूर्यस्तत्प्रतिमः तत्तुल्यः प्रकाशोयस्य सताद‍ृशोऽस्ति स पारदो रसकर्म सिद्ध्यै=पारदस्य संस्कारादि सिद्ध्यर्थं योज्योऽथ धूम्रः=धूम्रवर्ण सदृशः परिपाण्डुरश्चित्रश्च न योज्यो हानिप्रद त्वादिति अत्र ।

ज्ञातव्यम्—श्लोकोऽयं रसरत्न प्रदीपिकात उद्धृतो माधवेन, रसमञ्जर्यां रसेन्द्रसार संग्रहे चाऽप्यस्ति । रसतरङ्गिण्यां (तरंग ५, श्लोक० ५) वर्णितं विशुद्धाविशुद्ध सूतस्य स्वरुपमस्यैवानुवाद मत्र मस्ति ।

पारद की परीक्षा

उ०—जिस पारद में भीतर से सुन्दर नीलापन और

+ शस्तः * सिद्धौ—इति च पाठान्तरं रसमञ्जर्यां, रसेन्द्रसारसंग्रहे, रसकामधेनौचोद्धृते पाठे ।

बाहर से उज्ज्वल (स्वच्छ) झलकता हो, तथा जो दोपहर के सूर्य के समान प्रकाश वाला हो, ऐसा पारद, संस्कार आदि के काम में लेना चाहिये और जो धुयें के रंग के समान, कुछ पीला तथा चित्र विचित्र रंग का हो. उसको संस्कार तथा चिकित्सा आदि के काम में नहीं लाना चाहिये, क्योंकि वह अच्छा नहीं होता ॥ १४४ ॥

ज्ञातव्य—माधव ने यह श्लोक रसरत्नप्रदीपिका से उद्धृत किया है, रसमंजरी, रसेन्द्रसारसंग्रह तथा रसकामधेनु में भी यह श्लोक मिलता है। रसतरङ्गिणी में (तरंग ५ श्लोक ५) वर्णित 'विशुद्ध तथा अविशुद्ध पारद का स्वरूप' इसी श्लोक का अनुवाद मात्र है।

रसरत्नप्रदीपिका में पारद के विशेष शोधन आदि कर्म के प्रारम्भ में, फिर भी इसी प्रकार ग्राह्य पारद के स्वरूप का वर्णन किया है। जैसे—

अन्तः सुनीलो बहिरुज्ज्वलम् रसंनिवेशयेन्खल्व तलेशुभे दिने॥

(कतिपय सुगम रसशोधनोपायाः)

शोधन यथा—

(स्वेदन विधिः)

राजीरसोन मूषायां रसं क्षिप्त्वाविबन्धयेत्।
वस्त्रेण दोलिकायन्त्रे स्वेदयेत्काञ्जिकैस्त्र्यहम् ॥१४५॥

दिनैकं १मर्दयेत्पश्चात्कुमारीसम्भवैर्द्रवैः ।
तथा चित्रकजैः क्वाथैर्मर्दयेदेकवासरम् ॥१४६॥
काकमाची रसैस्तद्वद्दिनमेकं २तु मर्दयेत् ।
त्रिफलायास्तथा क्वाथै रसो मर्द्यः प्रयत्नतः ॥१४७॥
ततस्तेभ्यः पृथक्कुर्यात् सूतं प्रक्षाल्य काञ्जिकैः ।

प्र०—पारदस्य शोधने स्वेदन विधिमाह—राजीति-राजी =राजिका, रसोनो=लशुनः, तयोः कल्केननिर्मितायां मूषायां रसं=पारदं क्षिप्त्वा, उपरिकदली पत्रै र्वेष्टयित्वा, तदुपरिचतुर्गुणे नवस्त्रेण पोट्टलीरुपेण विबन्धयेत् । तदनुतांपोट्टलीं दोलिकायन्त्रे काञ्जिकैः=अहं=दिवसत्रयम्, अहोरात्रत्रयमित्यर्थः स्वेदयेत् । पश्चात्= तदनन्तरं कुमारी संम्भवैर्द्रवैः=घृतकुमारिक स्वरसेन, तदनु चित्रकजैः क्वाथः=चित्रक जटा क्वाथैः, तदनुकाकमाची रसैः पृथक् पृथक् दिनैकं पारदं मर्दयेत् तदनन्तरं त्रिफलायाः क्वाथैः प्रयत्नतः=यत्नपूर्वकं रसः=पारदोः मर्द्यः मर्दनीयः, ततः= मर्दनान्तर मातपे शुष्कं सूतं=पारदं काञ्जिकैः काञ्जिकेन तदभावे शुक्तेन तक्रेणोष्णोदकेन वा प्रक्षाल्य तेभ्यः पृथक् कुर्यात् । अत्रानुष्टुप् छन्दः ॥ १४५-१४७ ॥

ज्ञातव्यम्-अयं स्वेदनविधिः शार्ङ्गधर संहितायाम् मध्यम खण्डस्य द्वादशाध्यायात् (श्लो० ४-७) उद्धृता माधवेन ।

---

१ सूतं, २ च, इति पाठान्तरं शार्ङ्गधरसंहितायाम् ।

पारद शोधन के सरल उपाय।

(स्वेदनविधि)

३०—राई और लहसुन को पीस कर कल्क बना कर, उस कल्क की मूषा बना, उस मूसा में पारद रख केले के पत्रों से लपेट कर, ऊपर से चौगुने कपड़े की पोटली में बन्द कर दोला यन्त्र में कांजी से तीन दिन रात स्वेदन करे, फिर घृत-कुमारी (ग्वारपाठा) के स्वरस, चित्रक की जड़ के क्वाथ (काढे), गिलोय के स्वरस और त्रिफला के क्वाथ से अलग अलग एक एक दिन तक पारद का दृढ पूर्वक इस प्रकार सावधानी से मर्दन करे कि बिलकुल इधर उधर न बिखरे, फिर उसको धूप में सुखावें और उसके पश्चात् कांजी, सिरका, मठा (छाछ, तक्र) अथवा गर्म पानी से पारद को धोकर उनसे अलग करे ॥ १४५-१४७ ॥

ज्ञातव्य—माधव ने यह स्वेदन विधि, शार्ङ्गधरसंहिता के मध्यम खण्ड के बारहवें अध्याय (श्लोक ४-७) से उद्धृत की है।

स्वेदन आदि प्रत्येक संस्कार करने के पश्चात् पारद को घृतकुमारी आदि के रस में एक एक दिन घोट कर धूप में सुखाकर कांजी, सिरका, छाछ अथवा गर्म जल से धोना चाहिये, ऐसा अन्य रसग्रन्थों में भी लिखा है। जैसे—

भवेदेकैकसंस्कारे प्रान्तेषु दृढमर्दनम्।
मर्दितं स्थापयेद्धर्मे यावच्छुष्कतरो भवेत्॥
तक्रेण काञ्जिकेनाथ शुक्तेनोष्णोदकेनवा।

ततः सर्वं समानीय चालयेदिति बुद्धिमान् ॥
तथा यन्त्रं प्रकुर्वीत यथा न चीयते रसः ॥

(मर्दन संस्कारम्)

ततः चिप्त्वा रसं खल्वे रसादर्धंच सैन्धवम् ॥१४८॥
मर्दयेन्निम्बुकद्रावै दिनमेकमनारतम् ।

(मूर्च्छनोत्थापन संस्कार)

ततो राजी रसोनश्च मुख्यश्चनवसागरः* ॥१४९॥
एतै रससमैस्तद्वत्खल्वतो मर्द्यस्तुषाम्बुना ।

प्र०—मर्दनसंस्कार विधिमाह—तत इति—ततः=स्वेदन पूर्वक मर्दनानन्तर रसं=पारदं खल्वेचिप्त्वा रसात्=पारदादर्धं सैन्धवलवणञ्च दत्वा निम्बुकद्रावैः=निम्बुस्वरसैः, दिनमेकमनारतं यथास्यात्तथा तप्तखल्वे ऽथवा तीव्रातपे मर्दयेत् ॥१४८॥ यथोक्तमन्यत्रापि ।

युक्तं सूतस्य सर्वस्य तप्तखल्वे विमर्दनम् ।
अथवा तीव्रधर्मे च कारयेच्च प्रमर्दनम् ॥

(अत्रानुष्टप् छन्दः)

ज्ञातव्यम्—विधिरेषः शार्ङ्गधरसंहितायाः मध्यम खण्डात् (अ० १२ । ८) उद्धृतो माधवेन ।

मूर्च्छनोत्थापनसंस्कारयो विधिमाह—तत इति—ततः= मर्दनसंस्कारादनन्तरम्, राजीप्रभृतिभिः=राजिकारसोन चुलि-

* 'नवसादर' इति पाठान्तरं शार्ङ्गधर संहितायाम् ।

कालवशौ एतै रससमैः = पारदतुल्यैस्तद्वत् = मर्दनोक्तप्रकारेण, तुषाम्बुना = काञ्जिके = मर्द्यः, मर्दनीयः, तदनन्तरं पारदस्योत्थापनार्थं पूर्ववत् काञ्जिकेन प्रक्षालनं स्वेदनं च कार्यम्। अत्रानुष्टप् छन्दः ॥ १४८ । १४९ ॥

ज्ञातव्यम्—विधिरेषः शार्ङ्गधर संहितायाः मध्यम खण्डात् (अ० १३ । ६) उद्धृतो माधवेन ।

मर्दन् संस्कार ।

उ०—स्वेदन पूर्वक मर्दन करने के पश्चात्, खरल में पारद और पारद से आधा सैन्धव नमक डाल कर नीबू के रस से एक दिन तक लगातार तप्त खल्व अथवा तीव्र धूप में मर्दन करे ॥ १४८–१४९ ॥

अन्य शास्त्रों में भी ऐसा लिखा है जैसे—

युक्तं सूतस्य सर्वस्य तप्तखल्वे विमर्दनम् ।
अथवा तीव्रघर्मे च कारयेच्च प्रमर्दनम् ॥

ज्ञातव्य–माधव ने यह विधि, शार्ङ्गधर संहिता (मध्यम खण्ड, अ० १२–८) से उद्धृत की है ।

मूर्च्छन तथा उत्थापन संस्कार ।

उ०—मर्दन संस्कार करने के पश्चात्, पारद को समान भाग, राई, लहसुन तथा नौसादर से मर्दन की भाँति कांजी द्वारा घोटना चाहिये और फिर पारद का उत्थापन संस्कार करने के लिये पहिली भाँति, काँजी से पारद का प्रक्षालन (धोना) तथा स्वेदन करना चाहिए ।

ज्ञातव्य—माधव ने यह विधि शार्ङ्गधर संहिता (मध्यम खण्ड, अ० १२-६) से उद्धृत की है।

(ऊर्ध्वपातन संस्कारः)

ततः संशोष्य चक्राभं कृत्वा लिप्त्वा च हिंगुना ॥१५०॥
द्विस्थालीसम्पुटे धृत्वा पूरयेल्लवणेन च।
अधः स्थाल्यां ततो मुद्रां दद्याद् दृढतरां बुधः ॥१५१॥
विशोष्याग्निं विधायाधो निषिञ्चेदम्बु चोपरि।
दद्यात्ततस्तु तीव्राग्निं तदधः प्रहरत्रयम् ॥१५२॥
एवं निपत्य यात्यूर्ध्वं रसो दोष विवर्जितः।
अथोर्ध्वपिठरी मध्ये लग्नोग्राह्यो रसोत्तमः ॥१५२॥

एवं रसे गृहीते पुनस्तोलिते हीने सति पुनस्तद्यन्त्रं सम्मुद्य शेष स्योर्ध्वपातनं कृत्वा रसोग्राह्य इति गुरु सम्प्रदाय.।

प्र०—ऊर्ध्वपातन संस्कार विधिमाह—तत इति—ततः मूर्च्छनोत्थापनानन्तरं पारदे चतुर्थांशताम्रचूर्णं क्षिप्त्वा संमर्द्य पिष्टिं कुर्यात्, यदि पिष्टिर्नजायते तदा किंचित्तथं दत्वा मर्दयित्वा पिष्टिं कुर्यात्, तां पिष्टिं च किंचिदातपे संशोष्य चक्राभं=चक्रिकारं कृत्वा पारदात्षोड़शांशेन हिङ्गुना लिप्त्वा द्विस्थालीसम्पुटे= हण्डिकाद्वय सम्पुटे (डमरू यन्त्रे) धृत्वा लवणेन पूरयेत्, ततः=तदनन्तरं बुधः=कुशल रसवैद्यो दृढतरां मुद्रां दद्यात्= वह्निमृत्स्नयासन्धिं निरोधयेत्, तदनुतीव्रातपे विशोष्य तद्यन्त्रं चुल्ल्यामुपरि स्थापयित्वा तदधोऽग्निं विधाय=प्रज्वालयेदित्यर्थः, उपरि= ऊर्ध्वस्थाल्युपरितनभागेऽम्बुनिषिञ्चयेत = शीतलं

जलं पुनः पुनः क्षिपेत्, अथवा सजलवस्त्रखण्डं स्थापयेत्, ततः= तदनन्तरं तदधः=यन्त्राधः प्रहरत्रयं तीव्राग्निं दद्यात्, एवमित्थं दोषविवर्जितः =मलादिदोषरहितो रसः=पारदो निपत्योर्ध्वंयाति, अथ = ऊर्ध्व पातनानन्तरमूर्ध्व पिठरीमध्ये लग्ने रसोत्तमः=पारदो ग्राह्यः। यदि तोलितः सः पारदो हीनश्चेत्तदा पुनरूर्ध्व पातनं कृत्वा पारदो ग्राह्यः, इति गुरुसम्प्रदायरहस्यः ॥ अत्रानुष्टप् छन्दः ॥ १५०–१५३ ॥

ज्ञातव्यम् – विधिरेषः शार्ङ्गधर संहितायाः मध्यम खण्डात् (१२ । १० । १२) उद्धृतो माधवेन ।

ऊर्ध्व पातन संस्कार ।

मूर्च्छन तथा उत्थापन संस्कार करने के पश्चात्, पारद में चौथाई (¼) भाग शुद्ध तांबे का चूर्ण डाल कर पिट्ठी (पिष्टि) बनावे, यदि पिट्ठी न बन सके तो कुछ तूतिया मिला कर घोट कर पिट्ठी बना धूप में सुखा टिकिया बनावे, फिर उन टिकियाओं पर पारद के सोलहवां (1/16) भाग हींग का लेप कर डमरूयन्त्र में नीचे की हांडी में रख नमक भरदे, फिर चतुर रस वैद्य नीचे की हांडी में वह्निमृत्स्ना आदि द्वारा खूब दृढ मुद्रा कर धूप में सुखा कर डमरूयन्त्र को चूल्हे पर चढ़ा कर नीचे अग्नि जला कर ऊपर की हांडी के ऊपर बारबार शीतल जल डाले अथवा भीगा हुआ चौलड़ कपड़ा रख दे। फिर डमरूयन्त्र के नीचे तीन पहर (९ घण्टे) तक तीव्र अग्नि दे, इस प्रकार अग्नि देने से मल आदि दोष से रहित पारद, निकल कर ऊपर की हांडी में लग जाता है, फिर ऊपर की हांडी में लगे हुये उत्तम पारद को ऊन आदि के वस्त्र से

छुड़ाले। यदि वह पारद तोलने पर कम हो, तो फिर उसको पहिली भाँति घोट, टिकिया बना सुखा डमरूयन्त्र में रख फिर ऊर्ध्वपातन कर पारद ग्रहण करे, यह गुरु सम्प्रदायका रहस्य है॥ १५०-१५३॥

ज्ञातव्य—माधव ने यह ऊर्ध्वपातन विधि, शार्ङ्गधर-संहिता (मध्यम खण्ड, अ० १२।१०-१२) से उद्धृत की है।

इस विधि का वर्णन अन्य रस ग्रन्थों में भी मिलता है। यथा--

संरुध्यभाण्डद्वयगर्भमध्ये निधि तत: सम्पुटमव्रणं तम्।
निवेश्यचुल्ल्यान्तु: शनैः प्रदीपप्रमाणमस्याधतले विदध्यात्॥
अग्निशिरस्थस्य तत आर्द्रमेकं वस्त्रं क्षिपेत्क्रमनुष्णनेत्रम्॥
यात्रयेणोत्तमत्र ङ्गनदो नस्त: प्रसिद्धो ह्ययमूर्ध्वपात:॥
(रसरत्नप्रदीपिका, रसकामधेनु ३४२ पृष्ठे)

यहाँ पर उर्ध्वपातन के लिये डमरूयंत्र का प्रयोग किया जाता है। जैसा कि रसपद्धति के टीकाकार ने लिखा है—

अत्र भाण्डसम्पुट प्रतिपादनाड्डमरुकाख्यं यन्त्रं लभ्यते।

अथान्यत्रापि—

(कतिपयमुख्यसंस्कारनिर्देशः)

एतावतस्तु संस्कारान् सूतस्य कर्तुमक्षमैः।
तन्मुख्यान् क्रियतः कृत्वा ग्राह्यो रोगापनुत्तये॥१५४॥

प्र०—मतान्तरे कतिपय मुख्यसंस्कारान्निर्दिशन्नाह—एतावत इति--सूतस्य = पारदस्य एतावतः = अष्टौ संस्कारान् कर्त्त-

मक्षमैः = असमर्थैः, रसवैद्यैः, रोगापनुत्तये = व्याधिविनाशनाय, तेषां मध्यात् कियतः, कांश्चित् मुख्यान् = प्रधानान्, स्वेदनमर्दनमूर्च्छनोत्थापनपातनाख्यान् पञ्चसंस्कारान् कृत्वा पारदो ग्राह्यः॥ अयमाशयः—स्वेदनादिपातनान्तैः पञ्चसंस्कारैः हानिकारकानागादि दोषा विनश्यन्त्येव, एवं दोषरहितश्च पारदो रोगविनाशनाय समर्थ इति पञ्च मुख्यसंस्कारान् कृत्वा रोगनाशनार्थं पारदो ग्राह्यः, अवशिष्टैर्बोधननियमनदीपनाख्यैस्त्रिभिः संस्कारैस्तु पारदस्य षण्ढत्वविनाशः चाञ्चल्यनाशेन स्थैर्यं ग्रासार्थिता जारणपटुतासम्पादकत्वमेव जायते। अत्रानुष्टप् छन्दः ॥१५४॥

अन्यतम से पारद के कुछ मुख्य संस्कारों का निर्देश।

यदि रसवैद्य, पारद के स्वेदन आदि इन आठ संस्कारों को करने में असमर्थ हो तो उसको रोग नाश करने के लिये इन संस्कारों में से कुछ स्वेदन, मर्दन, उत्थापन और पतन इन मुख्य संस्कारों को कर पारद ग्रहण कर लेना चाहिये ॥१५४॥

ज्ञातव्य—ग्रन्थकार का यह भाव है कि १ स्वेदन, २ मर्दन, ३ मूर्च्छन, ४ उत्थापन, तथा ५ पातन इन पाँच संस्कारों के करने से पारद के हानिकारक नाग आदि दोष तो नष्ट हो ही जाते हैं, शेष बोधन नियमन तथा दीपन इन संस्कारों से तो पारद की नपुंसकता का विनाश, चञ्चलता दूर होने पर स्थिरता तथा ग्रास शक्ति और जारण क्षमता ही होती है, इसलिये रोगों को नष्ट करने के लिये स्वेदन आदि पाँच संस्कारों से संस्कृत पारद ही पर्याप्त है। इस कारण इन पाँच मुख्य संस्कारों से शुद्ध पारद को ही चिकित्सा के लिये ग्रहण कर लेना चाहिये।

इस बात को पहले भी कहा जा चुका है। यथा--

अथ यदि स्वेदनादिसंस्कारान् कर्तुमसमर्थः तं प्रति सुगम रसशोधनोपाया अप्युक्ताः सन्ति॥(आयुर्वेदप्रकाश अ० १)

वे सुगम रस शोधन उपाय यह ऊपर लिखे स्वेदन आदि पाँच संस्कार ही हैं।

(रसराजलक्षणम्)

दग्धोर्णागृहधूमसाररजनीरक्तेष्टिकाकाञ्जिकैः
पिष्ट्वा व्योषकुमारिकानलवरानिम्बुद्रवैर्वासरम्।
व्योषाद्यम्बुनि दोलया रचितया स्विन्नं सुताम्रांघ्रियुक्
पिष्टं भाण्डतलाज्जलाश्रयगतं सूतं समभ्युद्धरेत्॥१५५॥

लवणसलिलदोलायन्त्रमध्ये दिनैकं
भुजगनयनवन्ध्याभृङ्गकल्कान्तरस्थः।
तदनुदहनतोये काञ्जिके स्वेदितः स्यात्
सपटुमरिचशिग्रुण्युत्तमः श्रीरसेन्द्रः॥ १५६॥

प्र०—रसराजलक्ष्म्यां निर्दिष्टं संस्कारमाह—दग्धोर्णेति—दग्धोर्णा = मेषरोमभस्म, रजनी = हरिद्रा पारदात्षोडशांशमितैः पृथक् पृथक् दग्धोर्णादिभिः काञ्जिकसहितैः पारदं पिष्ट्वा व्योषम् = त्रिकटुः, वरा = त्रिफला, निम्बुद्रवैःसहिते, पारदात्षोडशांसामितानां व्योषादीनामम्बुनि = क्वाथे रचितया दोलया = दोलायन्त्रेणेत्यर्थः वासरं = दिनैकं स्विन्नं = संजातस्वेदनं पारदं, सुताम्रांघ्रियुक् =

चतुर्थांशताम्रसहितं यथास्यात्तथा पिष्टं च तं चुल्ल्यां डमरूयन्त्रे निधाय, वह्नि संतापेन भाण्डतलात् = निम्नहण्डिकातलात् = जलाश्रयगतं = उपरिस्थजलयुतायामूर्ध्वहण्डिकायां लग्नं सूत = पारदं समभ्युद्धरेत् रसवैद्य इति शेषः । अत्रशार्दूलविक्रीडितं वृत्तम् १५५

लवणेति—भुजगनयना = सर्पाक्षी, पारदात्षोडशांशमित सर्पाक्षीप्रभृतीनां कल्कान्तरस्थः पारदो दिनैकं सैन्धवलवणयुते जले दोलायन्त्रमध्ये स्वेदितः, तदनु = तदनन्तरं सपटुमरिचशिग्रुणि = पारदात्षोडशांशमित लवणमरिचशिग्रुसहिते दहनतोये = चित्रकक्वाथे काञ्जिके च स्वेदितः श्रीरसेन्द्रः = पारदः उत्तमः = श्रेष्ठः स्यात् ॥ अत्र मालिनीवृत्तम् ॥ १५६॥

रसराजलक्ष्मी में निर्दिष्टसंस्कार ।

उ०—ऊन की भस्म (राख), घर का धुआँ, हल्दी और लालईंट का चूर्ण इन सब को अलग-अलग पारद का सोलहवां ($\frac{1}{16}$) भाग लेकर इनके साथ पारद को काँजी में पीस कर नीबू के रस सहित पारद के सोलहवें भाग त्रिकटु (सोंठ, मिर्च, पीपल) घृत कुमारी (ग्वार पाठा) के गूदे का रस, चित्रकमूल की छाल तथा त्रिफला (हरड़, बहेड़ा, आमला) के क्वाथ में दोलायन्त्र में स्वेदन किये गये पारद में फिर चौथाई ($\frac{1}{4}$) भाग शुद्ध ताम्र चूर्ण डाल कर पीसे और डमरूयन्त्र में ऊर्ध्व पातन करे तथा फिर जल से शीतल हुई ऊपर की हांडी में लगे हुये पारद को ऊन के कपड़े से छुड़ा ले ॥ १५५ ॥

सर्पाक्षी, बांझ ककोड़ा तथा भांगरे के कल्क में स्थित पारद को एक दिन तक सैन्धव नमक युक्त जल में दोलायन्त्र

में स्वेदन कर, फिर पारद के सोलहवें भाग नमक, काली मिर्च, तथा सँहजने सहित चित्रक के क्वाथ और काँजी में स्वेदन करने से पारद श्रेष्ठ हो जाता है ॥ १५६ ॥

ज्ञातव्य—माधव ने यह दोनों पद्य, रसराजलक्ष्मी ग्रन्थ से उद्धृत किये हैं।

(पारदस्यात्यावश्यकसंस्काराः)

एतावदप्यशक्तः कर्त्तुं सूतस्यशोधनं मनुजः ।
स्वेदनमर्दनमूर्ध्वपातनमेतत्त्रयं कुर्यात् ॥ १५७ ॥

प्र०—पारदस्यात्यावश्यकसंस्कारानाह-एतावदिति-मनुजः =पुरुषः, वैद्य इत्यर्थः, सूतस्य=पारदस्य, एतावदपि=पूर्वनिर्दिष्ट संस्कार पञ्चकरूपमपि शोधनं कर्त्तुमशक्तः=असमर्थश्चेत्तर्हि सः, स्वेदनं, मर्दनम्, ऊर्ध्वपातन मित्येतत्त्रयं=स्वेदनादिसंस्कारत्रयमवश्यमेव कुर्यात्, एभिस्त्रिभिः संस्कारैरेव नागादि दोषाणामपहरणात् । अत्रानुष्टुप्छन्दः ॥ १५७ ॥

पारद के अत्यन्त आवश्यक तीन संस्कार।

उ०—यदि वैद्य पारद का पहिले बताये हुये स्वेदन, मर्दन मूर्च्छन, उत्थापन, तथा ऊर्ध्व पातन इन पाँच संस्कारों से भी शोधन न कर सके तो उसको स्वेदन, मर्दन तथा ऊर्ध्व पातन यह तीन संस्कार तो अवश्य ही करने चाहिये ॥१५७।

ज्ञातव्य—वैसे तो प्रत्येक संस्कार से पारद में गुण, वृद्धि होती है इस लिये सभी उपयोगी हैं, परन्तु इनमें स

स्वेदन मर्दन, तथा ऊर्ध्व पातन यह तीन संस्कार अत्यावश्यक हैं क्यों कि इससे पारद के हानिकारक सब प्रकार के दोष नष्ट हो जाते हैं। जैसे—

१—स्वेदन संस्कार से पारद के दोष शिथिल होते हैं।

२—मर्दन संस्कार से पारद के दोष नष्ट होते हैं।

३—ऊर्ध्व पातन संस्कार से लोभी व्यापारियों द्वारा बिक्री में लाभ प्राप्त करने के लिये मिलाये गये नाग तथा वङ्ग नाम के भयङ्कर औपाधिक दोष नष्ट होते हैं। यथा—

१-(अ) क्षाराम्लैरौषधैर्वाऽपि दोलायन्त्रे स्थितस्यहि।
पाचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकम् ॥
(रसेन्द्र चूड़ामणि तथा रसरत्नसमुच्चय)

(आ) दोषोत्क्लेदकृते शनै स्त्रिदिवसं मृद्वग्निना स्वेदयेत्।
(रसपद्धति श्लोक ६)

२-(अ) उद्दिष्टैरौषधैः सार्धं सर्वाम्लैः काञ्जिकैरपि।
पेषणं मर्दनाख्यं स्याद्बहिर्मलविनाशनम् ॥
(रसेन्द्र चूड़ामणि तथा रसरत्न समुच्चय)

(आ) स्वेदनोद्दिष्ट भैषज्यैर्मर्दयेत्काञ्जिकैस्त्र्यहम्।
बहिर्मल बिनाशाय रसराजं तु निश्चितम् ॥
(रसप्रकाश सुधाकर अ०१, श्लोक ४)

३-मिश्रितौ चेद्रसे नागवङ्गौ विक्रयहेतुना।
ताभ्यां स्यात्कृत्रिमो दोषस्तन्मुक्तिः पातनत्रयात् ॥
(आयुर्वेदप्रकाश अ० १-८२)

रसरत्नाकरे शोधनं यथा—

अथातः सम्प्रवक्ष्यामि दोषाष्टकनिवारणम् ।

(१ नागदोष नाशनम्)

इष्टिकारजनी चूर्णैः षोडशांशै१ रसस्य तु२ ॥१५८॥
३मर्दयेत्तप्तखल्वे हि जम्बीरोत्थद्रवैर्दिनम् ।
खल्वं लोहमयं कुर्यात्पाषाणोत्थमथापिवा ॥१५९॥
काञ्जिकैः क्षालयेत्सूतं नागदोषं विमुञ्चति ।

(२ वङ्गदोषनाशनम्)

विशालाङ्कोल चूर्णेन वङ्गदोषं विनाशयेत्४ ॥१६०॥

(३ मलदोषनाशनम्)

राजवृक्षो मलं हन्ति,

(४ वह्निदोषनाशनम्)

५चित्रको वह्निदूषणम् ।

(५ चांचल्यदोषनाशनम्)

चांचल्यं कृष्णधत्तूरः,

(६ विषदोषनाशनम्)

त्रिफला विषनाशिनी ॥ १६१ ॥

(७ गिरिदोषनाशनम्)

---

१ षोडशांशं, २ च, ३ मर्दयेत्तं तथाखल्वे, ४ विमुञ्चति,
५ पावको हन्ति पावकम् ।

कटुत्रयं गिरिं हन्ति,.

(८ असह्याग्नि दोषनाशनम्)

१ह्यसह्याग्नि त्रिकण्टकः।

प्रतिदोषं कलांशेन तत्र२चूर्णं३ सकन्यकम् ॥१६२॥

सुवस्त्रगालितं खल्वे सूतंक्षिप्त्वा४ यथाक्रमम्।

प्रत्येकं प्रत्यहं यत्नात् सप्तरात्रं विमर्दयेत् ॥१६३॥

५उद्धृत्य चारनालेन मृद्भाण्डे क्षालतेत्सुधीः।

सर्वदोष विनिर्मुक्तः सप्तकञ्चुक वर्जितः।

जायते शुद्धसूतोऽयं योजये द्रसकर्माणि६ ॥१६३॥

प्र०—रसरत्नाकरे निर्दिष्टं पारदस्य शोधनमाह—अथेति-विशाला = इन्द्रवारुणी, राजवृक्षः = आरग्वधः, कटुत्रयः = त्रिकटु, त्रिकण्टकः = गोक्षुरः। स्पष्टमन्यत्। अत्रानुष्टुप् छन्दः ॥ १५८-१६३ ॥

रसरत्नाकर में वर्णित पारद की शोधन विधि।

उ०—अब मैं पारद के आठ दोषों को दूर करने की विधि का वर्णन करूँगा।

नागदोषनाशन विधि—

पारद का सोलहवां ($\frac{1}{16}$) भाग. लाल ईंट तथा हल्दी का चूर्ण अलग अलग ले और उसके साथ पारद को तप्त

---

१ असह्यत्वं, इतिपाठान्तरं रसमञ्जर्याम्, २ तत्तत इति पाठान्तरं रसेन्द्रसारसंग्रहे, ३सूतं सकाञ्जिकम्, ४ विमर्दयेत्. ५ उद्धृत्योष्णारनालेन मृत्पात्रे, ६ रसकर्मसु, इति पाठान्तरं रसमञ्जर्याम्।

खरल में डाल कर जंभीरी के रस से एक दिन तक मर्दन करे (घोटे), इसके लिये खरल, लोह अथवा पत्थर का बना हुआ होना चाहिये. मर्दन करने के पश्चात् पारद को कांजी से धोवे इस विधि से पारद का नाग दोष दूर हो जाता है।

(२) बंगदोष नाशन विधि—इन्द्रायण तथा अंकोल (ढेरा) के चूर्ण के साथ ग्वारपाठा के रस में मर्दन करने से पारद का बंग दोष नष्ट हो जाता है ॥ १६० ॥

(३) मलदोष नाशन विधि—अमलतास का चूर्ण (पारद के साथ मर्दन करने से), पारद के मल दोष को नष्ट करता है।

(४) वह्निदोषनाशन विधि—चित्रक की जड़ की छाल का चूर्ण, पारद के वह्नि दोष को नष्ट करता है।

(५) चाञ्चल्यदोष नाशन विधि—काले धतूरा का चूर्ण, पारद के चाञ्चल्य (चपलता, चापल्य) दोष को नष्ट करता है।

(६) विषदोषनाशन विधि—त्रिफला (हरड़, बहेड़ा, आमला) का चूर्ण, पारद के विष दोष को नष्ट करता है॥१६॥

(७) गिरिदोषनाशन विधि—त्रिकटु (सोंठ, काली मिर्च, पीपल) का चूर्ण, पारद के गिरि दोष को नष्ट करता है।

(८) असह्याग्निदोषनाशन विधि—गोखरू का चूर्ण, पारद के असह्याग्नि दोष को नष्ट करता है।

प्रत्येक दोष को नष्ट करने के लिये दोषनाशक औषधि का चूर्ण, पारद का सोलहवां ($\frac{1}{16}$) भाग लेना चाहिये और उसको कपड़े में छान क्रम पूर्वक पारद में डाल कर, घृतकुमारी (ग्वारपाठा) के रस से सात दिन तक सावधानी से

मर्दन करे और खरल में से निकाल कर कांजी से एक मिट्टी के बर्त्तन में पारद को धोवे, इस विधि से पारद मल आदि सब दोष तथा सात कंचुक दोषों से रहित हो जाता है, इस प्रकार के शुद्ध पारद को सब पारद के कार्यों में डालना चाहिये ॥ १६२-६४ ॥

ज्ञातव्य--माधव ने पारद की यह शोधन विधि रस-रत्नाकर' से उद्धृत की है, रसमंजरी तथा रसेन्द्रसारसंग्रह में भी यह विधि है। रसतरङ्गिणी में वर्णित, पारद के प्रथम शोधन प्रकार के २३ से २६ वें श्लोक तक के चार श्लोक, इसी शोधन विधि के अनुवाद मात्र हैं।

आयुर्वेदप्रकाश के इसी प्रथम अध्याय में पहिले भी मूर्च्छन संस्कार की दूसरी विधि में ५८ से ६२ वें श्लोक तक के श्लोकोंमें भी यह विधि, कुछ परिवर्तित श्लोकोंमें वर्णित है।

तप्तखल्व लक्षणम्–

अजाशकृत्तुषाग्निं च१ खनयित्वा२ भुवं३ क्षिपेत्।
तस्योपरि स्थितः४ खल्वस्तप्तखल्वो ह्ययं५ भवेत्॥१६५

१ तु भूगर्भे, त्रितयं, इति पाठांतरं रसमञ्जर्याम्, रसेन्द्रसारसंग्रहे च, २ खनित्वा भूमिमावपेत्, इति पाठांतरं योगरत्नाकरे। ३ 'भुवि' इतिपाठांतरं रसेन्द्रचिन्तामणौ, ४ स्थितं खल्वं तप्त खल्वं इति पाठांतरं रसेन्द्रचिन्तामणौ, रसमञ्जर्याम् योगरत्नाकरे रसेन्द्रसारसंग्रहे च, स्थितो लोह खल्वः सतप्तखल्वकः इति पाठांतरमस्मिन्न्वायुर्वेदप्रकाशे २४५ श्लोके, ५ इतिस्मृतं इतिपाठांतरं रसेन्द्रचिन्तामणौ, रसमञ्जर्यां रसेन्द्रसारसंग्रहे च, 'जगुर्बुधाः' इति च पाठान्तरं योगरत्नाकरे।

प्र०—तप्तखल्वलक्षणमाह—अजेति-भुवं = पृथिवीं, खनयित्वा तत्राजाशकृत्तुषाग्नि मेतत्त्रयं क्षिपेत्, तस्योपरि स्थितोऽयं खल्वः—लौहखल्वस्तप्तखल्वो भवेत । अत्रानुष्टुप् छन्दः ॥ १६५ ॥

ज्ञातव्यम्— एतत्तप्तखल्वलक्षणं रसेन्द्रचिन्तामणित उद्धृतो माधवेन, रसमञ्जर्यां रसेन्द्रसार संग्रहे योगरत्नाकरे ऽपिचास्ति । आयुर्वेदप्रकाशे २४५ संख्यके श्लोके पुनरपि च वक्ष्यते ।

तप्तखल्व का लक्षण ।

उ०—पृथ्वी में एक गड्ढा खोद कर, उस गड्ढे में बकरी की मेंगनी (विष्ठा), भूसा और अग्नि डाल दे फिर उसके ऊपर लोह का खरल रखे, यह तप्त खल्व (तप्त खरल) कहलाता है ॥ १६५ ॥

ज्ञातव्यम्—माधव ने तप्त खल्व का यह लक्षण रसेन्द्र चिन्तामणि । (अ० ३ । ६६) से उद्धृत किया है और आगे भी फिर २४५ वें श्लोक में इसको लिखा है, यह लक्षण, रसमञ्जरी रसेन्द्रसारसंग्रह और योग रत्नाकर में भी मिलता है ।

(तप्तखल्वे पारदशोधनम्)

अथान्यन्मतम्—

भूगर्तेऽजशकृत्तुषानलपुटे संस्थापिते लोहजे,
खल्वे जम्भलकाञ्जिकेन बलिना सार्धं दशांशेन सः ।

***संमर्द्य: परिपात्य यन्त्रविधिना निष्कासितः सप्तधा,**
शुद्धः पारद+ मर्दकैर्निगदितो वैद्यैरवद्येतरैः ॥१६६॥

प्र०—तप्तखल्वे पारदशोधनमाह - भूगर्त इति—अजशकृत्तुषानलपुटे अजशकृत्तुषानलयुक्ते भूगर्ते लौहजे = लौहनिर्मिते खल्वे संस्थापिते सति दशांशेन = दशमभागेन बलिना = गन्धकेन सार्धं सह := रसः, जम्भलकाञ्जिकेन = जम्बीरस्वरसेन काञ्जिकेन च सम्मर्द्य := मर्दनीयः, पश्चाच्च यन्त्रविधिना = उपरिपातनयन्त्रविधिनापरिपात्य सप्तधा निष्कासितः सः पारदः अवद्येतरैः = अत्युत्तमैः ।पारदकर्मठैः = पारदस्य संस्कारादिकर्मकुशलैः शुद्धः पारदो निगदितः = कथितः ॥ अत्रशार्दूलविक्रीडितं छन्दः ॥ ६६॥

ज्ञातव्यम्—श्लोकोऽयं रसपद्धतित उद्धृतो माधवेन, रसकामधेनौ चाप्युद्धृतोऽसौ श्लोकः ।

तप्तखल्व द्वारा पारद का शोधन ।

बकरी की मींगनी, भूसा और अग्नि से भरे हुये पृथ्वी के गढ़े पर, लोह के (गर्म) खरल में स्थापित कर, शुद्ध पारद को दसवें (१/१०) भाग शुद्ध गन्धक के साथ जंबीरी के रस तथा कांजी से घोटकर 'ऊर्ध्व पातन यन्त्र से ऊर्ध्व पातन कर निकाले गये, पारद को अत्यन्त श्रेष्ठ वैद्यों ने शुद्ध पारद कहा है ॥ १६६ ॥

---

* 'सम्मर्द्योपरिपातमन्त्रविधिना' +'पारदकर्मठै' इति च पाठान्तरं रसपद्धत्यां रसकामधेनौ च ।

ज्ञातव्यम्—माधव ने यह श्लोक, रसपद्धति (१७ वाँ श्लोक) से उद्धृत किया है, रस कामधेनु में भी यह श्लोक उद्धृत किया गया है ।

(अथान्यन्मतम्)

श्रीखण्डं १देवदारुं च काकतुण्डी २जयाद्रवम् ।
३कर्कोटी मुसली कन्याद्रवं दत्वा विमर्दयेत् ॥१६७॥
दिनैकं ४पातयेत् ५पात्रे तं शुद्धं विनियोजयेत् ।

प्र०—पारदस्य मतान्तरेण शोधनमाह—श्रीखण्डमिति—श्रीखण्डं = चन्दनं काकतुण्डी = काकनासा, जया = हरीतकी कन्याद्रवं = घृतकुमारीरसं, श्रीखण्डादीनां स्वरसं पारदे दत्वा खल्वे दिनैकं विमर्दयेत्, तदनन्तरं पारदमूर्ध्वपातनयन्त्रेण पात्रे पातयेत्, शुद्धं च तं पारदं सर्वयोगेषु विनियोजयेत्। अत्रानुष्टप्छन्दः॥१६७॥

ज्ञातव्यम्—एतन्मतं रसमञ्जर्याः प्रथमाध्यायात् (श्लोक ३२) उद्धृतं माधवेन । रसेन्द्रसारसंग्रहे रसकामधेनौ चाप्यस्ति ।

१–'देवकाष्ठ' इति पाठान्तरं रसेन्द्रसारसंग्रहे, २–'द्रवैः' इति पाठान्तरं रसमञ्जर्यां, रसेन्द्रसारसंग्रहे रसकामधेनौ च, ३–'कर्कटी' इति पाठान्तरं रसेन्द्रसारसंग्रहे, ४–'मर्दयेत्' इति पाठान्तरं रसमञ्जर्यां ।

५ 'पश्चाच्छुद्धं च' इति रसमञ्जर्यां, 'पश्चात्तं शुद्धं' इति रसेन्द्रसारसंग्रहे, 'पश्चात्सूतं शुद्धं नियोजयेत्' इति च रसकामधेनौ पाठान्तरम् ।

अन्य आचार्य के मत से पारद का शोधन ।

उ०—पारद को, चन्दन, देवदारु, काकनासा (कौआठोडी), हरड़, ककोड़ा, मूसली तथा घृतकुमारी का स्वरस डालकर एक दिन खरल में मर्दन करे और फिर ऊर्ध्वपातन यन्त्र से ऊर्ध्वपातन कर इस शुद्ध पारद को सब प्रयोगों में व्यवहार करे ॥ १६७ ॥

ज्ञातव्य—माधव ने यह मत, रसमञ्जरी (अ० १-३२) से उद्धृत किया है, रसेन्द्रसारसंग्रह तथा रसकामधेनु में भी उद्धृत किया गया यह मत मिलता है ।

(अथान्यत्सिद्धमतम् प्रथमोविधिः)

कुमार्या च निशा चूर्णैं दिनैकं +मर्दयेद्रसम् ॥१६८॥
पातयेत्पातनायन्त्रे *शुद्धो भवति पारदः ।

प्र०—सिद्धमतेन पारदस्य शोधनमाह—कुमार्या इति-रसं = पारदं, कुमार्याः घृतकुमार्याः स्वरसेन निशाचूर्णैः = हरिद्राचूर्णैश्च दिनैकं मर्दयेत् मर्दनान्तरं च पातनायन्त्रे = ऊर्ध्वपातनयन्त्रे पातयेत, एवं पारदः शुद्धो भवति ॥ १६८ ॥

ज्ञातव्यम्—एतन्मतं रसमञ्जर्याः प्रथमाध्यायात् (श्लोक ३१) उद्धृतं माधवेन । रसेन्द्रसारसंग्रहे रसकामधेनौ चाप्यस्ति ।

+ 'दिनंसूतं' * सम्यक्छुद्धो भवेद्रसः इति च पाठान्तरं रसमञ्जर्यादिषु ।

सिद्धमत से पारद का शोधन ।

उ०—पारद को, घृतकुमारी के गूदे के स्वरस और हल्दी के चूर्ण से एक दिन मर्दन करे और मर्दन करने के पश्चात् ऊर्ध्व पातन यन्त्र से ऊर्ध्व पातन करे, इस प्रकार से यह पारद शुद्ध होता है ॥ १६८ ॥

ज्ञातव्य – माधव ने यह मत, रसमञ्जरी (अ० १-३१) से उद्धृत किया है, रसेन्द्रसारसंग्रह और रसकामधेनु में भी उद्धृत किया गया यह मत मिलता है ।

(अथान्यत्सिद्धमतम्)

(द्वितीयोविधिः)

एकेन लशुनेनापि शुद्धो भवति पारदः ।
पिष्टो लवणसंयुक्तो मासैकं तप्तखल्वके ॥१६९॥

प्र०—पारदशोधनेऽन्यत् सिद्धमतमाह—एकेनेति-लवण संयुक्तः = सैन्धवलवणसहितः पारदः,एकेन लशुनेनापि = लशुनरसेनापि मासैकं तप्तखल्वके पिष्टः सन् शुद्धो भवति । अत्रानुष्टुपछन्दः ॥ १६९ ॥

सिद्ध मत से पारद शोधन की द्वितीय विधि ।

उ०—सैन्धव नमक सहित पारद को, अकेले लहसुन के रस से भी एक मास तक लोह के तप्त खरल में घोटने से पारद शुद्ध हो जाता है ॥ १६९ ॥

ज्ञातव्य—यह सिद्धमत, रसरत्नप्रदीपिका के निम्न लिखित श्लोक के आधार पर निर्मित हुआ है —

....विमर्दयेत्।
एकेनैव रसोनस्य रसशुद्ध्यै रसेन च ॥

(हिंगुलाकृष्टोरसः)

(प्रथमोविधिः)

अथवा [1]ग्राहयेत्सूतं दरदात् स निगद्यते।
कंचुकै र्नागवङ्गाद्यै विंमुक्तो रसकर्मणि ॥ १७० ॥
[[2]जम्बीरनिम्बुनीरेण मर्दितो हिंगुलो दिनम्।
ऊर्ध्वपातनयन्त्रेण ग्राह्यः स्यान्निर्मलोरसः ॥ १७१ ॥
विना कर्माष्टकेनैव सूतोऽयं सर्वकर्मकृत्।]
हिंगुलाकृष्टसूतस्तु जीर्णगन्धसमो गुणैः ॥ १७२ ॥

प्र०—हिंगुलाकृष्टरसमाह-अथवेति-अथवा = उक्तप्रकारैः शोधनाभावे, सूतं = पारदं दरदात् = शुद्धहिंगुलात् ग्राहयेत, सः = हिंगुलात्पारदग्रहणविधि र्निगद्यते = कथ्यते। जम्बीरनिम्बुनीरेण = जम्बीरनिम्बु स्वरसेन दिनमेकं मर्दितहिंगुलादूर्ध्वपातनयन्त्रेण

१—'हिंगुलात्सूतं ग्राहयेत्' इति पाठान्तरं रसमञ्जर्यां रसेन्द्रसारसंग्रहे च।

२—अयं कोष्ठाङ्कितपाठः रसमञ्जर्यां रसेन्द्रसारसंग्रहे चाधिकोऽस्ति।

=डमरूयन्त्रेण निर्मलः = शुद्धो रसः = पारदो ग्राह्यःस्यात् । इत्थं नागवङ्गाद्यैः कञ्चुकैर्विमुक्तः = रहितः पारदो रसकर्मणि = पारद-संस्कारकर्मणि, भेषजप्रयोगेषु च योज्य इति शेषः, अयं पारदः कर्माष्टकेन = स्वेदनाद्यष्ट संस्कारेण विनैव सर्वकर्मकृत् = रोगनाशनादिसर्वकार्यकरो भवति, हिंगुलाकृष्टः सूतः पारदो गुणैः = रोगघ्नादिगुणैस्तु जीर्णो = मूर्च्छनविधिना जीर्णो गन्धो = गन्धको येन स तादृशो यो पारदस्तेनः समः = तुल्योभवति । अयं भावो यथा जीर्णगन्धः पारदो रोगनाशनक्षमोः भवति तथैव हिंगुलाकृष्टः पारदोऽपि रोगनाशने समर्थ भवति ॥ अत्रानुष्टप्छन्दः ॥ १७०-१७२ ॥

ज्ञातव्यम् – अयं हिंगुलाकर्षणविधी रसमञ्जर्याः प्रथमाध्यायात् (श्लो० ३३-३५) उद्धृतो माधवेन । रसेन्द्रसारसंग्रहेऽप्यस्ति ।

हिङ्गुलाकृष्ट (हिङ्गुल से निकला हुआ) पारद की प्रथम विधि ।

उ०—ऊपर लिखे प्रकारों से शोधित पारद के अभाव में, शुद्ध हिङ्गुल से निकाला हुआ पारद ग्रहण करे, अब हिङ्गुल से पारद निकालने की विधि कहते हैं। हिङ्गुल को जँभीरी अथवा नीबू के स्वरस से एक दिन मर्दन कर, ऊर्ध्वपातन (डमरू यन्त्र) से ऊर्ध्वपातन कर शुद्ध पारद को ग्रहण करना चाहिये, इस प्रकार नाग वङ्ग आदि कञ्चुक दोषों से रहित पारद को, पारद के संस्कार आदि कर्म तथा औषधियों के प्रयोग में प्रयुक्त करना चाहिये । यह पारद, स्वेदन आदि आठ संस्कार किये बिना ही, रोगविनाश आदि सब कार्य करने वाला होता है और यह हिङ्गुल से निकाला हुआ

पारद, रोग विनाशन आदि गुणों में मूर्च्छना विधि द्वारा जीर्ण गन्धक पारद के समान होता है अर्थात् जिस प्रकार जीर्ण गन्धक पारद, रोगों को नष्ट करने में समर्थ होता है, उसी प्रकार हिंगुल से निकाला हुआ यह पारद भी रोगों को नष्ट करता है ॥ १७२ ॥

ज्ञातव्य—माधव ने यह हिङ्गुल से पारद निकालने की विधि रसमंजरी (अ० १, ३३-३५) से उद्धृत की है। रसेन्द्र सारसंग्रह (अ० १, ४७-४८) में भी यह विधि है।

(मतान्तरेण द्वितीयो विधिः)

१निम्बपत्ररसैः पिष्ट्वा हिंगुलं याममात्रकम् ।
जम्बीराणां २द्रवैर्वाऽथ ३पात्यं पातनयन्त्रके ॥१७३॥
तं सूतं योजयेत्पश्चात्सप्तकञ्चुकवर्जितम् ।
४इत्येवं शुद्धिराख्याता यथेष्टं तां च कारयेत् ॥१७४॥

प्र०—मतान्तरेण द्वितीयविधिमाह— निम्बपत्रेति-हिंगुलं निम्बपत्ररसैर्जम्बीराणां द्रवैर्वा याममात्रकं = प्रहरैकं पिष्ट्वा पातनयन्त्रके = डमरूयन्त्रे पात्यं, पश्चात् = ऊर्ध्वपातनानन्तरं सप्तकंचुकवर्जितं = सप्तकंचुकरहितं तं = शुद्धं सूतं = पारदं सर्वकर्म सु योजयेत्, इत्येवं = अनेनप्रकारेण बहुविधा पारदस्य शुद्धिराख्याता कथिता, यथेष्टं तां = शुद्धिं च कारयेत् ॥ अत्रानुष्टुप्छन्दः ॥

१—'पारिभद्ररसैः पेष्यं', २—'रसैः', ३—'पात्यं', ४—'संशुद्धिमन्तरेणापि शुद्धोऽयं रसकर्मणि', इति च पाठान्तरं रसेन्द्रसारसंग्रहे ।

ज्ञातव्यम्—इमौश्लोकौ किञ्चित्परिवर्तितरूपेण रसेन्द्रसार-संग्रहेऽप्युपलभ्येते

द्वितीय विधि ।

उ०—खरल में हिंगुल को नीम के पत्तों के रस अथवा जम्बीरी के रस से एक पहर (३ घण्टे) तक पीसकर, डमरू-यन्त्र से ऊर्ध्वपातन करे और फिर ऊर्ध्वपातन किये गये सात कञ्चुकों से रहित इस शुद्ध पारद को प्रयोगों में प्रयुक्त करे, इस प्रकार अनेक प्रकार से पारद की शुद्धि कही गई है, उनमें से इच्छानुसार किसी शुद्धि को करावे ॥ १७३-१७४ ॥

ज्ञातव्य--यह दोनों श्लोक, रसेन्द्रसारसंग्रह (अ० १, श्लोक ५४-५५) में भी कुछ परिवर्तित रूप में मिलते हैं। रसपद्धति में भी यह विधि वर्णित है। यथा—

हिङ्गुलात्पृथुपारिभद्रकरसै र्वा जम्भवारा दिनं
पिष्टादूर्ध्वपातनयन्त्र विधिना निष्कासयेत् पारदम् ।

(श्लोक १८)

(मतान्तरेण तृतीयोविधिः)

अन्यत्रापि—

अथवा दरदाकृष्टं स्विन्नं [1]लवणाम्बुभिस्तु दोलायाम् ।
रसमादाय यथेच्छं कर्त्तव्यस्तेन भेषजो योगः ॥१७५॥

१—'लवणाम्बुभाजि' इति पाठान्तरं योगरत्नाकरे।

निम्बूरसेन २सम्पिष्टात्प्रहरं ३दरदाद् दृढम् ।
ऊर्ध्वपातनयन्त्रेण संग्राह्यो निर्मलो रसः ॥ १७६ ॥

इति सुगमशोधनं ॥

प्र०—मतान्तरेण तृतीयविधिमाह—अथवेति-अथवा दरदाकृष्टं = हिंगुलाकृष्टं पारदं लवणाम्बुभिः = सैन्धवलवणयुक्तजलै दोंलायां स्विन्नं रसं = पारदमादाय, तेन = पारदेन यथेच्छं भेषजः = औषधस्य योगः कर्त्तव्यः । किञ्च निम्बूरसेन प्रहरं = प्रहरैकं दृढं सम्पिष्टात्, दरदाद् = हिंगुलात् ऊर्ध्वपातनयन्त्रेण = डमरूयन्त्रेण निर्मलः = शुद्धो रसः = पारदः संग्राह्यः ॥ अत्र प्रथमश्लोके गीतिवृत्तम्, द्वितीयश्लोकेत्वनुष्टब् वृत्तम् ॥ १७५-१७६ ॥

ज्ञातव्यम्—इमौ श्लोकौ योगरत्नाकरेऽप्युपलभ्येते ।

तृतीय विधि ।

अन्य रसशास्त्रों में भी लिखा है कि—

उ०—अथवा हिङ्गुल से निकाले हुये पारद को सैन्धव नमक मिले हुये जल से, दोलायन्त्र में स्वेदन करे और उस स्वेदन किये गये पारद का, इच्छानुसार औषधियों में प्रयोग करे । खरल में नीबू के रस से दृढ़ता के साथ एक पहर (३ घण्टे) तक घोटे गये पारद से, डमरूयन्त्र द्वारा ऊर्ध्व पातन से निकाले गये शुद्ध पारद को ग्रहण करना चाहिये ।

ज्ञातव्य—यह दोनों श्लोक, योगरत्नाकर में भी मिलते हैं ।

१—'सम्पिष्टं', २—'दरदं' इति च पाठान्तरं योगरत्नाकरे ।

(शोधितपारदस्य मुखकरणम्, प्रथमोविधि)

अथैवं शोधितस्य मुखकरणमुक्तं तन्त्रान्तरे—

सास्योरसः स्यात्पटुशिग्रुतुत्थैः,
सराजिकैः सोषणकैः* स्त्रिरात्रम् ।
पिष्टस्ततः स्विन्नतनुः सुवर्ण-
मुखानयं खादति सर्वधातून् ॥१७७॥

प्र०—शोधित पारदस्य मुखकरणमाह-सास्य इति—सराजिकैः = आसुरीयुतैः, सोषणकैः = समरिचैः पटुशिग्रुतुत्थैः = सैन्धवशोभाञ्जनतुत्थैः सह पिष्टस्ततः स्विन्नतनुः = संजातस्वेदो, रसः = पारदः, सास्यः = आस्येन मुखेन सहितः, संजातमुखः, धातुग्रसनसमर्थः स्यात् । अयं पारदः सुवर्णमुखान् = सुवर्णप्रधानान् सर्वधातून् खादति । अत्रोपजाति वृत्तम् ॥ १७७ ॥

ज्ञातव्यम्—श्लोकोऽयं रसमञ्जर्याः प्रथमाध्यायात् (श्लो० ७) उद्धृतो माधवेन । योगरत्नाकरेऽप्ययमुपलभ्यते ।

शोधित पारद का मुखकरण ।
(प्रथम विधि)

इस प्रकार से शोधित पारद का मुखकरण, अन्य रस शास्त्रों में इस प्रकार बताया गया है-

राई, कालीमिर्च, सैन्धव नमक, सहजने के बीज तथा तूतिया के साथ पिसे हुए पारद का स्वेदन करे, इससे यह

* 'मुखयान्' इति पाठान्तरं रसमञ्जर्यां योगरत्नाकरे च ।

पारद मुख सहित होजाता है तथा सुवर्ण आदि सब धातुओं को खा लेता है, सुवर्ण आदि धातुओं को भक्षण करने की पारद की सामर्थ्य को मुखकरण कहते हैं और यह पारद मुख सहित अथवा राक्षसमुख कहलाता है ॥१७७॥

ज्ञातव्य—माधव ने यह श्लोक रसमञ्जरी (अ० ६।७) से उद्धृत किया है, योगरत्नाकर में भी यह श्लोक है।

(द्वितीयोविधि)

अन्यन्मतम्—

अथ१ षड्बिन्दु कीटैश्च रसोमर्द्य स्त्रिवासरम्।
लवणाम्लैर्मुखं तस्य जायते ग्रासलोलुपम् ॥१७८॥

अथवा बिन्दुली कीटैः इत्यपि पाठान्तरम्-

प्र०—मन्तान्तरेण पारदस्य मुखकरणमाह—अथेति—अथवा षड्बिन्दुकीटैर्लवणाम्लैः = सैन्धवादिपञ्चलवणैर्जम्बीराद्यम्लवर्गोक्त द्रव्यैश्च रसः=पारदस्त्रिवासरं = दिवसत्रयं मर्द्यः इत्थंतस्य पारदस्य ग्रासलोलुपं मुखं जायते। अत्रानुष्टुप्छन्दः॥१७८॥

ज्ञातव्यम्—श्लोकोऽयं शार्ङ्गधरसंहितायामध्यमखण्डात् (अ० १२।२४) उद्धृतो माधवेन, योगरत्नाकरेऽप्ययमस्ति।

१—'अथवा बिन्दुली कीटैः' इति पाठान्तरं शार्ङ्गधरसंहितायां योगरत्नाकरे, च २—'धातुभक्षकम्'. इति पाठान्तरं योगरत्नाकरे, 'धातुहृत्वरा', 'धातुघस्मरम्' इति च पाठान्तरं शार्ङ्गधरसंहिताया दीपिका गूढार्थदीपिका व्याख्या सम्मतम्।

द्वितीय विधि ।

उ०—अथवा षड्बिन्दु कीड़ा, सैन्धव आदि पाँच नमक तथा जंबीरी नीबू आदि अम्लवर्ग के रस से पारद को तीन दिन तक घोटे, इस प्रकार घोटने से पारद का मुख करण हो जाता है और वह सुवर्ण आदि धातुओं को भक्षण करने का इच्छुक हो जाता है ॥ १७ ८

ज्ञातव्य—माधव ने यह श्लोक शार्ङ्गधर संहिता (मध्यम खण्ड अ० १२ २४) से उद्धृत किया है। योग-रत्नाकर में भी यह श्लोक है।

षड्बिन्दु कीट—यह एक विषैला कीड़ा है, जिसकी पीठ पर छः बूंद (बिन्दु) होती हैं, जिनमें से पाँच सफेद बूंद तथा एक बूंद कुछ दूसरे रंग की होती है, इसके काटने से मनुष्य मर जाता है। यथा--

षड्बिन्दुकस्य कीटस्यश्वेता,स्युः पञ्चबिन्दवः ।
भिन्नवर्णस्तथा चैकः सुस्निग्धश्चातिवर्णतः ॥

(तृतीयो विधि)

शार्ङ्गधरोऽपि —

कालकूटो वत्सनाभः शृङ्गोकश्च१ प्रदीपनः२ ।

---

१ शृङ्गकं शृङ्गिकंवा, २ प्रदीपकः, करवीरकम्, चणात्, इति च पाठान्तरं शार्ङ्गधरसंहितायाम् ।

हालाहलो ब्रह्मपुत्रो हारिद्रः सक्तुकस्तथा ॥१७९॥
सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव।
अर्कसेहुण्डधत्तूरलाङ्गलीकरवीरकाः३ ॥१८०॥
गुञ्जाहिफेनावित्येताः सप्तोपविषजातयः।
एतैर्विमर्दितः सूतश्छिन्नपक्षः प्रजायते ॥१८१॥
मुखं च जायते तस्य धातूंश्च ग्रसतेतराम्४।

प्र०—शार्ङ्गधरमतेन पारदस्य मुखकरणमाह–काटकूटेति–काटकूटादयोऽमी नवविषभेदाः प्रोक्ताः अर्कदुग्धादयश्चैताः सप्त उपविषजातयः=उपविषाः प्रोक्ताः एभिः षोडशांशमितैर्विषैरुपविषैश्च विमर्दितः सूतः पारदश्छिन्नपक्षः प्रजायते, इत्थं च तस्य-पारदस्य मुखं जायते, सः पारदो धातूंश्च=सुवर्णादिधातूंश्च ग्रसतेतराम्, सुवर्णादिधातून् शीघ्रमेवग्रसते, इत्यर्थः। अत्रानुष्टुप्छन्दः॥ ७९-१८१॥

ज्ञातव्यम्—एषविधिः शार्ङ्गधरसंहितायामध्यमखण्डात् (अ० १२-१८-२०) उद्धृतो माधवेन।

शार्ङ्गधरसंहिता में वर्णित—तीसरी विधि।

१ कालकूट, २ वत्सनाभ (Aconite एकोनाइट) ३ सींगिया, ४ प्रदीपन, ५ हलाहल, ६ ब्रह्मपुत्र, ७ हारिद्र, ८ सक्तक, ९ सौराष्ट्रिक यह विष के नौ भेद हैं और १ आक का दूध, २ थूहर का दूध, ३ धतूरा, ४ कलिहारी, ५ कन्नेर, ६ गुंजा (घुंघची) ७ अफीम। यह सात उपविष की जाति मानी गई हैं, पारद का सोलहवां (१/१६) भाग विष तथा उप-

विष अलग-अलग लेकर, उसके साथ अलग २ सात-सात दिन घोटने से पारद छिन्नपक्ष होजाता है अर्थात् उसका अग्नि पर से उड़ने का स्वभाव दूर होजाता है और वह मुख सहित होजाता है, अर्थात् उसका मुखकरण होजाता है, जिससे वह शीघ्र ही सुवर्ण आदि धातुओं का भक्षण करने लगता है ॥१७६-१८१॥

ज्ञातव्य—माधव ने यह विधि शार्ङ्गधर संहिता के मध्यमखण्ड (अ० १२ १८।२०) से उद्धृत की है।

आजकल कालकूट आदि विष अप्राप्य हैं, केवल मीठा तेलिया, सींगिया तथा उपविष ही बाज़ार में प्राप्त होते हैं। इसलिये इनमें ही पारद को सात-सात दिन घोट कर दो पहर (६ घण्टे) की अग्नि देकर पारद का ऊर्ध्वपातन कर लेना चाहिये, यदि दो पहर में सब पारद न उड़ सके, तो फिर दुबारा ऊर्ध्वपातन से पारद को उड़ा लेना चाहिये पारद का ऊर्ध्वपातन करते समय ऊपर की हाँडी के ऊपर के पृष्ठ-भाग को पानी से भिगो कर शीतल अवश्य करते रहना चाहिये, जिससे पारद उड़ कर ऊपर की हांडी में जमता रहे।

विष तथा उपविषों में पारद को सात दिन घोटना चाहिये, इसका वर्णन अन्य रसग्रन्थों में भी मिलता है। यथा—

विषोपविषकैर्मद्यः प्रत्येकं दिनसप्तकम्।
तेनास्य जायते वह्निः पक्षच्छेदो मुखं तथा॥

इन विष तथा उपविषों के मर्दन करने से पारद की तीव्र निर्गन्ध मूर्च्छना होती है, योगियों को पहाड़ों पर काल-

कूट आदि विष मिल सकते हैं, इसलिये वे ही इस मूर्च्छना का अधिक आदर करते हैं। यथा—

निर्गन्ध मूर्च्छनातु विषाद्यौषधिभिरेकरूपा परमयोगिनां सम्मता। (आयुर्वेदप्रकाश अ० १।१४१)

(अन्यदपि मुखकरणम्–चतुर्थ विधि)

अथवा त्रिकटुक्षारौ१ राजी लवणपञ्चकम् ॥१८२॥
रसोनो नवसारश्च शिग्रुश्चैकत्र चूर्णितैः।
समांशैः पारदादेतै जम्बीरोत्थ२ द्रवेण च ॥१८३॥
३कांजिकैर्निम्बुतोयैर्वा सोष्णखल्वे विमर्दयेत्।
अहोरात्रत्रयेण स्याद्रसे धातुचरं मुखम् ॥१८४॥

वस्तुतस्तु दीपनस्यैवापरपर्यायो मुखकरणमिति न पृथक् संस्कारः, तत्साधकान्यूनत्रिंशतिकर्माणीति नियम भङ्गात् ॥१८५॥

प्र०—शार्ङ्गधर मतेन मुखकरणाय चतुर्थविधिमाह-अथवेति-त्रिकटुः क्षारौ = यवक्षार स्वर्जिकक्षारौ, लवणपञ्चकं, रसोनः = लशुनः नवसारः = नवसादरः, शिग्रुः = शोभाञ्जनः, अथवा पारदात्समांशैः = पारदसमांशैश्चूर्णितैस्त्रिकटुप्रभृतिभिः सह पारदं जम्बीरोत्थद्रवेण = जम्बीरस्वरसेन, काञ्जिकै, निम्बुतोयैः = निम्बुस्वरसैर्वा सोष्णखल्वे = तप्तखल्वेऽहोरात्रत्रयेण विमर्दयेत्. इत्थं रसे = पारदे धातुचरं = सुवर्णादिधातुग्रसनशालिमुखं स्यात्। अत्रानुष्टुप् छन्दः ॥ १८२–१८४ ॥

ज्ञातव्यम् – एषविधिः शाङ्गधरसंहितायाः मध्यमखण्डात् उद्धृतो माधवेन।

दीपन मुखकरणयोः पर्यायत्वं निर्दिशन्नाह–वस्तुतस्त्विति– वस्तुतस्तु = यथार्थस्तु दीपनस्यैव = अष्टमदीपनाख्यसंस्कारस्यैव = अपरपर्यायः = अन्यः पर्यायो मुखकरणमिति हेतोर्दीपनान्नैषः कृपृथ संस्कारः, अन्यथा तत्साधकानि = पारदसाधकानि, ऊनविंशति कर्माणि = संस्कारा इति नियमभङ्गात्–मुखकरणस्य पृथक् संस्कार स्वीकारपक्षे विंशति संख्यास्यात्तेन, ऊनविंशति संस्कार नियमोभङ्गः स्यादित्याशयः ॥ १८५ ॥

ज्ञातव्यम्—धातुग्रसनफलैकत्वाद्दीपन मुखकरणयोः पर्यायत्वमस्ति। यथा प्रोक्तं दीपनसंस्कारलक्षणे—

धातुपाषाणमूलाद्यैः संयुक्तो घटमध्यगः।
ग्रासार्थं त्रिदिनं स्वेदो दीपनं तन्मतं बुधैः॥
(रसेन्द्रचूडामणौ, रसरत्नसमुच्चये, अ० ८।७०) च

शाङ्गधरसंहिता में वर्णित चतुर्थ विधि।

उ०—अथवा सोंठ, काली मिरच, पीपल, यवक्षार (जवाखार), सज्जीखार, सैन्धव आदि पाँच नमक, लहसुन, नौसादर तथा सहजने के बीज, इन सब को पारद के समान भाग लेकर चूर्ण करे, फिर इनके साथ पारद को जम्बीरी के रस, काँजी अथवा नीबू के रस से तप्त खरल में तीन दिन रात तक मर्दन करे, तो पारद में, सुवर्ण आदि धातुओं को भक्षण करने में समर्थ करने वाला मुख हो जाता है अर्थात् पारद का

मुख करण हो जाता है, जिससे वह सुवर्ण आदि धातुओं का भक्षण करने लगता है ॥ १८२-१८४ ॥

ज्ञातव्य—माधव ने यह विधि, शार्ङ्गधरसंहिता के मध्यम खण्ड (अ० १२-२१-२३) से उद्धृत की है।

दीपन तथा मुखकरण की परस्पर पर्यायवाचकता।

वास्तव में दीपन संस्कार का दूसरा पर्याय ही मुखकरण है, अर्थात् यह दोनों परस्पर में पर्यायवाचक हैं, इसलिये यह मुखकरण, दीपन से अलग अन्य कोई संस्कार नहीं है अन्यथा मुखकरण अलग संस्कार मानने पर पारद के साधक उन्नीस संस्कार हैं, यह शास्त्र का नियम भङ्ग हो जाता है। क्योंकि मुखकरण संस्कार मानने पर फिर संस्कारों की संख्या बीस हो जायगी।

ज्ञातव्य—पारद के साधक उन्नीस संस्कार हैं यह प्रारम्भ में ही आयुर्वेदप्रकाश तथा रसेन्द्रचिन्तामणि में बताया गया है। यथा—

(१) ऊनविंशति संस्काराः सूतसिद्धिदा भवन्ति।

(आयुर्वेदप्रकाश अ० १-३७)

(२) एतत्साधकान्यूनविंशतिकर्माणि भवन्ति ॥

(रसेन्द्रचिन्तामणि अ० ३।७)

दीपनसंस्कार तथा मुखकरण का धातु ग्रास करना एक प्रयोजन होने से यह दोनों पर्यायवाचक हैं। यथा—

(१) धातुपाषाणमूलाद्यैः संयुक्तो घटमध्यगः ।
ग्रासार्थं त्रिदिन स्वेदो दीपनं तन्मतं बुधैः ॥

(रसेन्द्रचिन्तामणि तथा रसरत्नसमुच्चय (अ० ८-७०)

(२) स्वेदनाद्दीपितो देवि ? ग्रासार्थी जायते रसः ।

(रसार्णव)

रस प्रकाशसुधाकर में दीपन के मुखोत्पादन (मुखकरण) तथा यातुधानमुख (राक्षस मुख) यह दो प्रकार माने हैं । यथा—

मुखोत्पादनकं कर्म प्रकारो दीपनस्य हि ॥७१॥
यातुधानमुखं सम्यक् यात्येव हि न संशयः ।
द्वितीयो दीपनस्यैवं प्रकारः कथितो मया ॥७७॥

(रसप्रकाशसुधाकर अ० १)

(गन्धकजारणा)

अथैवं संशुद्धरसे आदौ गन्धकजारणा ।

(अजारितगन्धकस्यपारदस्य मारणे दोषः)

शिवागमे—

*अजीर्णमथ चार्वजं सूतकं यस्तु घातयेत् ।
ब्रह्महा स दुराचारी ममद्रोही महेश्वरि ? ॥१८६॥

* 'अथाजीर्णमबीजं च' इति पाठांतरं रसमञ्जर्यामुद्धृते श्लोके ।

प्र—अथवं पूर्वोक्त निर्दिष्टविधानैः संशुद्धरसे = संशुद्ध पारदे, आदौ गन्धक जारणा कार्येति शेषः । अजारितगन्धकस्य पारदस्य मारणे शिवागमनिर्दिष्टं दोषमाह—अजीर्णेति-हे महेश्वरि ? हे पार्वति ? यः = रसवैद्यः, अजीर्णं = अजारित गन्धकं, अबीजं = शुद्धस्वर्णादिजारणरहितं 'यदुक्त'—शुद्धं स्वर्णञ्च-रूप्यञ्च बीजमित्यभिधीयते' सूतकं = पारदं घातयेत् = मारयेत् स ब्रह्महा = ब्रह्मघातको दुराचारी ममद्रोही चास्ति। अत्रानुष्टुप् छन्दः ॥ १८६ ॥

ज्ञातव्यम्–श्लोकोऽयं रसमञ्जर्या द्वितीयाध्यात् (श्लोक १) उद्धृतो माधवेन।

गन्धक का जारण।

उ०—इस प्रकार से शुद्ध हुये पारद में गन्धक का जारण करना चाहिये।

शिवागम में वर्णित गन्धक जारण रहित पारद के मारण में दोष।

हे पार्वती ! जो रसवैद्य, गन्धक तथा बीज रूप स्वर्ण आदि का जारण किये बिना ही पारद का मारण करता है, वह ब्रह्मघातक, दुराचारी तथा मेरा द्रोही है ॥ १८६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसमञ्जरी (अ० २।१) उद्धृत किया है।

कज्जली एक कर्ष (१ तोला) और शुद्ध हरिताल एक कर्ष (१ तो०) ले तथा उसमें शुद्ध गन्धक दो कर्ष (२ तो०) मिला, कर और फिर घोटकर कज्जली करे। सुहागा आदि सम्पूर्ण द्रव्यों से बनाये हुये इस सिद्ध चूर्ण कल्क को, शुद्ध स्वर्ण और चाँदी एक पल (४ तो०) के साथ मिला, पुट द्वारा पकाकर गन्धक के साथ पुट देकर मारे। इस प्रकार चौदह पुट देने से वीर-बहूटी (वर्षा ऋतु में होने वाला लाल रङ्ग का कीड़ा, यह युक्तप्रान्त के अलीगढ़ आदि ज़िलों में 'रामजी की गुड़िया' और मारवाड़ में 'तीज' नाम से प्रसिद्ध है) के समान अत्यन्त लाल वर्ण (रङ्ग) का हो जाता है। इस सिद्धमत में निर्दिष्ट चूर्ण कल्क का चाँदी के पत्रों (पत्तों) पर तीन बार लेप कर, लघु पुट देने से सूर्य के समान चमकीली कान्ति आ जाती है अर्थात् वह चाँदी सुवर्ण (सोना) बन जाती है ॥३३९॥

संकेत—इस सिद्धमत में निर्दिष्ट चूर्णकल्क में, कर्ष शब्द का बहुवचन (कर्षाः) में निर्देश होने से सुहागा, कज्जली और हरिताल को एक एक कर्ष मिला कर, तीन कर्ष लेना चाहिये और इस चूर्ण कल्क का चांदी के पत्रों पर तीन बार लेप करना चाहिये ॥ ३४० ॥

ज्ञातव्य—माधव ने यह सिद्धमत में निर्दिष्ट चूर्णकल्क, रसेन्द्रचिन्तामणि (अ० ३।१७७-१७८) से उद्धृत किया है। रसकामधेनु (७८ पृष्ठ) में भी उद्धृत हुआ मिलता है।

रसेन्द्रचिन्तामणि में इसके आगे निम्नलिखित दो अन्य प्रकार भी दिये हैं।

(१) तुल्यं तारं ताम्रमादाय स्वच्छं,
तावत्तप्तं गन्धचूर्णं कुनट्याम् ।

न्यस्तं यावज्जीर्यते खण्डशोऽथ,
प्राज्यैर्गन्धैः पाचयेत्काचकूप्याम् ॥
खण्डाकारं तादृशं टङ्कणेन,
स्वर्णान्तःस्थं भस्ममूषान्तराले।
ध्मातं ध्मातं स्यात्सुवर्णं सतारं,
हीने वर्णे रञ्जयेन्माक्षिकेण ॥

व्याख्या—समानभाग शुद्ध चाँदी और ताँबा को लेकर अग्नि पर तपा तपा कर, शुद्ध गन्धक और मैनशिल के चूर्ण में तब तक डालता जाय, जब तक कि वह टुकड़े होकर जीर्ण न हो जाय। फिर आतशीशीशी में अधिकमात्रा में लिये गये गन्धक के साथ पकावे, फिर उन टुकड़ों (कणों) को पिघलाये गये सुवर्ण (सोना) में डाल कर, भस्ममूषा में रख, सुहागा डाल कर भली भांति अग्नि से तपावे ऐसा करने से चाँदी सहित तांबा, सुवर्ण हो जाता है, यदि सुवर्ण का रंग हीन (निकृष्ट) हो, तो फिर सोनामाखी से रञ्जन किया करे (रंग दे)।

इसप्रकार में आई हुई भस्ममूषा का लक्षण, निम्न लिखित है—

तिलभस्म द्विभागं स्यादेकांशा च तथेष्टिका।
तत्कृतां भस्ममूषैका तारसंशोधने हिता ॥

(२) तालताम्रशिलागन्धसंयुतं दरदं यदि।
कूपिकायां मुहुःपक्वं द्रवकारि तदामतम् ॥

व्याख्या—शुद्ध हरिताल, तांबा, मैनसिल और गन्धक के साथ शुद्ध हिङ्गुल को, आतशीशीशी में बालुकायंत्र से बार-बार, पकावे तो वह पिघलाने वाला हो जाता है।

विशेष ज्ञातव्य—रसेन्द्रचिन्तामणि के तृतीय अध्याय के अन्त में, पारद के संस्कारों का वर्णन करने के पश्चात्, (अ० ३-२२६) सिद्धमत से पारदजारण की विधि, निम्नलिखित प्रकार से और अधिक लिखी है—

क्षारक्षोणीरुहाणां विधिवदवहिताः क्षारमाकल्पयध्वं
कासीसस्वर्जिकाभ्यां पटुचयनरसारक्षपापक्षिटङ्कैः।
कूपीभिः पातयध्वं बहुबहलयवक्षारमम्भो हि कल्प्यं
तस्मिन्नाधत्त धीराः ! सकवलमगजावल्लभं जारणाय॥

व्याख्या—सिद्धमतेन पारदस्य जारणविधिमाह—क्षारेति—क्षारक्षोणीरुहाणां = क्षारनिर्माणार्थमुपयुज्यमाना ये क्षोणीरुहाः = मुष्ककतिलापामार्गप्रभृतयस्तेषां, विधिवत् = क्षारनिर्माणविधिपूर्वकं, क्षारम्, अवहिताः सावधानमनस्काः सन्तः, आकल्पयध्वं = रचयत यूयमिति शेषः। तदनु तं क्षारं कासीसस्वर्जिकाभ्यां तथा पटुचयनरसारक्षपापक्षिटङ्कैः = पटुचयेन = सैन्धवादिलवणपञ्चकेन, नरसारेण = नवसादरेण, क्षपया = हरिद्रया, पक्षिणः = कुक्कुटादयस्तेषां शकृद् ग्राह्यं, तदुक्तं वाग्भटेन रसरत्नसमुच्चये "निर्वाप्य पिष्ट्वा तेनैव प्रतिवापं विनिक्षिपेत्। श्लक्ष्णं शकृद्दक्षिशिखिगृध्रकङ्क कपोतजम्" कुक्कुटादिपक्षिशकृता, टङ्कणेन च मिश्रयित्वा, बहुलयवक्षारमम्भः = बहुनोऽधिको यवक्षारो यस्मिँस्तादृशं तदीयमम्भः = पानीयक्षारः, कल्प्यं = रचनीयम्। तमिमं क्षारं कूपीभिः काचपात्रैर्न तु लौहादिधातुपात्रैः, तदीयमलेन तीक्ष्णस्यास्य मालिन्यभयात्, बहु = न्यूनतोऽपिन्यूनं सप्तधा पातयध्वं = परिस्रावयत। तदनन्तरं हे धीराः धैर्यधरा वैद्याः ! तस्मिन् = क्षारजले, सकवलं = सुवर्णादिग्राससयुक्तम्, अगजावल्लभं = पार्वतीप्रियं पारदमित्यर्थः, जारणाय आधत्त = स्थापयत।

अर्थात्—हे धैर्यधर वैद्यबन्धुओ ? आप, पहिले मुष्कक (घण्टापाढल) तिल तथा अपामार्ग आदि का, विधि पूर्वक क्षार बनाओ, फिर उस क्षार को, हीराकसीस, सज्जीखार, सैन्धव आदि पाँचनमक, नौसादर, हल्दी, मुर्ग़, मोर, तथा गृध्र आदि पक्षियों की बीट (विष्ठा) और सुहागा के साथ मिला कर, अधिक यवक्षार (जवाखार) डाल कर पानीयक्षार बना कर काच की शीशी आदि बर्तन में रखें, (लौह आदि धातु के बर्तन में न रखे क्योंकि धातु के बर्तन में यह ख़राब हो जायगा), तथा कम से कम सात बार कपड़े में छानें और फिर उसी पानीयक्षार से सुवर्णादिग्रासयुक्त पारद को जारण करने के लिये स्थापित करें।

अथरसचिन्तामणौ—

(अथ राजवर्ती विद्या)

चत्वारः स्वर्जिकाभागा यवक्षारस्तथा पुनः।
१सौभाग्यं च ततः कृत्वा श्वेताभ्रं चूर्णितं द्वयम् ॥३४१
शिलाद्वयं च भवेत्तत्र हरितालं चतुष्टयम्।
क्षारिकालवणं दद्यात्तत्तथाविधमेव च ॥ ३४२ ॥
२काकमाचीरसस्यान्त दीयते सर्वमेव तत्।

---

१ अयं श्लोको मुद्रितायुर्वेदप्रकाशे नास्ति, रसकामधेनावुद्धृते पाठेऽस्ति, तत एवात्रोद्धृतः।

२ 'काकमाचीरसस्यान्ते'।

१शुद्धपित्तलपत्राणि सूक्ष्माणि पलयोर्द्वयोः ॥ ३४३ ॥
तप्ततप्तानि तान्यस्मिन् काकमाचीरसे क्षिपेत् ।
एकविंशतिवाराणि २तारतां प्रतियान्ति च ॥ ३४४ ॥
एवं शुभ्राणि जायन्ते रूप्यान्यूनानि किञ्चन ।
आरं तारं समं कृत्वा मृतवङ्गं नियोजयेत् ॥ ३४५ ॥
एकादशविधानेन भवेत्तारं ५ न संशयः ।
एषा राजवती विद्या पुत्रस्यापि न कथ्यते ॥ ३४६ ॥

इति राजवती विद्या ॥

——:❀:——

प्र०—राजवती विद्यामाह—चत्वार इति—स्वर्जिकायाः ४ भागाः तथा पुनः यवक्षारस्य ४ भागाः, सौभाग्यस्य=टङ्कणस्य ४ भागा, ततः श्वेताभ्रस्य २ भागौः मनःशिलाया २ भागौ, हरितालस्य ४ भागाः, क्षारिकलवणस्य ४ भागाः एतत्सर्वमेव काकमाचीरसत्यन्तर्दीयते, तदनन्तरं वह्नौ तप्ततप्तानिपलद्वयमितानि सूक्ष्माणि शुद्धपित्तलपत्राणि काकमाचीरसे क्षिपेत्, इत्थमेकविंशतिवाराणि वह्नौ मन्तप्य काकमाचीरसे प्रक्षेपेण तारतां=रजतत्वं

---

१ 'नष्टपित्तलपत्राणि क्रान्तुदराणि वै पलम् । तप्तं तप्तं दद्यात्तस्मिन् काकमाचीरसे भृशम्'।

२ 'वह्नौ देयानि चात्र च' ३ 'निरामयम्' इति पाठान्तरं रसकामधेनावुद्धृते पाठे।

प्रतियान्ति गच्छन्ति एवं तानि पित्तलपत्राणि रूप्यान्यूनानि रजत-सदृशानि शुभ्राणि जायन्ते, आरं = पित्तल, तारं = रजतं च समं कृत्वा = समानभागं गृहीत्वा, तत्र मृतवङ्गं नियोजयेत् एवमेकादश विधानेन, तार = रजतं भवेत्, इत्यत्र संशयो नास्ति, एषा राजवती विद्या = एतद् रजतकरणविज्ञानं पुत्रस्यापि न कथ्यते ॥ अत्रानुष्टुप्छन्दः ॥ ३४१-३४६ ॥

राजवती विद्या (चाँदी निर्माण करने की विद्या)

उ०—सज्जीखार ४ भाग, जवाखार (यवक्षार) ४ भाग, सुहागा ४ भाग, सफ़ेद अभ्रक का चूर्ण २ भाग, मैनसिल २ भाग, हरिताल ४ भाग, खारीनमक ४ भाग, इन सब का चूर्ण कर मकोय के रस में डालदे, फिर २ पल (२ भाग) शुद्ध पीतल के पत्र अग्नि में तपा कर मकोय के रस में बुझावे, इस प्रकार इक्कीस बार अग्नि में तपा तपा कर मकोय के रस में बुझाने से, वह पीतल के पत्र चाँदी बन जाते हैं, यह असली चाँदी के समान ही सफेद होते हैं। शुद्ध पीतल और चाँदी समान भागलेकर, उनमें बङ्ग भस्म मिलादे, इस प्रकार ग्यारह बार के प्रयोग से चाँदी बन जाती है, यह चाँदी बनाने की (राजवती) विद्या पिता, अपने पुत्र को भी नहीं बतलाता है ॥ ३४१-३४६) ॥

ज्ञातव्य-माधव ने यह राजवती विद्या 'रसेन्द्रचिंतामणि' ग्रन्थ से उद्धृत की है, रसकामधेनु (१८७ पृष्ठ) में भी उद्धृत की गई है ॥ ३४१-३४६ ॥

(राजवती विद्या समाप्त)

(अथ हेमवती विद्या)

(प्रथमः प्रकारः)

पारदष्टङ्क एकःस्याद्द्विपलं पीतखर्परम् ।
मर्दयेत्सुदृढं तावद्रसो यावद्विलीयते ॥ ३४७ ॥

पुनर्जम्बीरनीरेण गुडेन च समन्वितम् ।
शोषयेच्चातपे पिष्ट्वा श्लक्ष्णं कृत्वा च धार्यते ३४८

अर्कदुग्धस्य दातव्या भावनास्ता यथा तथा ।
अस्य कल्कस्य सिद्धस्य भाग एकश्च टङ्कणः॥३४९॥

ताम्रं भागत्रयं दत्वा ध्माप्यतामन्धमूषया ।
सुवर्णं दिव्यतेजः स्यात्कुंकुमाददतिरिच्यते ॥३५०॥

इति हेमवतीविद्या ॥

प्र०—हेमवतीविद्यायाः प्रथमप्रकारमाह—पारद इति—पारदः = संस्कृतपारदः, एको टङ्कः = शाणः स्यात्, पीतखर्परं = मृत्तिकाखर्परं, दर्दुरखर्परमित्यर्थः तदुक्तं रसार्णवे-"पीतस्तु मृत्तिकाकारो मृत्तिकारसको वरः" द्विपलं = पलद्वयं च स्यात्, एतद्द्वयं खल्वे तावत्सुदृढं यथास्यात्तथा मर्दयेद् यावद्रसः = पारदो विलीयते, स्वीयं पूर्वरूपं परित्यज्य खर्परेण सह मिश्रितो भवेत्, पुनर्गुडेन समन्वितं तं जम्बीरनीरेण = जम्बीरस्वरसेन विमर्द्य, आतपे = घर्मे शोषयेत्, श्लक्ष्णं कृत्वा च धार्यते तदनन्तरमर्कदुग्धस्य ता भावना यथातथा = यथावश्यकं दातव्या, इत्थं सिद्धस्यास्य

कल्कस्यैको भागः. टङ्कणश्चैको भागः, ताम्रं = शुद्धताम्रं च भाग-त्रयं दत्वा, अन्धमूषया ध्याप्यताम्, एवं निष्पन्नं दिव्यतेजः सुवर्णं कुंकुमादतिरिच्यते = निजभास्वरपीतवर्णेन कुंकुमप्यतिशेते ॥अत्रा-नुष्टप् छन्दः ॥ ३४८-३५० ॥

हेमवती विद्या (स्वर्णनिर्माण करने की विद्या)

प्रथम प्रकार ।

उ०—संस्कृत पारद १ टङ्क (आधुनिक ३ माशा), तथा पीला मृत्तिकाखर्पर (दर्दुरखर्पर) दो पल (८ तोला), लेकर खरल में डालकर दृढ़ता (मज़बूती) से इतना घोटे, कि पारद अपना पहिला रूप छोड़कर, खर्पर के साथ मिलजाय, फिर गुड़ मिला जम्बीरी के रस से घोटकर, कुछ देर तक धूप में सुखावे, जिससे वह और कोमल ही रहे । फिर आव-श्यकतानुसार आक के दूध की भावनायें दे, इस प्रकार बना हुआ कल्क एक भाग, सुहागा एक भाग, तथा शुद्ध ताँबा तीन भाग मिलाकर, अन्धमूषा में रखकर अग्नि में पकावे, इस भांति से बना हुआ उत्तम चमकीला तथा प्रकाशमान पीले रङ्ग का स्वर्ण, चमक में केसर से भी अधिक श्रेष्ठ होता है ॥३५०॥

ज्ञातव्य—माधव ने यह ' हेमवती विद्या ' रसचिन्ता-मणि ग्रन्थ से उद्धृत की है ।

पीतखर्पर ।

स्वर्णनिर्माण के इस प्रथम प्रकार में ' पीतखर्पर ' डालने का निर्देश है, ' रसार्णव ' ग्रन्थ में जो १मृत्तिका, २गुड़,

३ पाषाण भेद से तीन प्रकार का खर्पर (खपरिया) लिखा है, इसमें से पहिला मृत्तिका खर्पर ही यह पीतखर्पर (पीलाखपरिया) है, फिर सत्वपातन तथा औषधि योग में व्यवहार के लिये जो १ दर्दुर तथा २ कारवेल्लक यह दो भेद किये गये हैं, इनमें से दर्दुर खर्पर पीला होता है इसलिये दर्दुर खर्पर यहां लिया जा सकता है क्योंकि यह ही मृत्तिका खर्पर के समान पीला तथा सत्वरूप होता है। यथा—

मृत्तिकागुडपाषाणभेदतो रसकस्त्रिधा ।
पीतस्तु मृत्तिकाकारो मृशिकारसको वरः ।
क्षीयते नापि वह्निस्थः सत्वरूपो महाबलः ।
सदलो दर्दुर इति निर्दलः कारवेल्लकः ।
द्विधैव स पुनः सत्वपातौषध्यादियोगयोः ॥
(रसार्णवे, रसकामधेनौ २६४ पृष्ठे च)

(द्वितीयः प्रकारः)

शाकवृक्षस्य निर्यासं १पलमात्रं समानयेत् ।
२शिग्रुमूलस्य चूर्णं तु तद् रसेन विमर्दयेत् ॥३५१॥

---

१ 'पत्रे तस्य च गालयेत्' इति पाठान्तरं रसकामधेनौ ।

२ एष युक्तियुक्तः पाठोऽस्माभी रसकामधेनुतउद्धृतः आयुर्वेदीयग्रन्थमालायां मुद्रितायुर्वेदप्रकाशे तु 'शिग्रुबीजस्यचूर्णस्य रसेन परिमर्दयेत्' इति पाठो विद्यते ।

१पलमात्रं च शुल्वस्य पत्रं सूक्ष्मं निधापयेत् ।
बहुशो लेपितं कृत्वा घर्मं दत्वा पुनः पुनः॥३५२॥
पश्चात्तद् ध्माप्यते पत्रं शुल्वं हेम प्रजायते ।
॥ इति हेमवती विद्या ॥

प्र०—द्वितीयं प्रकारमाह—शाकवृक्षस्येति—शाकवृक्षस्य निर्यासं = पत्ररसं पलमात्रं = पलमितं समानयेत् स्वर्णनिर्माणे शाकवृक्षस्य रस एव प्रयुज्यते यथाऽन्यस्मिन् विधावपि शाकवृक्षस्य देवेशि ? निष्पीडय रसमुत्तमम् ' (रसकामधेन ४०२ पृष्ठे) तद्रसेन = तेन रसेन सह शिग्रु मूलस्य चूर्णं विमर्दयेत् = विमर्द्य कल्कं कुर्यात्, तदनन्तरं शुल्वस्य = शुद्धताम्रस्य पलमात्रं = पलमितं सूक्ष्मं पत्रं निधापयेत्, तत्सूक्ष्मं पत्रं पूर्वनिर्दिष्टेन कल्केन बहुशः = अनेकवारं लेपितं कृत्वा पुनः पुनः = वारं बार घर्मम् = आतपं दत्वा, आतपे शुष्कीकृत्येत्यर्थः, पश्चाद्ध्माप्यते, पुटे विपच्यते, इत्थं ध्मापितं तच्छुल्वं पत्रं तत्पलमितं ताम्रपत्रं, हेम = सुवर्णं प्रजायते । अत्रानुष्टप्छन्दः ॥ ३५१–३५२ ॥

द्वितीय प्रकार ।

उ०—शाकवृक्ष (Take tree) के पत्तों का रस एक पल (४ चार तोला) ले, और उसके साथ सँहजने की जड़ के चूर्ण को पीस कर कल्क बनावे, फिर एकपल शुद्ध तांबे के सूक्ष्मपत्रों (ताम्रपत्रों) पर, अनेक बार उस कल्क

१ ' विलिप्य शुल्वपत्राणि पुटे क्षिप्त्वा विपाचयेत् । तद्द्रुतं काञ्चनं दिव्यं भवेल्लक्षणसंयुतम् । इति पाठान्तरं रसकामधेनौ ।

का लेप कर, बार बार धूप में सुखावे और फिर पुट में रख कर अग्नि से पकावे, तो वह तांबे के पत्र, स्वर्ण बन जाते हैं ॥ ॥ ३५१—३५२ ॥

ज्ञातव्य—माधव ने यह द्वितीय प्रकार, रसचिन्तामणि से उद्धृत किया है, रसकामधेनु (४०३ पृष्ठ) ग्रन्थ में भी यह द्वितीय प्रकार मिलता है।

(तृतीयः प्रकारः)

पारदः सीसको गन्धः कुनटी तच्चतुष्टयम् ॥३५३॥
बीजपूराम्भसा पिष्ट्वा गाढं दिनचतुष्टयम् ।
अथ सूक्ष्माणि पत्राणि तानि तारस्य लेपयेत् ॥३५४॥
बीजपूररसेनैतान्यतिमात्रेण तावता ।
एकाधिका भवेत्पत्र भावना चात्र विंशतिः ॥३५५॥
त्रिशोष्यावर्त्तयेत्तारं भवेत्तारस्य काञ्चनम् ।

॥ इति हेमवती विद्या ॥

प्र०—तृतीयं प्रकारमाह—पारद इति—पारदः, सीसकः = शुद्धनागः, गन्धः = शुद्धगन्धक, कुनटी = शुद्धमनःशिला एतच्चतुष्टयं समभागं गृहीत्वा बीजपूराम्भसा = निम्बुस्वरसेन गाढं यथा-स्यात्तथा दिनचतुष्टयं खल्वे पिष्ट्वा = कल्कं विधाय, अथ = पेषणानन्तरं तेन कल्केन तारस्य = रजतस्य तानि सूक्ष्माणि पत्राणि लेपयेत् । तदनन्तरमतिमात्रेण अत्यधिकेन तावता बीजपूररसेन = निम्बुरसेन, एतानि तारपत्राणि भावयेत अत्र एकाधिकाविंशति

भावना प्रदेया भवेत् विंशत्याद्याः सदैकत्वे' इत्येकवचनम् , एकविंशतिसंख्याका भावनाः प्रदेयाः स्युरित्यर्थः, भावनानन्तरं चातपे विशोष्य, तारं = रजतं, आवर्तयेत् = अग्नौ द्रावयेत् , एवं तारस्य = रजतस्य, काञ्चनं = स्वर्णं भवेत् । अत्रानुष्टप्छन्दः ॥ ३५३ – ३५५ ॥

तृतीय प्रकार ।

उ०—संस्कृत पारद, शुद्ध नाग (सीसा), शुद्ध गन्धक और शुद्ध मैनसिल, इन चारों को समान भाग लेकर, बिजौरा नीबू के रससे, दृढ़ता (मज़बूती) से चार दिन तक खरल में घोटकर कल्क बनावे और उस कल्क का चाँदी के सूक्ष्म पत्रों पर लेप करे, फिर बिजौरा नीबू का बहुत रस निकाल कर उससे उन चांदी के पत्रों को भावना दे, ऐसे ही इक्कीस भावना देकर धूप में सुखाकर अग्नि पर पिघलावे, इस प्रकार उस चाँदी का स्वर्ण बन जाता है । ३५३—३५५ ॥

ज्ञातव्य—माधव ने यह तृतीय प्रकार, रसचिन्तामणि से उद्धृत किया है ।

(चतुर्थः प्रकारः)

१पारदो दरदो हेममाक्षिको गन्धकः शिला ॥ ३५६॥
एतानि समभागानि काकमाचीरसेन च ।

---

१ पारदं दरदं हेममाक्षिकं गन्धकं शिलाम् । इति च पाठान्तरं रसकामधेनौ ।

१मर्दनीयानि गाढानि कारितव्यानि खल्वके॥३५७॥
पीतपित्तलपत्राणि कृतसूक्ष्माणि २तान्यथ ।
३लेपितव्यानि चैतेन ४कल्केनाथ प्रयत्नतः ॥३५८॥
मध्यमस्तु पुटो देयः क्रियते चूर्णमुत्तमम् ।
पुनस्तारस्य भागैकं ५चूर्णं भागद्वयं भवेत् ॥३५९॥
अथ ऊर्ध्वमिदं दत्वा ध्मायते चैकतः कृतम् ।
भल्लाततैलमध्ये हि६ क्षिप्यते गालितं७ च तत्॥३६०
एवं वारद्वयं तारं तत्तैले८ विनिवेशयेत् ।
पिञ्जराभं भवेत्तारं समं ९हेमापि मेलयेत् ॥३६१॥
जायते कनकं१० रम्यं वर्णयुग्मं विहाय तत् ।

॥ इति हेमवती विद्या ॥

प्र०—चतुर्थं प्रकारमाह—पारद इति—पारदः = संस्कृत पारदः, दरदः = हिङ्गुलः, हेममाक्षिकः = स्वर्णमाक्षिकः, गन्धकः,

---

१ मर्दयेत्तानि गाढानि कर्त्तव्यानि सुखल्वके। २ तानि च ।३ लेपनीयानि इति च पाठान्तरं रसकामधेनौ ।

४ अयं युक्तियुक्तः पाठो रसकामधेनौ,मुम्बय्यां मुद्रितायुर्वेद प्रकाशे तु 'चूर्णेनाथ' इत्यसङ्गतः पाठः ।

५ 'चूर्णं भागद्वयं'। ६ तन्। ७ गाल्यते। ८ 'तैले च' ९ 'हेम्नाऽथ'। १० 'काञ्चनं इति च पाठान्तरं रसकामधेनौ।

शिला = मनः शिला, एतानि समभागानि गृहीत्वा काकमाचीरसेन खल्वे गाढानि मर्दनीयानि कारितव्यानि, एतेषां कल्कः कर्त्तव्य इत्यर्थः, अथ = कल्ककरणानन्तरं कृतसूक्ष्माणि तानि पित्तल-पत्राणि, एतेन – उपरिनिर्दिष्टेन कल्केन प्रयत्नतो लेपितव्यानि, घर्मे विशोष्य मध्यमः पुटो देयः, इत्थमुत्तमं चूर्णं क्रियते, पुनस्तारस्य = रजतस्य भागैकं = एकोभागः, चूर्णं = पूर्ववर्णितं चूर्णं च भागद्वयं ग्राह्यं भवेत्, इदं चूर्णमधउर्ध्वं मध्ये च रजतं दत्वा एकत्रः कृतम् एकस्मिन् पुटे निधाय ध्माप्यते = विपच्यते, तदनन्तरमेतद्भल्लात तैलमध्ये = भल्लातकतैलमध्ये क्षिप्यते, गालितं = वस्त्रे गालितं च कार्यम्, एवं तत्तारं वारद्वयं तैले = भल्लातकतैलेविनिवेशयेत तदा तत्तारं पिञ्जराभं = पीतवर्णं भवेत्, समं = समभागं हेम = स्वर्णमप्यस्मिन् मेलयेत् = मिश्रयेत = तत्तारं वर्णयुग्मंविहाय रम्यं मनोहरं, कनकं = स्वर्णं जायते ॥ अत्रानुष्टप्छन्दः ॥ ३५८–३६१ ॥

चतुर्थ प्रकार।

उ०—संस्कृत पारद, शुद्धहिङ्गुल, स्वर्णमाक्षिक (सोनामाखी), गन्धक और मैनसिल को समान भाग लेकर मकोय के रस से खरल में दृढ़ता (मज़बूती) से घोट कर कल्क बनावे तथा इस कल्क का सूक्ष्म पीतल के पत्रों पर लेप करे और धूप में सुखाकर पुट में पकावे, इस प्रकार इसका उत्तम चूर्ण बनता है, फिर चाँदी एक भाग और यह चूर्ण दो भाग ले और इस चूर्ण को आधा नीचे तथा ऊपर और बीच में चांदी रख कर पुट में पकावे फिर इसको भिलावे के तेल में डालकर, कपढ़े में छानले, इस प्रकार उस चांदी को दो बार भिलावे के तैल में डाले, तो वह चाँदी पीले रङ्ग की हो जायगी, अब उसमें पिघला कर समान भाग स्वर्ण मिलादे,

तो यह चाँदी अपने दोनों रङ्ग (पहिले श्वेत और फिर पीले हुये) छोड़कर, मनोहर स्वर्ण बन जायगी। ३५६-३६१ ॥

ज्ञातव्य—माधव ने यह चतुर्थप्रकार, 'रसचिन्तामणि' ग्रन्थ से उद्धृत किया है, रस कामधेनु (१८६ पृष्ठ) में भी यह उद्धृत किया गया है।

हेमवती विद्या (स्वर्णनिर्माण करने की विद्या) समाप्त।

अथ रसबन्धनविद्या (रसगुटिका)

(प्रथमः प्रकारः)

१भूलताशिखरीमूलं वारिणा मर्दयेद्दृढम् ॥३६२॥
२तल्लिम्पेन्मूषिकामध्ये तन्मध्ये निक्षिपेद्रसम्।
३पंचटङ्कप्रमाणं ४तां मूषामङ्गारके क्षिपेत् ॥३६३॥
एवं बद्धो भवेत्सूतो मूषान्तःस्थो दृढो भवेत्।

अस्य फलम्—

मुखमध्यगतस्तिष्ठेन्मुखरोगविनाशनः ॥ ३६४ ॥

१—'भूल्लताशिखरीमूलवारिणा' इति रसकामधेनौ, 'भूलता शीवरीमूलं' इति तु योगरत्नाकरे, 'भल्लातशिखिमूलोत्थ वारिणा' इति च रसरत्नदीपिकायां पाठान्तरं।

२—'मृन्मूषां लेपयेन्मध्ये' इति रसकामधेनौ, 'तन्मूषां लेपयेन्मध्ये' इति रसरत्नदीपिकायां योगरत्नाकरे च पाठान्तरं।

३—'पंचटङ्कप्रमाणं' इति पाठान्तरं योगरत्नाकरे।

४—'तु' इति पाठान्तरं रसकामधेनौ।

शरीरे १क्रामिते सूते जरापलितजिन्नरः ।
स्तम्भयेच्छस्त्रसंघातं कामोत्पादनकारकः ॥३६५॥
पुनर्नवं वपुः २कुर्यात्साधकस्य न संशयः ।
३अतिकामो भवेन्मर्त्यो वलीपलितनाशनः ॥ ३६६॥
क्षुद्बोधो जायतेऽत्यर्थमत्यर्थं पाचयेद् गुरू ।
अत्यर्थं लभते पुष्टिं बलहानिर्न जायते ॥ ३६७ ॥

इति रसबन्धनम् (रसगुटिका) ॥

प्र० - रसबन्धनविद्या (रसगुटिका) माह—भूलतेति—भूलता, शिखरीमूलम = अपामार्गमूलं च गृहीत्वा वारिणा = जलेन दृढं यथास्यात्तथा मर्दयेत् = कल्कं कुर्यात्, तत् = कल्कं मूषिकामध्ये = मूषामध्ये लिम्पेत्, तन्मध्ये = तस्या मूषाया मध्ये, पञ्चटङ्कप्रमाण = पञ्चशाणमितं रसं = संस्कृतपारदं निक्षिपेत् तदनन्तरं मूषामुखं दृढं संमील्य तां मूषामङ्गारके = वंशखदिरादिकाष्ठ सम्भवेऽङ्गारे क्षिपेत्, एवम = इत्थं मूषान्तःस्थः = मूषामध्यस्थः,

---

१—'क्रमते' इति रसरत्नदीपिकायां 'क्रम्यते' इति रसकामधेनौ, क्रमते इति च योगरत्नाकरे पाठान्तरं ।

२—'साधकानां' इति पाठान्तरं योगरत्नाकरे ।

३—'अतिवेगो भवेत्कामो महाबलपराक्रमः' इति पाठांतरं रसरत्नदीपिकायां रसकामधेनौ च । अयं श्लोकार्धो योगरत्नाकरे नास्ति ।

४—अयं श्लोको रसरत्नदीपिकायां रसकामधेनौ, योगरत्नाकरे, मुद्रितायुर्वेदप्रकाशे नास्ति ।

सूतः = पारदे दृढो बद्धश्च = गुटिकारूपः श्च भवेत् ॥ अत्रानुष्टप्-छन्दः ॥ ३६२-३६३ ॥

अस्य गुटिकारूपबद्धपारदस्य फलमाह—मूषेति-मुखमध्यगतः = मुखमध्ये धृतोऽसौ पारदो मुखरोगविनाशनस्तिष्ठेत, अस्मिन् सूते = पारदे, शरीरे क्रामिते सति नरः = मनुष्यो जरापलितजित् = वार्द्धक्यपलितरोगहरः स्यात्, शस्त्रसङ्घातं स्तम्भयेत्, असौ पारदः कामोत्पादनकारकः = रतिशक्तिवर्द्धनोऽस्ति, साधकस्य वपुः = शरीरं, पुनर्नवं = नूतनं कुर्यात, इत्यत्र संशयः = संदेहो नास्ति, अस्य सेवनेन मर्त्यः = मनुष्यः, अतिकामः, वलीपलितनाशनः, अत्यर्थं अत्यन्तं क्षुद्बोधः, जायते, अत्यर्थं गुरु = गुरू भोजनं पाचयेत्, अत्यर्थं पुष्टिं लभते, बलहानिश्च जायते ॥ अत्रानुष्टप्छंदः ॥ ३६७ ॥

रस (पारद) वन्धन विद्या (रसगुटिका) ।

उ०—मूलता, तथा अपामार्ग (औंगा, चिरचिटा) की जड़ को पानी में दृढ़ता से पिसकर कल्क बना कर उस कल्क से मूषा को भीतर से लेप दे, तथा उस मूषा में पाँच टङ्क (आधुनिक १५ माशा) संस्कृतपारद रख, मूषा का मुख बन्द कर मूषा को बांस, खैर आदि की लकड़ी के अंगारों में रख दे, इसप्रकार मूषा में रखा हुआ पारद, दृढ़ बंधकर गोलीरूप हो जाता है ॥ ३६२-३६३ ॥

बद्धपारद अथवा रसगुटिका (पारदगुटिका) का फल ।

यह बंधा हुआ गोलीरूप पारद, मुख में रखने से मुख रोग नाशक होता है, इस पारद के शरीर में प्रवेश करने पर

मनुष्य की वृद्धावस्था (बुढ़ापा) तथा पलित रोग (शिर के बालों का सफ़ेद हो जाना) दूर कर देता है और शस्त्र (हथियार) के आक्रमण को स्तम्भित कर देता है, यह बद्ध पारद, रतिशक्तिवर्द्धक है तथा सेवन करने वाले पुरुष के जीर्ण शरीर को फिर नवीन बना देता है, यह अत्यन्त भूखवर्द्धक गुरु (भारी) भोजन को पचाने वाला तथा पुष्टिकारक है, इससे बल की हानि नहीं होती है ॥ ३६४-३६७ ॥

ज्ञातव्य—माधव ने यह रसबन्धन विद्या (रसगुटिका), रसरत्नदीपिका से उद्धृत की है, परन्तु उसमें इसका नाम 'रसगुटिका' लिखा है, योगरत्नाकर, तथा रसकामधेनु (४०८ तथा ५०३ पृष्ठ) में भी यह मिलती है ।

(द्वितीयः प्रकारः)

अथान्यः प्रकारः—

पुष्पितमनोजमन्दिरमध्ये सूतो नियन्त्रितो युक्त्या ।
बद्धो भवति कियद्भिर्दिवसैः पुष्पप्रभावेण ॥ ३६८ ॥

इति रसबन्धनम् ॥

प्र०—रसबन्धनस्य द्वितीयं प्रकारमाह—पुष्पितेति—पुष्पित मनोज मन्दिरमध्ये = पुष्पितायाः = अरुग्णाया षोडषवार्षिक्या रजस्वलायाः स्त्रियः, मनोजमन्दिरं = योनिः, तन्मध्ये युक्त्या नियन्त्रितः सूतः = पारदः, पुष्पप्रभावेण = आर्तवप्रभावेण कियद्भिर्दिवसैः = त्रिभिर्दिनैर्बद्धो भवति ॥ अत्रार्याछन्दः ॥ ३६८ ॥

रसबन्धन (पारदबन्धन) का द्वितीय प्रकार ।

उ०—सोलह वर्ष की स्वस्थ रजस्वला युवती स्त्री की योनि में, युक्तिपूर्वक पोटली में बांधकर रखा हुआ संस्कृत पारद, आर्त्तव (रज) के प्रभाव से कुछ (तीन) दिन में बँध जाता है ॥ २६८ ॥

ज्ञातव्य-–इस श्लोक में 'कियद्भिः' इस पद के बहु-वचन के निर्देश से तथा स्वस्थ स्त्री के आर्त्तव की प्रवृत्ति भी तीन दिन तक होने के कारण, हमने 'कियद्भिः' के शब्दार्थ 'कुछ' शब्द का अर्थ तीन दिन किया है। आर्त्तव द्वारा पारद बध जाने (पारद बद्ध होने) का वर्णन रसकामधेनु में उद्धृत कक्षापुटी के मत में भी प्रसिद्ध है। यथा—

वसति गिरिगुहायां नैव सिंहो न नागो
न भवति खगराजोऽज्ञातपक्षद्वयेन ।
अरुणकिरणवर्णो दृश्यते चाम्बरस्थः
सकलजनप्रसिद्धस्तेन बद्धो रसेन्द्रः ॥

(रसकामधेनु ४१४-४१५ पृष्ठ)

आर्त्तवमित्यर्थः ।

रसकामधेनुकार ने इस श्लोक के नीचे लिख दिया है कि इसका अर्थ (आर्त्तवमित्यर्थः) आर्त्तव है।

पारदबन्धन समाप्त ।

(पञ्चविंशति रसबन्धाः)

अथान्येऽपि रस बन्धभेदास्ते यथा—

पंचविंशतिसंख्याकान् रसबंधान् प्रचक्ष्महे]

येन येन हि चांचल्यं दुर्ग्रहत्वं विनश्यति ॥३६९॥

प्र०—पञ्चविंशतिसबन्धाना —अथेति–अथान्ये बन्धाः रसबन्धाः सन्ति ते यथा—

पञ्चविंशतीति–वयं तान् पञ्चविंशतिसंख्याकान् रसबंधान् =पारदबन्धान् प्रचक्ष्महे, येन येन रसबन्धेन पारदस्य चाञ्चल्यं =चापल्यं दुर्ग्रहत्वं च विनश्यति ॥अत्रानुष्टप्छन्दः ॥३६९॥

अन्य पच्चीस रसबन्ध (पारदबन्ध)

उ०—ऊपर लिखे गये पारद बन्धन के दो प्रकारों के अतिरिक्त, हम उन पच्चीस रसबन्ध के भेदों (पारद के बांधने वाले प्रकारों) का भी वर्णन करेंगे, जिनमें से प्रत्येक रसबन्ध द्वारा, पारद की चञ्चलता तथा कठिनता से ग्रहण किया जाना दूर हो जाता है ॥ ३६९ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । ६०) से उद्धृत किया है ।

(रसबन्धनामानि)

रसराजस्य सम्प्रोक्तो बन्धनार्थो हि वार्तिकैः ।
हठारोटौ तथाऽऽभासः क्रियाहीनश्च पिष्टिका । ३७०॥
क्षारः खोटश्च १पाटश्च कल्कबन्धश्च २कज्जली ।

❀ 'च नश्यति' इति पाठांतरं रसरत्नसमुच्चये ।

१–पोटश्च, २–कज्जलिः

सजीवश्चैव निर्जीवो निर्बीजश्च सबीजकः ॥३७१॥
शृंखलाद्रुतिबंधौ च १बालश्चैव कुमारकः ।
तरुणश्च तथा वृद्धो २मूर्तिबन्धस्तथाऽपरः ॥३७२॥
जलबंधोऽग्निबन्धश्च सुसंस्कृतकृताभिधः ।
महाबन्धाभिधश्चेति पंचविंशतिरीरिताः ॥३७३॥

प्र०—रसबन्धनामान्याह—रसेति—वार्तिकैः=गुरुपरम्परा प्राप्तज्ञानैराचार्यैः, रसराजस्य=पारदस्य बन्धनार्थः सम्प्रोक्तः। हठबन्धादयः पञ्चविंशतिसख्याका रसबन्धाः सन्ति ॥ अत्रानुष्टप्छन्दः ॥ ३७०—३७३ ॥

पच्चीस रसबन्धों के नाम ।

उ०—गुरुपरम्परा से ज्ञान प्राप्त करने वाले आचार्य वार्तिक कहलाते हैं, उन्होंने पारद को बाँधने के लिये नीचे लिखे पच्चीस (२५) बन्ध बताये हैं—

(१) हठबन्ध (२) आरोटबन्ध (३) आभासबन्ध (४) क्रियाहीनबन्ध (५) पिष्टिकाबन्ध (६) क्षारबन्ध (७) खोटबन्ध (८) पाटबन्ध (९) कल्कबन्ध (१०) कज्जलीबन्ध (११) सजीवबन्ध (१२) निर्जीवबन्ध (१३) निर्बीजबन्ध (१४) सबीजबन्ध (१५) शृङ्खलाबन्ध (१६) द्रुतिबन्ध (१७) बालबन्ध (१८) कुमारबन्ध (१९) तरुणबन्ध (२०) वृद्धबन्ध (२१) मूर्तिबन्ध (२२) जलबन्ध

१—बालकश्च, २—मूर्तिबद्धः इति पाठान्तरं रसरत्नसमुच्चये ।

(२३) अग्निबन्ध (२४) सुसंस्कृतकृतबन्ध (मूर्च्छाकल्प) (२५) महाबन्ध यह पच्चीस रसबन्ध हैं ॥ ३७०-३७३ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । ६०-६३) से उद्धृत किया है।

(षड्विंशो जलौकाबन्धः)

केचिद्वदन्ति षड्विंशो १जलौकाबन्धसंज्ञकः ।
स तावन्नेष्यते देहे स्त्रीणां २द्रावे प्रशस्यते॥३७४॥

प्र०—षड्विंशजलौका बन्धमाह—केचिदिति = केचित् = आचार्याः, षड्विंशो जलौकाबन्धसञ्ज्ञकः = जलौकाबन्धनाम रसबन्धोऽस्तीति वदन्ति । स = जलौकाबन्धस्तावत्, देहे नेष्यते स्त्रीणां द्रावे = रतिकाले द्रावणार्थं प्रशस्यते। अत्रानुष्टुप्छन्दः॥ ३७४

छब्बीसवां जलौकाबन्ध ।

उ० कुछ आचार्य, 'जलौकाबन्ध' नाम का छब्बीसवी रसबन्ध भी मानते हैं, परन्तु देहसिद्धि के लिये उसकी आवश्यकता नहीं है, वह केवल मैथुन किया के समय, स्त्रियों को स्खलित करने के लिये उत्तम माना जाता है ॥ ३७४ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । ६४) से उद्धृत किया है।

---

१ जलूकाबन्ध सञ्ज्ञकः, २ द्रावेऽतिशस्यते इति च पाठान्तरं रसरत्नसमुच्चये ।

(मतान्तरेण रसबन्धाः)

अन्यमते चत्वार एव बन्धाः, ते यथा—

१पाटः खोटो जलौका च २भस्मचापि चतुर्थकम् ।
बन्धश्चतुर्विधो ज्ञेयः३ सूतस्य४ भिषगुत्तमैः ॥३७५॥

प्र०—मतान्तरेण चतुर्बन्धानाह—पाट इति—भिषगुत्तमैः वैद्योत्तमैः, सूतस्य = पारदस्य (१) पाटः (२) खोटः (३) जलौका (४) भस्म इति चतुर्विधो बन्धो ज्ञेयः ॥ अत्रानुष्टप्छन्दः ॥ ३७५ ॥

अन्यमत से चार रसबन्ध (पारदबन्द)

उ०—श्रेष्ठ वैद्यों को, पारद के (१) पाट (२) खोट (३) जलौका (४) भस्म, यह चार बन्ध समझने चाहिये । ॥ ३७५ ॥

ज्ञातव्य—माधव ने यह श्लोक, रससंकेतकलिका (३०१ । १७३) से उद्धृत किया है, रसकामधेनु (पृष्ठ ३१६) में भी यह श्लोक है ।

---

१ 'खोटः पाटः' इति पाठान्तरं रसकामधेनौ ।

२ 'भस्माख्यश्च चतुर्थकः' इति रससंकेतकलिकायां, भस्मत्वं च चतुर्विधम्' इति च रसकामधेनौ पाठान्तरम् ।

३ 'सूते विज्ञेयः' इति पाठान्दरं रससंकेतकलिकायाम् ।

४ 'रसेन्द्रे' इति पाठान्तरं रसकामधेनौ ।

पाट आदि रसबन्ध।

पारद के पाट आदि रसबन्धों के विषय में कई मत मिलते हैं, रसप्रकाशसुधाकर, रससंकेतकलिका में (१) पाट (२) खोट (३) जलौका (४) भस्म, यह चार बन्ध गिनाये गये हैं, आनन्दकन्द (पृष्ठ १७५) तथा रसकामधेनु (पृष्ठ ४७२-४७३) में (१) पाट (२) खोट (३) भस्म (४) धूली (५) कल्क, यह पांच बन्ध गिनाये हैं और इनकी निगड़बन्ध संज्ञा रखी है। रसार्णव में (१) मूर्छित (२) मृत (३) जलौका (४) मूर्तिबन्ध (५) पट्टबन्ध (६) भस्म (७) खोटबन्ध यह सात बन्ध गिनाये है। यथा—

(१) बन्धश्चतुर्विधः प्रोक्तो जलौका खोटपोटकौ।
तथा भस्माभिधः साक्षात्कथितोऽपि रसागमे॥

(रसप्रकाशसुधाकरे, अ० २।२)

(२) खोटा पाटस्तथा भस्म धूली कल्कश्च पञ्चमः।
एते निगडगोलाभ्यां सर्वबन्धफलोदयाः॥
(आनन्दकन्दे १७५ पृष्ठे, रसकामधेनौ ४७२ पृष्ठे च)

(३) खोटादयश्च ये पञ्च ....

(रसकामधेनौ ४७३ पृष्ठे)

(४) मूर्छितो मृतसूतश्च जलौकाबन्ध एव च।
चतुर्थो मूर्तिबन्धस्तु पट्टबन्धश्च पञ्चमः।
भस्मसूतश्च खोटश्च संस्कारात्सप्तधा रसः॥

(रसार्णवे, रसकामधेनौ ३१६ पृष्ठे)

रसरत्नसमुच्चय में हठ आदि २६ रसबन्ध माने हैं उनकी संख्या आयुर्वेदप्रकाश के २७०-२७३ श्लोकों में लिखीजा चुकी है।

(पाटादि बन्धानां लक्षणम्)

पाटः पर्पटिकाबन्धः पिष्टिबन्धस्तु खोटकः।
जलौका पक्वबन्धः स्याद्भस्म भस्मनिभो भवेत् ॥३७६॥

प्र०—पाटादिबन्धानां लक्षणमाह—पाट इति—पारदस्य पर्पटिकाबन्धः रसपर्पटीप्रभृतिपर्पटीबन्धः पाटः = पाटबन्धो भवेत्, पारदस्य पिष्टिबन्धः खोटकः = खोटबन्धो भवेत्, पारदस्य पक्वबन्धो जलौका = जलौकाबन्धो भवेत्, भस्मनिभः = भस्मसदृशः, भस्म = पारदस्य भस्मबन्धो भवेत ॥ अत्रानुष्टुप्छन्दः॥३७६

पाट आदि रसबन्धों का लक्षण।

उ०—पारद तथा गन्धक को पिघला कर, केले के पत्ते पर जमाई गई रसपर्पटी आदि पर्पटी को पाटबन्ध कहते हैं, पारद की पिष्टि (पिट्ठी) को खोटबन्ध कहते हैं, पक्वबन्ध को जलौकाबन्ध कहते हैं और भस्म के समान पारद को भस्मबन्ध कहते हैं, अर्थात् भस्म के समान ही पारद भस्मबन्ध होता है ॥३७६॥

ज्ञातव्य—माधव ने यह श्लोक, रससंकेतकलिका (अ० १।१८) से उद्धृत किया है. रसकामधेनु (पृष्ठ ३१६) में भी यह श्लोक है। रसप्रकाशसुधाकर में यह श्लोक कुछ पाठांतर से मिलता है। यथा—

पक्वबन्धो जलौका स्यात् पिष्टिस्तम्भस्तु खोटकः।
पाटः पर्पटिकाबन्धो भस्म भूतिसमो भवेत्॥

१ पाट—पर्पटी को पाटबंध कहतेहैं। 'पाटबन्ध' के नाम से इसका लक्षण, आगे आयुर्वेदप्रकाश। (अ० १।३८५) में लिखा जायगा।

२ खोट—रसपिष्टि, गन्धकपिष्टि आदि पिष्टिबन्ध को खोटबंध कहते हैं, इसका लक्षण आगे आयु० प्र० (१।३८४) में लिखा जायगा।

३ जलौका-पक्वबन्ध को जलौकाबंध कहतेहैं। इसका वर्णन, आगे (आयु० प्र०, अ० १।४०६-४१० श्लो०) में लिखा जायगा।

४ भस्म—पारद की भस्मावस्था को ही भस्मबन्ध कहते हैं। इसका भेद आगे के ३७७वें श्लोक में लिखा जायगा।

[सूतभस्मभेदाः]

सूतभस्म द्विधाज्ञेयमूर्ध्वगं तलभस्म च।
ऊर्ध्वं सिन्दूरकर्पूररसात्रन्यदधो भवेत्॥ ३७७॥

प्र०—सूत भस्मभेदानाह—सूतभस्मेति—सूतभस्म = पारद भस्म, ऊर्ध्वगम् = ऊर्ध्वस्थं तलभस्म = तलस्थमिति द्विधा ज्ञेयम्। तत्र सिन्दूरकर्पूररसौ = रससिन्दूररसकर्पूराख्यौ रसौ ऊर्ध्वम् = ऊर्ध्वगं भस्म भवेत्, अन्यत् = रससिन्दूररसकर्पूराभ्यामन्यत्, अधः = तलभस्म भवेत्॥ ३७७॥

पारद (सूत) भस्म के भेद ।

उ०—पारद भस्म दो प्रकार की होती है ।

(१) ऊर्ध्वंग—आतशीशीशी के गले में एकत्रित होजाने वाली ।

(२) तलभस्म—आतशीशीशी के तल भाग (पेंदे) में रहने वाली ।

ऊर्ध्वंग—रससिन्दूर तथा रसकर्पूर, ऊर्ध्वग पारद भस्म कहलाते हैं ।

तलभस्म–रससिन्दूर तथा रसकर्पूर, से अन्य तलभस्म या तलस्थ पारदभस्म (तलस्थ रससिन्दूर) कहलाते हैं । ३७७॥

ज्ञातव्य–माधव ने इसश्लोकका पूर्वार्द्ध ,रससंकेतकलिका (उल्लास १ १६) से उद्घृत किया है ।

अथ हठदीनां लक्षणानि—

[१ हठबन्धः]

हठो रसः स विज्ञेयः सम्यक्शुद्धिविवर्जितः ।
स सेवितो नृणां कुर्यान्मृत्युं *व्याधिसमुद्भवम् ॥३७८

प्र०—हठबन्धलक्षणमाह—हठ इति—सम्यक् शुद्धिविवर्जितः = यथाऽर्थतः शुद्धिहीनः स रसः पारदो, हठः=हठबन्ध

---

* वा व्याधिमुद्धतम् इति पाठान्तरं रसरत्नसमुच्चये ।

सञ्ज्ञको 'विज्ञेयः, सेवितश्च सः = पारदो:, नृणां = मनुष्याणां व्याधिसमुद्भवं = रोगजं मृत्युं कुर्यात् ॥ अत्रानुष्टप्छन्दः ॥३७८॥

हठबंध आदि का लक्षण—

१ हठबंध।

उ०—वास्तविक शुद्धिरहित पारद, 'हठबन्ध' कहलाता है, यह अशुद्धपारद, सेवन करने से रोग उत्पन्न कर मनुष्यों को मार देता है ॥ ३७८ ॥ यथा—

अशुद्ध पारद के रोग।

(१) सूतोऽशुद्धतया गुणं न कुरुते कुष्ठाग्निमाद्यं क्रिमीन्।
छर्द्यारोचकजाडयदाहमरणं धत्ते नृणां सेवनात्॥
(योगरत्नाकरे)

(२) अशुद्धसूतो न गुणान् विदध्याद्।
दध्याद्विदाहकृमिकुष्ठरोगान्॥
मन्दत्वमग्नेरुचिं वमिंच।
जाडयं मृति तन्वति सेवितश्चेत्॥
(रसकामधेनौ ३१८ पृष्ठे)

ज्ञातव्य—माधव ने 'हठबन्ध' का यह लक्षण, रसरत्नसमुच्चय (अ० ११।६५) से उद्धृत किया है।

(२ आरोटबन्धः)

सुशोधितो रसः सम्यगारोट इति कथ्यते।

स क्षेत्रीकरणे श्रेष्ठः शनैर्व्याधिविनाशनः ॥३७९॥

प्र०—आरोटबन्धलक्षणमाह—सुशोधित इति—सम्यक् सुशोधितः=स्वेदनमर्दनोर्ध्वपातनविधिना शोधितः, रसः=पारदः आरोटः=आरोटबन्धसञ्ज्ञक इति कथ्यते, सः=आरोटबन्धसंज्ञकः पारदः क्षेत्री करणे श्रेष्ठः यथा च वक्ष्यते४०६-संख्यके श्लोके-"क्षेत्रीकरणाय रसः प्रयुज्यते भूय आरोटः" इति, शनैर्व्याधिविनाशनः=रोगनाशनश्च भवति ॥ अत्रानुष्टप्छन्दः ॥३७६ ॥

२—आरोटबन्ध ।

उ०—स्वेदन मर्दन तथा ऊर्ध्वपातन विधिपूर्वक शुद्ध हुआ पारद ही, आरोटबन्ध कहलाता है, यह पारद क्षेत्रीकरण (रसायन सेवन करने के योग्य शरीर को) करने के लिये उत्तम है, तथा धीरेधीरे रोगों को नाश करने वाला है ॥३७६॥

ज्ञातव्य—माधव ने 'आरोटबन्ध' का यह लक्षण, रसरत्नसमुच्चय (अ० ११। ६६) से उद्धृत किया है।

आरोट ।

स्वेदन मर्दन तथा ऊर्ध्वपातन विधि से शुद्ध हुये पारद को आरोट कहते हैं। यथा—

(१) तदनु च पातन शुद्धं सूतकमारोटमश्नीयात्।
(रसहृदये, रसकामधेनौ ५२८ पृष्ठे च)

(२) आरोटशब्दस्तु शुद्धपर्याय वाचकः।
(आयुर्वेदप्रकाशे २४२ पृष्ठे १६८ सूत्रव्याख्याने)

आरोटसंज्ञक पारद का प्रयोग।

यह आरोट सञ्ज्ञक शुद्धपारद, क्षेत्रीकरण करने तथा व्याधि नाश करने के लिये प्रयुक्त होता है। यथा—

१-(अ) क्षेत्रीकरणाय रसः प्रयुज्यते भूय आरोटः।
(आयुर्वेदप्रकाशे १।५०६, रसेन्द्रचिन्तामणौ, ३। १६१,
रसकामधेनौ ५३० पृष्ठे च)

(आ) इत्यारोटः सूतः क्षेत्रीकरणे प्रयुज्यते प्रथमम्।
(रसहृदये, रसकामधेनौ ५२८ पृष्ठे च)

(इ) आरोटं रसराजं क्षेत्रीकरणार्थमुपयोज्यम्।
(रसहृदये, रसकामधेनौ ५२६ पृष्ठे च)

२-(अ) शुद्धः स्यात्सकलामयौघशमनः।
(योगरत्नाकरे)

(आ) शुद्धः स्मृतः सर्वगदापहर्त्ता।
(रसकामधेनौ ३१८ पृष्ठे)

(३ आभासबन्धः)

पुटितो यो रसो याति योगं १त्यक्त्वा स्वभावताम्।
भावितो २मायुमूलाद्यैराभासो ३गुणवैकृती ॥३८०॥

१—'मुक्त्वा', २—'धातु', ३—'गुणवैकृतेः' इति च पाठान्तरं रसरत्नसमुच्चये।

प्र०—आभासबन्धलक्षणमाह—पुटित इति-यो रसः= पारदः, मायुमूलाद्यैः=पित्तमूलाद्यै र्भावितस्तदनु पुटितः सन् योगं त्यक्त्वा स्वभाववतां याति, अयं गुणवैकृती रसः, आभासः=आभासबन्धो विज्ञेयः ॥ अत्रानुष्टप्छन्दः ॥ ३८० ॥

३ आभासबंध ।

उ०—जो पारद, मयूरके पित्त तथा औषधियों की जड़ आदि के रस से भावना तथा पुट दिया जाने पर, औषधि के गुण के योग को छोड़कर स्वभावता को प्राप्त कर लेता है, वह गुणों की विकृतिवाला पारद, आभासबन्ध कहलाता है ॥ ३८० ॥

ज्ञातव्य—माधव ने आभासबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११ । ६७) से उद्धृत किया है ।

(४ क्रियाहीनबन्धः)

असंशोधितलोहाद्यैः साधितो यो रसोत्तमः ।
क्रियाहीनः स विज्ञेयो विक्रियां यात्यपथ्यतः ॥

प्र०—क्रियाहीनबन्धमाह—असंशोधित इति-यो रसोत्तमः=पारदः, असंशोधितलोहाद्यैः=अशोधितस्वर्णलोहादिधातुभिः साधितः, सः क्रियाहीनः=क्रियाहीनबन्धो विज्ञेयः, अयमपथ्यतो विक्रियां विकृतिं याति । अत्रानुष्टप् छन्दः ॥३८१॥

४ क्रियाहीनबन्ध ।

उ०—अशुद्ध स्वर्ण, लोह आदि धातुओं द्वारा जो पारद साधित होता है, वह क्रियाहीनबन्ध कहलाता है, वह अपथ्य से विकृति को प्राप्त हो जाता है॥ ३८१ ॥

ज्ञातव्य—माधव ने क्रियाहीनबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११ । ६८) से उद्धृत किया है ।

(५- पिष्टिकाबन्धः)

तीव्रातपे गाढतरावमर्दात्पिष्टि र्भवेत्सा नवनीतरूपा ।
ख्यातः स सूतः किल पिष्टिबद्धः सन्दीपनः पाचनकृद्विशेषात्
॥ ३८२ ॥

प्र०—पिष्टिकाबन्धमाह— तीव्रातप इति—तीव्रातपे = तीव्र घर्मे, पारदस्य गाढतरावमर्दात् नवनीतरूपा = नवनीतसदृशा पिष्टि र्भवेत, स सूतः = पारदः पिष्टिबद्ध इति ख्यातः = प्रसिद्धः, किल इति निश्चयेन, अयं विशेषात् सन्दीपनः = जठराग्निवर्द्धनः, पाचनकृत् = पाचनकर्त्ता चास्ति ॥ अत्रेन्द्रवज्रावृत्तम् ॥ ३८२ ॥

५ पिष्टिकाबन्ध ।

उ०—पारद को खरल में डालकर, गन्धक दूध आदि अन्य पदार्थों के साथ तीव्र धूप में घोटने से, उसका जो मक्खन (लोनी) की पिट्ठी के समानस्वरूप होजाता है,

वह पिष्टिबद्ध कहलाता है, यह अधिकतर जठराग्निवर्द्धक तथा पाचन करने वाला है ॥ ३८२ ॥

ज्ञातव्य—माधव ने पिष्टिकाबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११ । ६६) से उद्धृत किया है। यह पिष्टिकाबन्ध ही पिष्टिका, पिष्टी अथवा पिट्ठी कहलाता है, इसके रसपिष्टी, गन्धपिष्टिका, अन्य पिष्टी, तथा पातन पिष्टी (पात्यपिष्टिका) आदि स्वरूप होते हैं। यथा—

(१) रसो द्वादशभागस्तु गुञ्जामात्रं तु गन्धकम्।
मर्दितं घृतवद्धर्मे रसपिष्टीतिकीर्त्यते ॥
(रसकामधेनु पृष्ठ ६४)

(२) भागा द्वादश सूतस्य द्वौभागौ गन्धकस्य च।
मर्दयेद् घृतयोगेन जायते गन्धपिष्टिका ॥
(रसेन्द्रचिन्तामणि ५ । २०)

(३) अर्कांशतुल्याद्रसतोऽथगन्धा-
न्निष्काधंतुल्यात् त्रुटिशोऽभिखल्ले
अर्कातपे तीव्रतरे विमर्द्यात्
पिष्टीभवेत्सा नवनीतरूपा ।

(४) खल्ले विमर्द्य गन्धेन दुग्धेन सह पारदम्
पेषणात्पिष्टतां याति सा पिष्टीति मता परै ॥

(५) चतुर्थांश सुवर्णेन रसेन घृष्टपिष्टिका।
भवेत्पातनपिष्टी सा रसस्योत्तमसिद्धिदा ॥
(रसरत्नसमुच्चय अ० ८ । ७-६)

आयुर्वेदप्रकाश (पृष्ठ १७६) के प्रथम अध्याय के १४१ वें सूत्र में, गन्धकपिष्टी आदि, सगन्धमूर्च्छना के भेद माने गये हैं। वहाँ पर ही इस सूत्र की उद्योत व्याख्या में विशद विवेचन देखिये ।

(६–क्षारबन्धः)

शंखशुक्तिवराटाद्यै र्योऽसौ संसाधितो रसः ।
*क्षारबद्धः परं दीप्तिपुष्टिकृच्छूलनाशनः ॥३८३॥

प्र०—क्षारबन्धमाह—शंखेति-योऽसौ रसः = पारदः, शङ्खशुक्तिवराटाद्यैः संसाधितः, स क्षारबद्धो विज्ञेय इति शेषः, असौ परम् = अत्यर्थं, दीप्तिपुष्टिकृत, शूलनाशनः = परिणामादिशूलनाशनश्च भवति ॥ अत्रानुष्टप्छन्दः ॥ ३८३ ॥

६ क्षारबन्ध ।

उ०—जो पारद, शङ्ख, मोती की सीप तथा कौड़ी आदि से शुद्ध किया जाता है, उसको क्षारबद्ध जानना चाहिये, यह अत्यन्त जठराग्निप्रदीपक, पुष्टिकर तथा परिणाम शूल नाशक है ॥ ३८३ ॥

ज्ञातव्य—माधव ने 'क्षारबन्ध' का यह लक्षण, रसरत्नसमुच्चय (अ० ११ । ७०) से उद्धृत किया है।

---

* 'क्षारबन्धः' इति पाठान्तरं रसरत्नसमुच्चये ।

(७–खोटबन्धः)

१बद्धो यः खोटतां याति ध्मातो ध्मातः क्षयं व्रजेत् ।
२खोटबद्धः स विज्ञेयः शीघ्रं ३सर्वविषापहः ॥३८४॥

प्र०—खोटबन्धमाह—बद्ध इति—यः = पारदो बद्धः सन् = खोटतां याति = पिष्टिरूपेण बन्धत्वमधिगच्छति, ध्मातोध्मातः = वह्नौ बहुवारं ध्मातश्च क्षयं ब्रजेत् = क्षयं गच्छेत् सः = पारदः, खोटबद्धो विज्ञेयः, असौ शीघ्रं सर्वविषापहः = सर्वविषनाशनश्च भवति ॥ अत्रानुष्टप्छन्दः ॥३८४ –

७ खोटबन्ध ।

उ०—जो पारद पिष्टि (पिट्ठी) रूप में बन्ध जाता है, और अग्नि पर तपाने से क्षीण होता है, वह पारद खोटबद्ध समझना चाहिये यह शीघ्र ही सब प्रकार के विषों को नष्ट करता है ॥ ३८४ ॥

ज्ञातव्य—माधव ने 'खोटबन्ध' का यह लक्षण, रसरत्नसमुच्चय (अ० ११ । ७१) से उद्धृत किया है ।

खोटबद्ध पारद—पिष्टि (पिट्ठी) रूप से बंधे हुये पारद को, खोटबद्ध पारद कहते हैं, यह देखने में मुर्गी के अण्डे

१—'वन्धः', २—'खोटबन्धः', ३—'सर्वगदापहः' इति च पाठान्तरं रसरत्नसमुच्चये ।

(कुक्कुटाण्ड) और सैन्धव नमक के समान श्वेतवर्ण (सफेद रङ्ग) का दीखता है ॥ ३८५ ॥ यथा--

(१) ....विष्टिबन्धस्तु खोटकः ।

(आयुर्वेदप्रकाशे, अ० १ । ३७६।)

(२) कुक्कुटाण्डनिभं यत्तु लक्ष्यते सैन्धवं यथा ।
आवर्तिते रसस्तद्वत् खोटबन्धस्य लक्षणम् ॥

(रसार्णवे रसकामधेनौ ३२० पृष्ठे च)

(८—पाटबन्धः)

द्रुतकज्जलिका मोचापत्रके चिपटीकृता ।
स १पाटः पर्पटी सैव २बद्धश्चाखिलरोगनुत् ॥३८५॥

मोचापत्रं = कदलीपत्रम ।

प्र०—पाटबन्धमाह–द्रुतेति–द्रुतकज्जलिका = अग्निसंयोगाद्द्रवीभूता समांशपारदगन्धककज्जली, मोचपत्रके = गोमयौ परिविन्यस्तकदलीपत्रे पातनीया, तदनु शीघ्रमेव गोमयपूरितपृष्ठेन कदलीपत्रान्तरेणाच्छाद्य त्रिपटीकृता = पर्पटिकाकारं कृता चेत्तर्हि सः = पर्पटिकाकारः पारदः, पाटः = पाटबन्धः सैव च पर्पटी विज्ञेया, असौ बद्धः = पाटबन्धः, अखिलरोगनुत् = ग्रहण्यादिरोगहरो भवति ॥ अत्रानुष्टप्छन्दः ॥ ३८५ ॥

---

१ — पोट ', २—'बालाद्यखिलरोगनुत्' इति च पाठान्तरं रसरत्नसमुच्चये ।

८ पाटबन्ध (पर्पटी)

३०—बेर की लकड़ी अथवा कोयलों की अग्नि पर, समान भाग पारद और गन्धक से बनाई हुई कज्जली को कलछी में पिघलावे (पिघलाने से पहिले लोह की कलछी में थोड़ासा घृत डाल ले), फिर गाय का या भैंस का गोबर बिछाकर ऊपर से एक केला का पत्ता रख दे। और पत्ते के ऊपर, पिघली हुई कज्जली को डालकर तत्काल दूसरे केले के पत्ते से ढक दे तथा गोबर की पोटली से दबाकर, च टी पपड़ी (पापरी) के आकार का बना दे, यही पाटबन्ध अथवा पर्पटी कहलाता है, यह पाटबद्ध पारद, ग्रहणी आदि सब रोगों को नष्ट करने वाला है ॥ ३८५ ॥

ज्ञातव्य—माधव ने पाटबन्ध का यह लक्षण, रसरत्न-समुच्चय (अ० ११ । ७२) से उद्धृत किया है।

पाटबन्ध अथवा पर्पटी।

आयुर्वेदसंस्कार में पर्पटी बहुत प्रसिद्ध हैं, यह ही पाटबन्ध कहलाती हैं। यथा—

पाटः पर्पटिकाबन्धः...........................

(आयुर्वेदप्रकाशे, अ० १-३७६)

(९—कल्कबन्धः)

स्वेदाद्यैः साधितः सूतः *कल्कत्वं समुपागतः।

---

*—'पङ्कत्वं' इति पाठान्तरं रसरत्नसमुच्चये।

कल्कबद्धः स विज्ञेयो योगोक्तफलदायकः ॥३८६॥

प्र०—कल्कबन्धमाह—स्वेदाद्यैरिति—स्वेदाद्यैः = स्वेदन-मर्दनादिसंस्कारैः साधितः कल्कत्वं समुपागतः = प्राप्तः सूतः = पारदः, कल्कबद्धो विज्ञेयः, सः = कल्कबद्धपारदः, योगोक्तफल-दायको भवति ॥ अत्रानुष्टप्छन्दः ॥ ३८६ ॥

९–कल्कबंध ।

उ०—जो पारद स्वेदनमर्दन आदि संस्कारों से संस्कृत होकर कल्करूप होजाता है, अर्थात् कुछ गीला होकर कोचड़ के समान कल्करूप होजाता है, वह पारद कल्कबद्ध समझना चाहिये, यह प्रयोगों में कहे गये फलको देनेवाला होता है ३८६ ज्ञातव्य—माधव ने कल्कबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।७३) से उद्धृत किया है।

(१० कज्जलीबन्ध)

कज्जली रसगन्धोत्था सुश्लक्ष्णा कज्जलोपमा ।
तत्तद्योगेन संयुक्ता कज्जलीबन्ध उच्यते ॥३८७॥

प्र०—कज्जलीबन्धमाह—कज्जलीति—रसगन्धोत्था = शुद्ध पारदगन्धकमिश्रणसमुद्भूता, सुश्लक्ष्णा = मसृणा कज्जलोपमा = कज्जलतुल्या कज्जली, तत्तद्योगेन = स्वर्णादियोगेनसंयुक्ता सती कज्जलीबन्ध उच्यते । अत्रानुष्टप्छन्दः ॥ ३८७ ॥

१० कज्जलीबन्ध ।

उ:—शुद्धपारद और गन्धक को खरल में डालकर, दृढ़ता के साथ भली भांति घोटने से, चिकने तथा कज्जल (काजल) के समान काले चूर्ण को स्वर्ण आदि धातुओं के साथ को मिलाकर घोटें, यह कज्जलीबन्ध कहलाता है॥३८७॥

ज्ञातव्य—माधव ने कज्जलीबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।७४) से उद्धृत किया है।

कज्जली—रसरत्नसमुच्चय के आठवें अध्याय तथा रसरत्नाकर में भी कज्जली बनाने की ऐसी विधि मिलती है। यथा—

(१) धातुभिर्गन्धकाद्यैश्च निर्द्रवैर्मर्दितो रसः।
सुश्लक्ष्णः कज्जलाभोऽसौकज्जली त्यभिधीयते ॥
रसरत्नसमुच्चये, अ० ८।५)

(२) गन्धाद्यैः समभागैस्तुकज्जली मर्दितो रसः।
(रसरत्नाकरे)

कज्जली के भेदों का वर्णन, इसी अध्याय के २४५ पृष्ठ पर १६६ वें श्लोक की उद्योत व्याख्या में देखिये।

(११ सजीवबन्धः)

भस्मीकृतो १नश्यति वह्नियोगात्,
रसः सजीवः२ खलुसम्प्रदिष्टः ।

---

१ 'गच्छति' २ 'स खलु प्रदिष्टः' इति च पाठान्तरं रसरत्नसमुच्चये।

संसेवितोऽसौ न करोति भस्म-
कार्यं जराव्याधिविनाशनं च ॥३८८ ॥

प्र०—सजीवबन्धमाह—भस्मीकृत इति—यो भस्मीकृतः सूतः पारदः, बह्नियोगात् = अग्निसम्पर्कात्, नश्यति = पुनर्जीवति, पुनरुत्थितो भवति, सः पारद खलु = निश्चयेन सजीवः = सजीवबन्धः संप्रदिष्टः = कथितः, संसेवितश्चासौ पारदो जराव्याधि-विनाशनं = वार्द्धक्यरोगनाशनरूपं रसायनत्वादिगुणं भस्मकार्यं = पारदभस्मकार्यं, न करोति । पारदभस्मगुणाश्च ४६६ संख्यके श्लोके वक्ष्यमाणा यथा—रसायनं त्रिदोषघ्नो योगवाह्यतिशुक्रलः । भस्म-सूतोऽखलातङ्कनाशनस्त्वनुपानतः ॥ अत्रोपजाति वृत्तम ॥३८८॥

११ सजीवबंधः ।

उ०—जो भस्मरूप पारद (पारदभस्म, रस सिन्दूर आदि), अग्नि के सम्बन्ध से फिर जीवित होजाय, वह सजीवबन्ध कहलाता है, यह सेवन करने से बुढ़ापा तथा रोगनाशस्वरूप रसायनत्व आदि पारदभस्म के गुणों को नहीं करता है ॥ ३८८ ॥

पारदभस्म के गुण, इसी अध्याय में आगे ४६६ वें श्लोक में लिखे गये हैं । यथा—

रसायनं त्रिदोषघ्नः............

ज्ञातव्य—माधव ने सजीवबन्ध का यह लक्षण, रस-रत्नसमुच्चय (अ० ११।७५) से उद्धृत किया है।

(१२ निर्जीवबन्धः)

जीर्णाभ्रको वा परिजीर्णगन्धो,
भस्मीकृतश्चाखिललौहमौलिः ।
निर्जीवनामा हि स भस्मसूतो,
निःशेषरोगान् विनहन्ति वेगात् ॥ ३८९ ॥

प्र०—निर्जीवबन्धमाह —जीर्णाभ्रक इति—जीर्णाभ्रकः ग्रासविधिना जीर्णाभ्रकसत्वग्रासः, परिजीर्णगन्धः = अन्तर्धूम बहिर्धूमान्यतरविधिना जीर्णगन्धः, भस्मीकृतः = भस्मरूपं प्रापितः अखिललौहमौलिः = स्वर्णलौहादिसर्वधातुश्रेष्ठः सः पारदः निर्जीवनामा निर्जीवबन्धसञ्ज्ञको विज्ञेय इति शेषः, स भस्मसूतः = भस्मरूपः पारदो, वेगात् शीघ्रं निःशेषरोगान् = सम्पूर्ण व्याधीन् विनिहन्ति = विनाशयति ॥ अत्रेन्द्रवज्रा वृत्तम् ॥३८९॥

१२ निर्जीवबन्ध ।

ग्रासक्रम से अभ्रकसत्व का जारण करने वाला, तथा अन्तर्धूम अथवा बहिर्धूम विधि से गन्धक का जारण करने वाला, भस्म रूप किया गया, स्वर्ण लौह आदि सब धातुओं का शिरोमणि वह पारद, निर्जीवबन्ध कहलाता है, यह शीघ्र ही सब रोगों को नष्ट करने वाला है॥ ३८९ ॥

ज्ञातव्य—माधव ने निर्जीवबन्ध का यह लक्षण, रसरत्न समुच्चय (अ० ११।७५) से उद्धृत किया है ।

अभ्रकसत्वजारण—आयुर्वेदप्रकाश के ३०१ वें पृष्ठ पर अभ्रकसत्व जारण का वर्णन हो चुका है।

गन्धकजारण—आयुर्वेदप्रकाश के २५८ से २६६ वें पृष्ठ तक में गन्धकजारण का वर्णन किया जा चुका है।

(१३ निर्बीजबन्धः)

रसस्तु पादांशसुवर्णजीर्णः,
पिष्टीकृतो गन्धकयोगतश्च१ ।
२तुल्यांशगन्धैः पुटितः क्रमेण,
निर्बीजनामा ३सकलामयघ्नः ॥ ३९० ॥

प्र०—निर्बीजबन्धमाह—रस इति—पादांशसुवर्णजीर्णः, गन्धकयोगतश्च पिष्टीकृतः, तुल्यांशगन्धैः = समभागगन्धकैः क्रमेण पुटितो, रसः पारदस्तु निर्बीजनामा = निर्बीजबन्धसञ्ज्ञको विज्ञेयः, असौ सकलामयघ्नः = सर्वरोगनाशनो भवति ॥ अत्रोपजाति वृत्तम् ॥ ३६० ॥

१३ निर्बीजबन्ध ।

उ०—जिस पारद में चौथाई (¼) भाग स्वर्णजारण किया गया हो और गन्धक डाल कर जिसकी पिष्ठि (पिट्ठी)

---

१ 'तु' २ 'तुल्यः सगन्धः'।

३ 'खलु रोगहन्ता' इति च पाठान्तरं रसरत्नप्रदीपिकायां रसकामधेनौ च अखिलरोगहन्ता इति तु पाठान्तरं रसमञ्जर्याम्।

बनाई गई हो और जिसमें समानभागगन्धक द्वारा क्रम से पुट दिये गये हों, वह पारद, निर्बीजबन्ध कहलाता है, यह सब प्रकार के रोगों को नष्ट करने वाला होता है ॥ ३६० ॥

ज्ञातव्य—माधव ने निर्बीजबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।७७) से उद्धृत किया है, रसमंजरी (अ० २।५६), रसरत्न प्रदीपिका तथा रसकामधेनु (पृष्ठ ४१७) में भी यह लक्षण मिलता है ।

(१४ सबीजबन्धः)

१बीजीकृतैरभ्रकसत्वहेमतारार्ककान्तैः २परिजारितो यः ।
३हतस्ततः षड्गुणगन्धकेन सबीजबद्धो विपुलप्रभावः॥ ३६१

प्र०—सबीजबन्धमाह—बीजीकृतैरिति—यः = पारदः, बीजीकृतैरभ्रकसत्वहेमतारार्ककान्तैः = अभ्रकसत्वशुद्धस्वर्णरजतताम्रकान्तलोहैः, परिजारितः, ततः = तदनन्तरं षड्गुणगन्धकेन हतः विपुलप्रभावः अतिशयशक्तिसम्पन्नः सः पारदः, सबीजबद्धः = सबीजबद्धसञ्ज्ञकः कथित इति शेषः । अत्रेन्द्रवज्रा वृत्तम ॥३६१॥

---

१ 'पिष्टीकृतैः' इति पाठान्तरं रसरत्नसमुच्चये ।

२ 'सह साधितः' । ३ 'युक्तस्तु तत् षड्गुणगन्धजीर्णः सबीजनामाप्यधिकप्रभावः' इति च पाठान्तर रसरत्नप्रदीपिकायां रसकामधेनौ च । पुनस्ततः षड्गुणगन्धचूर्णैः, सबीजबद्धोऽप्यधिकः प्रभावः इति तु पाठान्तरं रसमञ्जर्याम् ।

१४ सबीजबन्ध ।

उ०—जो पारद, बीजरूप अभ्रकसत्व, शुद्धस्वर्ण, शुद्ध चांदी, शुद्धतांबा और शुद्ध कान्तलोह से जारित हो और छै गुने गंधक से मारा गया हो, उस अत्यन्त प्रभावशाली पारद को सबीजबद्ध पारद कहते हैं ॥ ३६१ ॥

ज्ञातव्य—माधव ने सबीजबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।७८) से उद्धृत किया है, रसमंजरी (अ० २'५७) रसरत्नप्रदीपिका तथा रसकामधेनु (पृष्ठ ४१७) में भी यह लक्षण मिलता है ।

(१५ शृंखलाबन्धः)

वज्रादिनिहतः सूतो हतसूतसमोऽपरः ।
शृङ्खलाबद्धसूतस्तु देहलोहविधायकः ॥
(चित्रप्रभावां वेगेन व्याप्तिं जानाति शङ्करः) ॥३९२॥

प्र०—शृखलाबन्धमाह—वज्रादीति—स्पष्टम् । वज्रः= हीरकम् ॥ अत्रानुष्टप्छन्दः ॥ ३६२ ॥

१५ शृङ्खलाबंध ।

उ०—हीरा आदि द्वारा तथा समगन्धक आदि से शृङ्खला क्रम से मारा गया पारद, शृङ्खलाबद्ध कहलाता है, यह देहसिद्ध और लोहसिद्धि करने वाला है ॥ ३६२ ॥

ज्ञातव्य—माधव ने शृङ्खलाबंध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।२६) से उद्धृत किया है ।

शृङ्खलाक्रम।

एक बार जारण सारण और मारण करके, फिर उसी क्रम से जारण सारण तथा मारण करने को शृङ्खला अथवा शृङ्खलिकाक्रम कहते हैं। यथा—

(१) एकबारं जारणसारमारणं कृत्वा पुनरुक्तक्रमेण जारणसारणमारणं शृङ्खलिका।

(रसकामधेनौ ३२४ पृष्ठे)

(२) जारणा सारणा कार्या पुनर्जारणसारणा।
अनेन क्रमयोगेन कुर्याच्छृङ्खलिका क्रमम्॥

(रसकामधेनौ ४४४ पृष्ठे)

(१६ द्रुतिबन्धः)

युक्तोऽपि बाह्यद्रुतिभिश्च सूतो,
बन्धं गतो वा भसितस्वरूपः।
स राजिकापादिमितो निहन्ति,
दुःसाध्यरोगान् द्रुतिबद्धनामा॥ ३९३॥

प्र०—द्रुतिबन्धमाह—युक्त इति—बाह्यद्रुतिभि र्युक्तोऽपि = सहितोऽपि, बन्धं गतः = बद्धः, भसितस्वरूपः = भस्मरूपो वा राजिकापादमितः = राजिकायाश्चतुर्थांशभागपरिमितो भक्षितः सूतः पारदो दुःसाध्यरोगान् कृच्छ्रसाध्यरोगान् निहन्ति = नाशयति, सः = पारदो, द्रुतिबद्धनामा विज्ञेयः॥ ३९३॥

१६ द्रुतिबंध ।

उ०—बाह्यद्रुतियों द्वारा मूर्तिबद्ध हुआ अथवा भस्मरूप पारद, चौथाई (¼) राई की मात्रा में भक्षण करने से, कष्ट साध्य रोगों को नष्ट कर देता है, यह द्रुतिपद्ध पारद कहलाता है ॥ ३६३ ॥

उ०—माधव ने द्रुतिबन्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।८०) से उद्धृत किया है ।

द्रुतिबन्ध—रससिद्धों का ऐसा मत है, कि बाह्यद्रुति संस्कार के बिना पारद बद्ध नहीं होता है, इसलिये उन्होंने अभ्रद्रुति द्वारा पारद के बद्ध होनेका उल्लेख किया है यथा:-

१—न च बाह्यद्रुतियोगस्तत्कथमिह बध्यते सूतः ।

(रसहृदये, रसकामधेनौ ३८१ पृष्ठे)

२—तेन बन्धत्वमायाति बाह्या सा कथ्यते द्रुतिः ।

(रसप्रकाशसुधाकरे, अ० १-६६)

३—अभ्रद्रुतिसमायोगे रसेन्द्रो बध्यते खलु ॥

(रसप्रकाशसुधाकरे, अ० २-५६)

(१७ बालकबन्धः)

समाभ्रजीर्णः शिवजस्तु बालः,
संसेवितो योगयुतो जवेन ।

रसायनो भाविगदापहश्च,
सोपद्रवारिष्टगदान्निहन्ति ॥ ३९४ ॥

प्र०—बालकबन्धमाह—समेति—समाभ्रजीर्णः, =तुल्याभ्रकसत्वजीर्णः, शिवजः=पारदस्तुबालः=बालकबन्धो विज्ञेयः, योगयुतः=संसेवितः सः पारदो, जवेन=शीघ्रं सोपद्रवारिष्टगदान् उपद्रवारिष्ट सहितान्रोगान् निहन्ति=नाशयति, अयं रसायनः=रसायनस्वरूपः, भाविगदापहः=भाविरोगनाशकश्चास्ति अत्रोपजाति वृत्तम् ॥ ३६४ ॥

१७ बालकबन्ध।

उ०—समानभाग अभ्रकसत्व जीर्ण होने पर, बालकबन्ध पारद कहलाता है, यह उचित मात्रा में प्रयोग किये जाने पर, उपद्रव तथाअरिष्टलक्षणसहित रोगों को नष्ट कर देता है, यह रसायनस्वरूप और उत्पन्न होने वालों रोगों को रोकने वाला है ॥ ३६४ ॥

ज्ञातव्य--माधव ने, बालकबंध का यह लक्षण, रसरत्नसमुच्चय (अ० ११।८१) से उद्धृत किया है।

बालकबंध--रसशास्त्रज्ञों ने, समानभाग अभ्रकसत्व जीर्ण किये हुए पारद की बाल अथवा बालक सञ्ज्ञा मानी है। यथा--

समजीर्णो भवेद्बालः...................।

(रसकामधेनौ ३६३ पृष्ठे)

(१८ कुमारबन्धः)

हरोद्भवो यो द्विगुणाभ्रजीर्णः,
स स्यात् कुमारो मिततण्डुलोऽसौ ।
त्रिसप्तरात्रैः खलुपापरोग-
संघातघाती च रसायनश्च ॥ ३९५ ॥

प्र०--कुमारबन्धमाह--हरोद्भव इति—द्विगुणाभ्रजीर्णो यो हरोद्भवः = पारदः, सः कुमारबन्धः स्यात्, मिततण्डुलः = तण्डुलपरिमतो भक्षितोऽयं पारदः त्रिसप्तरात्रैः = एकविंशति दिवसैः, पापरोगसंघातघाती = मसूरिकासंघातनाशनः, रसायनः जराव्याधिनाशनश्च खलु निश्चयेन भवति ॥ ३६५ ॥

१८ कुमारबंध ।

उ० -अपनी मात्रा से दो गुना अभ्रकसत्व जीर्ण किया हुआ पारद, 'कुमारबन्ध' कहलाता है, यह एक चांवल की मात्रा में, इक्कीस दिन सेवन करने से, सब प्रकार की मसूरिका (चेचक, माता, पापरोग) को निश्चिय ही नष्ट करदेता है और यह रसायन स्वरूप भी है॥ ३६५ ॥

ज्ञातव्य—माधव ने कुमारबन्ध का यह लक्षण, रसरत्न समुच्चय (अ० ११।८२) से उद्धृत किया है।

पापरोग—त्रिकाण्ड शेष कोष के अनुसार, पापरोग शब्द से मसूरिका (चेचक, माता) रोग का ग्रहण होता है।

इसीलिये मसूरिका में प्रयुक्त रसरत्नाकर के मसूरिकाहर रस को 'पापरोगान्तक रस नाम से रसेन्द्रचिन्तामणि में लिखा गया है। यथा—

अथ शुद्धस्य सूतस्य मूर्च्छितस्य मृतस्य च।
धवला पिप्पली धात्री रुद्राक्षघृतमाक्षिकैः॥
पापरोगान्तको योगः पृथिव्यामेव दुर्लभः॥
(रसेन्द्रचिन्तामणि, अ० ६ मसूरिकाधिकारः

(१९ तरुणबन्धः)

चतुर्गुणव्योमकृताशनो यो, १
रसायनाग्र्यस्तरुणाभिधानः।
स सप्तरात्रात्सकलामयघ्नो,
रसायनो वीर्यबलप्रदाता॥ ३९६ ॥

प्र०-तरुणबन्धमाह—चतुरिति-यः = पारदः, चतुर्गुणव्योमकृताशनः = चतुर्गुणाभ्रकसत्वजीर्णः सः तरुणाभिधानः = तरुणबन्धनामा रसायनाग्र्यः = श्रेष्ठरसायनः कथ्यते, सप्तरात्रात् = सप्तदिवसं यावत् भक्षितोऽयं पारदः, सकलामयघ्नः = सर्वरोगनाशनः, रसायनः, वीर्यबलप्रदाता चास्ति॥ ३९६ ॥

१९ तरुणबंध।

उ०—जिस पारद में अपनी मात्रा से चार गुना अभ्रक सत्वजीर्ण होचुका है, वह तरुणबन्ध कहलाता है, वह सात

१ 'असौ' इति पाठान्तरं रसरत्नसमुच्चये।

दिन रात में सम्पूर्ण रोगों को नष्ट करने वाला, रसायनस्वरूप और वीर्य तथा बल को देने वाला है। ३६६॥

ज्ञातव्य--माधव ने तरुणबन्ध का यह लक्षण, रसरत्न समुच्चय (अ० ११।८३) से उद्धृत किया है।

"रसार्णव" नाम के प्राचीन रसशास्त्र में चारगुने (चतुर्गुण) अभ्रक जीर्ण किये हुये पारद की यौवन संज्ञा दी है, जो कि तरुणता का पर्यायवाचक है, इस लिये कहा जा सकता है कि यहाँ पर तरुणबन्ध तथा यौवन शब्द भी परस्पर समानार्थक हैं। क्योंकि दोनों से चतुर्गण अभ्रक जीर्ण का ही बोध होता है। यथा--

समजीर्णो भवेद्बालो यौवनस्थश्चतुर्गुणम्।
यौवनस्थो रसो देवि ? क्षमो देहस्य रक्षणे॥

(रसार्णवे, रसकामधेनौ ३६३ पृष्ठे च)

(२० वृद्धबन्धः)

*यश्चाभ्रकं षड्गुणितं हि जीर्णः,
प्राप्ताग्निसख्यः स हि वृद्धनामा।
देहे च लोहे च नियोजनीयः,
शिवादृते कोऽस्य गुणान् प्रवक्ति ॥३९७॥

प्र०—वृद्धबन्धमाह--यश्चेति—यः = पारदः, षड्गुणितमभ्रकं = अभ्रकसत्वं जीर्णः, प्राप्ताग्निसख्यश्च सः = पारदः, वृद्ध-

* 'यस्याभ्रक षड्गुणितः' इति पाठान्तरं रसरत्नसमुच्चये।

नामा = वृद्धबन्धसंज्ञकः कथित, अयं देहे = देहसिद्धौ, लोहे = लोह सिद्धौ (स्वर्णादिनिर्माणे) च नियोजनीयः, शिवात् = महादेवात्, ऋते = विना, अस्य = वृद्धबन्धपारदस्य गुणान्, कः = प्रवक्ति न कोऽपीत्यर्थः ॥ ३६७ ॥

२० वृद्धबन्ध ।

उ०—जो पारद दो गुने अभ्रक को जीर्ण कर चुका हो और अग्नि में भस्म हो चुका हो, वह वृद्धबन्ध कहलाता है। उस पारद को, देहसिद्धि तथा लोहसिद्धि (तांबा आदि से सुवर्ण बनाने) में प्रयुक्त करना चाहिये । महादेव जी के अतिरिक्त, इस वृद्धबन्ध पारद के गुणों का वर्णन कौन कर सकता है, अर्थात् इसको गुणों के वर्णन करने में कोई भी समर्थ नहीं है । ३६७ ॥

ज्ञातव्य—माधव ने वृद्धबन्ध का यह लक्षण, रसरत्न समुच्चय (अ० ११।८४) से उद्धृत किया है ।

वृद्धबन्ध पारद— छै गुना अभ्रकसत्व जीर्ण करने पर, पारद की 'वृद्ध' सञ्ज्ञा होजाती है, तथा यह देहसिद्धि द्वारा विष्णु के समान दीर्घायु प्राप्त कराके और लोहसिद्धि द्वारा कोटिवेधी होकर अपना चमत्कार दिखलाता है। यथा

(१) वृद्धः षड्गुणजीर्णस्तु............

(२) वृद्धो विध्यति लोहानि जारितः सारितोऽथवा ।

(३) आयुस्तु षड्गुणे विष्णोः कोटिवेधो भवेद्रसः ॥

(रसकामधेनौ ३६३ पृष्ठ)

(२१ मूर्तिबन्धः)

योो दिव्यमूलिकाभिश्च कृतोऽत्यग्निसहो रसः ।
बिनाऽभ्रजारणात् स स्यान्मूर्तिबद्धो महारसः ॥ ३६८ ॥
अयं हि जार्यमाणस्तु नाग्निना क्षीयते रसः ।
योजितः सर्वरोगेषु निरौपम्यफलप्रदः ॥३९९ ॥

प्र०—मूर्तिबन्धमाह— यः=पारदः, अभ्रजारणात् = अभ्रकसत्वजारणात्, बिना दिव्यमूलिकाभिः =दिव्यौषधिभिः वज्रीब्रह्मदण्डीप्रभृतिभिः, अत्यग्निसहः कृतः, स महारसः=मूर्ति-बद्धोविज्ञेयः । अग्निना जार्यमाणोऽसौरसः= मूर्तिबद्धः पारदो न क्षीयते, सर्वरोगेषु योजितश्च निरौपम्यफलप्रदः अद्वितीयफलप्रदो भवति ॥ ३६८-३६६ ॥

२१ मूर्तिबन्ध ।

उ०—अभ्रकसत्व जारण किये बिना, केवल सोमवल्ली (सोमलता), वज्री, ब्रह्मदण्डी आदि दिव्य औषधियों के संयोगद्वारा, जो पारद अत्यन्त तीव्र अग्नि को सहने वाला (अग्निस्थायी) कर लिया जाता है, वह मूर्तिबद्ध पारद कह-लाता है. यह अग्निद्वारा जारण !करने से क्षीण नहीं होता है और सब रोगों में देने पर अद्वितीय फल दिखलाता है ॥३६८-३६६ ॥

ज्ञातव्य—माधव ने मूर्तिबन्ध का यह लक्षण, रसरत्न-समुच्चय (अ० ११।८५) से उद्धृत किया है ।

मूर्तिबद्ध पारद।

मूर्तिबद्ध पारद का यह लक्षण, इसी आयुर्वेदप्रकाश के पृष्ठ १८४ पर प्रथम अध्याय के १४३ वें सूत्र में, निम्नलिखित रूप से दिया जा चुका है—

बन्धनं तु स्वाभाविकद्रवत्वे सति वह्निनाऽनुड्डीयमानत्वं मूर्तिबद्धत्वम्।

इसी सूत्र की हिन्दी भाषा की उद्योत व्याख्या में १८५-१८६ पृष्ठ पर, इस मूर्तिबद्ध पारद का विस्तार से विवेचन किया जा चुका है, पाठक वहाँ पर ही देख लें।

(२२ जलबन्धः)

शिलातोयमुखैस्तोयैः १सिद्धोऽसौ जलबन्धनात्।
स जरारोगमृत्युघ्नः कल्पोक्तफलदायकः ॥ ४०० ॥

प्र०—जलबन्धमाह—शिलेति—शिलातोयमुखैः = शैलोदकप्रभृतिभिः, तोयैः = जलैः, जलबन्धनात् सिद्धो, ऽसौ = पारदो, जलबन्धसञ्ज्ञको विज्ञेयः, स जरारोगमृत्युघ्नः = रसायनरूपः, कल्पोक्तफलदायकश्चास्ति ॥ अत्रानुष्टप्छन्दः ४०० ॥

२२ जलबन्ध।

उ०—शैलोदक आदि जलों के प्रयोग से बँधा हुआ पारद, जलबन्ध कहलाता है, यह रसायनस्वरूप होने से

१ 'बद्धोऽसौ जलबन्धवान्' इति पाठान्तरं रसरत्नसमुच्चये।

बुढ़ापा तथा मृत्यु को दूर करने वाला, तथा कल्पविधि द्वारा सेवन करने से कल्प में वर्णित फल को देने वाला है ॥ ४०० ॥

ज्ञातव्य—माधव ने जलबन्ध का यह लक्षण, रसरत्न समुच्चय (अ० ११ । ८७) से उद्धृत किया है ।

शैलोदक ।

विन्ध्याचल, सह्याद्रि, श्रीशैल, आदि पर्वतों की विशेष विशेष शिलाओं से निकलने वाला जल शैलोदक कहलाता है, वह, कर्दमाम्भ, मही, शिला तथा शैल भेद से, चार प्रकार का होता है, इसकी परीक्षा यह है कि इस जल में डाली हुई लकड़ी, पत्थर के समान कड़ी होजाती है, इस जल से भरे हुये घड़े में गन्धक तथा हरिताल डालने से बुलबुले उत्पन्न होते हैं, यह जल उनकी गन्ध दूर कर देता है । यह क्षणवेधी तथा दिनवेधी आदि भेद से कई प्रकार का होता है ।

(१) अतःपरं प्रवक्ष्यामि शैलोदकविधिं प्रिये ।
कर्दमाम्भो मही शैल शिलं चेति चतुर्विधम् ॥
कानिचित्क्षणवेधीनि दिनवेधीनि कानिचित् ।
पक्षमासादिषण्मावेधकानि महीतले ॥
क्षिप्तं यदा भवेत्काष्ठं शैलीभूतं तु दृश्यते ।
बहिरन्तश्च देवेशि वेधकं तत्प्रकीर्तितम् ॥
हिङ्गुलं हरितालं च गन्धकं च मनःशिला ।
एषां गन्धापहं र कुरुते क्षिप्रकं च तत् ॥
गन्धकं तालकं चैव तोयपूर्णे घटे क्षिपेत् ।
यदा तद्बुद्बुदाकारं तदा शैलोदकं भवेत् ॥

अन्यथा वेष्टकं देवि तन्न ग्राह्यं निरर्थकम् ।
(प्रसरत्युत्तमावर्तो क्षणवेधी च तत्र तु)॥
श्रीशैले श्रीवनप्रान्ते पर्यङ्काख्ये शिलातले ।
तत्रस्थं क्षणवेधिस्यान्नदी भगवती तटे ॥
एकाहं वेधयेत्तत्तु गोकर्णे तु दिनत्रयम् ॥
भद्राङ्के दिनवेधि स्यात् त्रिस्वच्छाख्ये त्रिवासरम् ॥
तारेश्वरे मासिकं स्याद्वर्षायुर्यदि नैकतः ।
ब्रह्मेश्वरे मासिकं स्याद् व्याघ्रेश्वरेऽष्टवासरम् ॥
अघोराख्ये मासिकं च सिंहद्वीपे तथा पुनः ।
दिनमेकं ब्रह्मगिरौ विन्ध्ये तु क्षण (लक्ष) वेधकम् ॥
वासरं माल्यवन्ते तु लक्ष (क्षण) वेधि शिलोदकम् ।
किष्किन्धापर्वते रम्ये पम्पातीरे तृणोदके ॥
तस्य पश्चिमतो देवि ! योजनद्वितये पुनः ।
भूशैलमस्ति तत्रैव त्रिदिनं वेधि पर्वते ॥
सह्याचले पुरे देव्याः श्रीदत्तात्रेयसन्निधौ ।
शैलोदकं कोटिवेधि दुर्गा (र्ग) देशेऽपि वासरम् ॥
लक्षवेधि नृसिंहस्य नगरेऽह्नो बलाभिधे ।
अन्यत्र यत्र तत्रापि ब्रह्मविष्णुशिवोद्भवम् ॥
अमृतं तत्र तत्रापि वज्रीकरणमुत्तमम् ॥

अथ शैलोदकोत्पत्तिः—

तस्योत्पत्तिं प्रवक्ष्यामि यथा जानन्ति साधकाः ।
महीं समुद्धृतवतो वराहस्य कलेवरात् ॥
यः स्वेदः पतितस्तस्माज्जातं शैलोदकं परम् ।
तन्मुखे क्षणिकं जातं क्रोडदेशे तु वासरम् ॥

बाहुभ्यां त्र्यब्दवेधि स्यान्मासवेधि तु पार्श्वयोः ।
षण्मासमपराङ्गे च सर्वं समफलं भवेत् ॥
अहोरात्रेण तत्क्षेत्ररक्षां कृत्वा दिशां बलिम् ।
दत्वा लक्षं जपित्वा तु गृह्णीयादमृतं परम् ॥
शरद्ग्रीष्म वसन्ते च हेमन्ते वा सुरार्चिते ।
आयसे ताम्रपात्रे वा पात्रे ऽलाबुमये ऽथवा ॥

अथास्य प्रयोगाः—

शैलोदकपलान्यष्टौ पलं क्षीरस्य निक्षिपेत् ।
क्षीरवशेषं संक्वाथ्य त्रिसप्ताहं पिबेन्नरः ॥
जीवेद्वर्षसहस्रं तु बलीपलितवर्जितः ।
.... —

शैलोदके विनिक्षिप्य भूशैले कर्दमे ऽपि वा ।
ज्ञात्वा कालप्रमाणेन बन्धयेत्पारदं ततः ॥
रक्तक्षारयुतं ध्मातं सुवर्णं समसारितम् ।
शतांशेन तु लोहानां सर्वेषां हेमकारकम् ॥
द्वितीयसारणां प्राप्य भक्षयेन्मधुसर्पिषा ।
तत्कालं तु चित्तजातामूर्ध्वं भवति चानिलिः ॥
कालज्ञानं भवेत्तस्य जीवेदयुतपञ्चकम् ।
द्वितीय सारणां प्राप्य सहस्रांशेनविध्यति ॥
तखोटं धारयेद्वक्त्रे दिव्यत्वं लभते ध्रुवम् ॥
(रसकामधेनो ४२६-४२६ पृष्ठे, आनन्दकन्दे १६१-१६२ पृष्ठे च) ।

(२) 'रसार्णव' ग्रन्थ के बारहवें पटल में भी शिलोदक का वर्णन मिलता है।

(२३ अग्निबन्ध)

केवलो *लोहयुक्तो वा ध्मातः स्याद्गुटिकाकृतिः।
अक्षीणश्चाग्निबद्धोऽसौ खेचरत्वादिकृत्स हि ॥४०१॥

प्र०—अग्निबन्धमाह—केवल इति—केवलो लोहयुक्तः = स्वर्णादिधातुसहितो वा, वह्नौ ध्मातः, यः पारदः, अक्षीणः, गुटिकाकृतिः = गुटिकाकारः स्यादसौ 'अग्निबद्धः' कथ्यते इति शेषः स हि पारदः, खेचरत्वादिकृत् = गगनचरत्वादिकारकोः विज्ञेयः अत्रानुष्टप्छन्दः ॥ ४०१ ॥

२३ अग्निबन्ध।

उ०—केवल अथवा स्वर्ण आदि धातुसहित जो पारद, अग्नि पर तपाने से क्षीण नहीं होता और गोली के आकार का होजाता हो, वह अग्निबद्ध पारद कहलाता है, इस पारद के प्रयोग से आकाश में घूमने की शक्ति होजाती है ॥ ४०१ ॥

ज्ञातव्य—माधव ने अग्निबद्ध का यह लक्षण, रसरत्नसमुच्चय (अ० ११ ८८) से उद्धृत किया है।

---

* 'योगयुक्त' इति पाठान्तरं रसरत्नसमुच्चये।

(२४ सुसंस्कृतबन्धः सूतानां मूर्च्छाकल्पो वा)

विष्णुक्रान्ता शशिलता कुम्भी कनकमूलकैः ।
विशालानागिनीकन्दव्याघ्रपादीकुरण्टकैः ॥४०२॥
वृश्चिकालीभशुण्डीभ्यां हंसपद्या सहासुरैः ।
अप्रसूतगवां मूत्रैः पिष्टं वा कुलके पचेत् ॥ ४०३ ॥
पक्वमन्तं मृतैर्लोहैर्मर्दितं विपचेद्रसम् ।
यन्त्रेषु मूर्च्छा सूतानामेष कल्पः समासतः ॥४०४॥

प्र०—सुसंकृतबन्धमाह—विष्णुक्रान्तेति— विष्णुक्रान्तादिभिः पिष्टं रसं = पारदं, कुलके, कुकूलके, तुषानले, पचेत्, एवं पक्वं, मृतैर्लोहैः = स्वर्णादिभिः सह मर्दितं च तद्रसं यन्त्रेषु = बालुकादियन्त्रेषु विपचेत्, सूतानां = पारदस्येत्यर्थः, एष मूर्च्छाकल्पः समासतः = संक्षेपतः कथितो रससिद्धैरितिशेषः । विष्णुक्रान्ता = अपराजिता । अत्रानुष्टप्छन्दः ॥ ४०२—४०४ ॥

२४ सुसंस्कृतबन्ध अथवा पारद का मूर्च्छाकल्प ।

उ०—अपराजिता (कोयल), बाकुची अथवा गिलोय लाल पाटला, धतूरे की जड़, इन्द्रायण, नागबल्ली, विकंकत,

---

*रसरत्नसमुच्चयादुद्धृतोऽयं पाठः सुस्कृतबन्धस्य (मूर्च्छाकल्पस्य), मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु नैव मुद्रितोऽस्ति ।

पियाबांसा, वृश्चिकाली, हाथीशुण्डी, हंसपादी, राई तथा गोमूत्र के साथ पारद का मर्दन कर, भूसे की अग्नि अथवा तप्तखल्व में पकावें, फिर स्वर्ण आदि के साथ मर्दन कर, बालुकायन्त्र आदि यन्त्रों में पकावें, रससिद्धों ने संक्षेप में पारद का यह सुसंस्कृतबन्ध अथवा मूर्च्छाकल्प कहा है।

॥ ४०२-४०४ ॥

ज्ञातव्य—आयुर्वेद प्रकाश में सुसंस्कृतबन्ध पारद के मूर्च्छाकल्प का यह लक्षण नहीं लिखा है, हमनें आवश्यक समझकर, रसरत्नसमुच्चय (अ० ११ । ८६ । ६१) से यहां उद्धृत कर दिया है।

(२५ महाबन्धः)

हेम्ना वा रजतेन वा सहचरो ध्मातो व्रजत्येकता
मक्षीणो निविडो गुरुश्च १गुटिकाकारोऽतिदीप्तोज्ज्वलः।
चूर्णत्वं पटुवत्प्रयाति निहतो घृष्टो न मुञ्चेन्मलं
निर्गन्धो द्रवति क्षणात् स हि२महाबद्धाभिधानो रसः४०५

प्र०- महाबन्धमाह- हेम्नेति—हेम्ना = सुवर्णेन, वा = अथवा, रजतेन = रौप्येन वा सहचरः = सहप्रयुक्तो, यः पारदोऽग्नौ ध्मातः सन् = एकतां वजति = एकत्वमुपयाति, अक्षीणो, निविडो = घनः, गुरुः, गुटिकाकारः = गुटिकाकृतिः, अतिदीप्तोज्ज्वलश्च

१—'अतिदीर्घोज्ज्वलः', २—'महाबन्धाभिधानः' इति च पाठान्तरं रसरत्नसमुच्चये।

भवति, निहतः सन् यः पारदः, पटुवत् = लवणतुल्यं चूर्णत्वं प्रयाति = चूर्णरूपो भवति, घृष्टः सन् यो मलं = कालिमां, न मुञ्चेत्, = न परित्यजेत्, निर्गन्धः = गन्धरहितः, वह्नौ स्थापितश्च यः क्षणात् = शीघ्रं द्रवति, स रसः = पारदो महाबद्धाभिधानः = महा बद्धसंज्ञकः कथित इति शेषः ॥ अत्र शार्दूलविक्रीडितं वृत्तम् ४०५

२५ महाबन्ध ।

उ०—जो पारद, स्वर्ण अथवा चाँदी के साथ मिलाकर अग्नि पर खूब गर्म करने से पिघल कर एक हो जाय, तथा क्षीण न हो, गाढ़ा, भारी, गोली के समान आकार वाला अत्यन्त प्रकाशमान तथा स्वच्छ हो और पीसने से नमक की भाँति पिसकर चूर्णरूप हो जाय, घिसने पर काला रङ्ग (कालौंच) न दे, तथा गन्धरहित और अग्नि पर तत्काल ही पिघल कर पतला हो जाय, वह 'महाबद्ध' पारद कहलाता है ॥ ४०५ ॥

ज्ञातव्य—माधव ने महाबन्ध का यह लक्षण, रसरत्न-समुच्चय (अ० ११ । ६२) से उद्धृत किया है ।

(२६ अथ जलौकाबन्धः)

(जलौकाबन्धस्य प्रयोगफलम्)

बालमध्यमवृद्धासु योज्या विज्ञाय तत्क्रमात् ।
*नृणां रसवियुक्तानां योषा स्यात्सङ्गमोत्सुका ॥ ५०६ ॥

---

* 'नीरसानामपि नृणां' इति पाठांवरं रसरत्नसमुच्चये ।

प्र०—जलौकाबन्धनिर्देशप्रसंगे पूर्वं तत्प्रयोगफलमाह-बालेति-बालमध्यमवृद्धासु = बालादिसञ्ज्ञकासु स्त्रीषु, यथाप्रोक्तं भावप्रकाशे-'बालेति गीयते नारी यावद्वर्षाणि षोडश' = इत्यादिना बालादिकां विज्ञाय = ज्ञात्वा, तत्क्रमात् = बाल्ये, बालायामष्टांगुला ' यथा चाग्रिमेव श्लोके वक्ष्यति—"बाल्ये चाष्टाङ्गुला योज्या"-योनौ जलौका योज्या, अनया योषा = स्त्री रसवियुक्तानां नृणां = मनुष्याणामपि सङ्गमोत्सुका स्यात् ॥ अत्रानुष्टप्-छन्दः ॥ ४०६ ॥

२६ जलौकाबन्ध।

उ०—जलौकाबन्ध के प्रयोग का फल—बाला, तरुणी और प्रौढ़ा स्त्रियों की योनि में, आगे के श्लोक में बताये गये क्रम के अनुसार, आठ, दस और बारह अंगुल की पारद से बनाई हुई जलौका (जोंक), मैथुन समय में रखनी चाहिये, इससे वह स्त्री कामदेव के प्रभाव से विह्वल होकर, नीरस पुरुष के साथ भी मैथुन करने को उत्कण्ठित हो जाती है ॥ ४०६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । १०४) से उद्‌धृत किया है।

जलौकाबन्ध में आवश्यक स्त्रियों के बालादि भेद।

भाव प्रकाश में, (१) १६ वर्ष तक की स्त्री को बाला, (२) ३२ वर्ष तक की स्त्री को तरुणी, (३) ५० वर्ष तक की अधिरूढ़ा (प्रौढ़ा) और (४) ५० वर्ष से अधिक की स्त्री

को वृद्धा स्त्री माना गया है। राजनिघण्टु में भी यह भेद लिखे हैं, परन्तु उसमें ३० वर्ष तक की तरुणी और ५५ वर्ष तक की स्त्री को प्रौढ़ा माना है। यथा—

(१) बालेति गीयते नारी यावद्वर्षाणि षोडश।
तत्तस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि॥
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता॥
(भावप्रकाशे)

(२) आषोडशीभवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशती प्रौढ़ा भवेद् वृद्धा ततः परम्॥
(राजनिघण्टौ, व० १८)

यहाँ जलौका के प्रयोग में, मध्यमा शब्द से तरुणी और वृद्धा के शब्द से प्रौढ़ा स्त्री समझनी चाहिये, क्यों कि भावप्रकाश के ऊपर के श्लोक में, वास्तविक वृद्धा स्त्री मैथुन के अयोग्य (वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता) मानी गई है।

विशेष ज्ञातव्य—यद्यपि मूल आयुर्वेदप्रकाश ग्रन्थ में 'जलौकाबन्ध' का यह प्रकरण, आगे रसभस्मविधान (४६३ श्लोक) के पश्चात् लिखा है, परन्तु पारद के बन्ध के प्रयोगों में ही जलौकाबन्ध है, इस लिये प्रसङ्गानुसार इस छब्बीसवें जलौकाबन्ध को भी हमने यहाँ पर ही लिख दिया है।

(जलौकाबन्धभेदाः)

बाल्ये चाष्टांगुला *योनौ यौवने च दशांगुला।

---

* 'योज्या' इति पाठान्तरं रसरत्नसमुच्चये।

द्वादशैव प्रगल्भानां जलौका त्रिविधा मता ॥ ४०७ ॥

प्र८—जलौकाबन्धभेदानाह—बाल्य इति-बाल्ये = बालास्त्रियामित्यर्थः, अष्टांगुला जलौका योनौ योज्या, यौवने तरुण्या मित्यर्थः, दशांगुला जलौका योनौ द्वादशैव द्वादशांगुलैव जलौका योज्या, इत्थं जलौका, त्रिविधा मता ॥ अत्रानुष्टप्छंदः ॥४०७॥

जलौकाबन्ध के भेद ।

उ०—बाला स्त्रियों में आठ अङ्गुल, तरुणी स्त्रियों में दश अंगुल और प्रौढ़ा स्त्रियों मे बारह अंगुल की पारद की बनाई हुई जलौका (जोंक), मैथुन के समय योनि में रखनी चाहिये, इसप्रकार प्रमाण भेद से जलौका तीन प्रकार की मानी गई है ॥ ४०७ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । ६५) से उद्धृत किया है, रसकामधेनु (पृष्ठ ४५६) में भी यह श्लोक है ।

(जलौकाबन्धनिर्माणविधिः)

सा यथा—

मुनिपत्ररसं चैव शाल्मली वृन्तवारि च ।
जातीमूलस्य तोयं च शिंशपातोयसंयुतम् ॥४०८॥
श्लेष्मातकफलं चैव त्रिफलाचूर्णमेव च ।
कोकिलाक्षस्य चूर्णञ्च पारदं मर्दयेद् बुधः ॥४०९॥

*जलौका जायते दिव्या रामाजनमनोहरा ।
सा योज्या कामकाले तु कामयेत्कामिनी स्वयम् ४१०
सद्यः स्खलनमाप्नोति दुःसाध्याऽपि रतेऽङ्गना ॥

इति जलौकाबन्धः ॥

प्र०—जलौकाबन्धनिर्माणमाह—सेति—सा = जलौका यथा—मुनिपत्रमिति—बुधः = विचक्षणो रसवैद्यः मुनिपत्ररसादिभिः पारदं मर्दयेत्, मुनिपत्ररसं = अगस्त्यवृक्षपत्रस्वरसं इत्थं मर्दनेन रामाजनमनोहरा = स्त्रीजनमनोहरा दिव्या जलौका जायते, सा = जलौका कामकाले = मैथुनसमये, योज्या स्त्रिया योनौ निक्षेपणीया, अनया कामविह्वला जाता कामिनी स्त्री, पुरुषं स्वयं कामयेत् = इच्छेत्, दुःसाध्याऽप्यङ्गना = स्त्रीरते = मैथुने सद्यः = शीघ्रं स्खलनमाप्नोति = स्खलतीत्यर्थः ॥ अत्रानुष्टप्-छन्दः ॥ ४०८—४१० ॥

जलौकाबन्ध की निर्माणविधि ।

उ०—अगस्त्य वृक्ष के पत्तों का स्वरस, शाल्मली के डंठल का रस, चमेली की जड़ का स्वरस, शोशम वृक्ष के पत्तों का रस, लिहसोडा का फल, त्रिफला का चूर्ण, तालमखाने के बीजों का चूर्ण इकट्ठा करे, और फिर इनको पारद का मर्दन करने, से स्त्रियों की मनमोहक, सुन्दर जलौका (पारद की बनी हुई जोंक की आकृति) बन जाती है, इसको मैथुन के समय स्त्री की योनि में रख देना चाहिये, इससे स्त्री कामदेव के प्रभाव से विह्वल होकर, पुरुष को स्वयं चाहने

* 'जलूका' इति पाठान्तरं रसरत्नसमुच्चये।

लगती है, और दुःसाध्य स्त्री भी मैथुन में शीघ्र स्खलित हो जाती है ॥ ४०८-४१० ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । ९८-१००) से उद्धृत किये हैं।

जलौका का प्रयोग ।

मैथुनकर्म में स्त्रियों को, पुरुषों से पूर्व शीघ्र ही स्खलित करने के लिये, पारद को विविध औषधियों के साथ घोटकर जलौका (जोंक) की आकृति बना कर व्यवहार में लाने की प्रथा प्राचीन समय में बहुत थी। इस लिये रसार्णव, आनन्दकन्द रसरत्नप्रदीप, रसराजलक्ष्मी तथा रसरत्नसमुच्चय आदि प्राचीन तथा रसायनसंग्रह और रसकामधेनु आदि मध्यकालीन रस ग्रन्थों में जलौका का लक्षण, निर्माण-विधि तथा प्रयोगविधि और उसका फल विस्तृत तथा स्पष्टरूप से लिखा मिलता है। यथा—

जलौकाबन्ध का लक्षण ।

नानावर्णस्तथा स्वच्छो द्रुतो योनौ जलौकवत् ।
बध्यते सूतको यश्च जलौकाबद्धलक्षणम् ॥
(रसार्णवे, आनन्दकन्दे १७६ पृष्ठे, रसकामधेनौ ३१६ पृष्ठे च)

जलौकाबन्ध की निर्माणविधि ।

(१) गन्धं सूते विनिक्षिप्य स्वर्णं वा नागमेव वा ।
अष्टमांशेन तत्सर्वं मर्दयेत्तप्तखल्वके ॥

शाल्मल्यश्चैव पञ्चाङ्गरसं तत्र विनिक्षिपेत् ।
श्लेष्मातकफलं पक्वं कोकिलाक्षस्य बीजकम् ॥
तिलपिण्याकचूर्णं च दत्वा तावद्विमर्दयेत् ।
जलौका जायते यावत्तदा कर्पूरटङ्कणम् ॥
कपिकच्छुकरोमाणि बाकुचीतैलकं पटु ।
मागधीं च जलैः पिष्ट्वा तत्सर्वं तप्तखल्वके ॥
क्षिपेत्पूर्वजलौकां च त्रिसप्ताहं विमर्दयेत् ।
सा योज्या रतिकाले च नारीणां योनिगह्वरे ॥
मददर्पहरा तासां मदविह्वलकारिका ॥

(रसकामधेनौ ४५६ पृष्ठे)

सूचना—' आनन्दकन्द ' (१७६ पृष्ठ) रसग्रन्थ में भी ऊपर के श्लोकों से मिलते हुये श्लोक हैं ।

(२) तत्र पारदकाष्टांशं स्वर्णं वा नागमेव वा ।
योजयेत्तप्तखल्वे तु शाल्मलीत्वग्भवैर्द्रवैः ॥
मुनिपत्ररसैर्नीलीमूलद्रावैश्च मर्दयेत् ।
हस्तिकन्दद्रवैर्युक्तमविच्छिन्नं विमर्दयेत् ॥
बन्धौषधैरविच्छिन्नं तप्तखल्वे तथा परम् ।
कर्पूराद्यैः पुनर्मर्द्यं तप्तखल्वे तु पूर्ववत् ॥
त्रिदिनं मर्दयेत्खल्वे सूतं निष्कचतुष्टयम् ।
त्रिफलायाश्च निर्यासं स्तोकं स्तोकं विनिक्षिपेत् ॥
छागं पयः शृङ्गियुतं दातव्यं मर्दने मधु ।
जलौका मदनाख्येयं जायते सुखदा नृणाम् ॥
पूर्ववत्क्रमयोगेन वीर्यस्तम्भकराऽत्र वै ॥

(रसकामधेनौ ४५७ पृष्ठे)

(३) पात्रूर्ध्वपिष्टिं कनकस्य कृत्वा,
दर्व्याहताभ्रोत्थतिलच्छदाभिः ।
श्लेष्मातकस्यापि तथा च पथ्या
स्यात्कोकिलाक्षस्य जलैर्जलौका ॥

(रसरत्नप्रदीपे, रसकामधेनौ ४५७ पृष्ठे च)

(४) सूते गर्भनियोजितार्धकनके पादांशनागेऽथवा
पञ्चांगुष्ठकशाल्मली कृतमदाश्लेष्मातबीजैस्तथा ।
तद्वत्ते जिनिकोलकाख्यफलजैश्चूर्णं तिलं पत्रकं
तप्ते खल्लतले निधाय मृदिते जाता जाता जलूका वरा॥
सैषा स्यात्कपिकच्छुरोमपटले चन्द्रावती तैलके
चन्द्रे टङ्कणकामपिप्पलिजले स्विन्ना भवेत्ते जिनी ।
तप्ते खल्लतले विमर्द्य विधिवद्यत्नाद्वटी या कृता
सा स्त्रीणां मददर्पनाशनकरी ख्याता जलूका वरा ॥

(५) धृत्वा सूतमुखे पात्रं मेषीक्षीरं प्रदापयेत् ।
स्थापयेदातपे तीव्रे वासराण्येकविंशतिः ॥
द्वितीयात्र मया प्रोक्ता जलौका द्रावणे हिता ।
पुरुषाणां स्थिता मूर्ध्नि द्रावयेद्बीज मद्भुतम् ॥

(६) त्रिफलाभृङ्गमहौषधमधुसर्पिश्छागदुग्धगोमूत्रे ।
नागं सप्तनिषिक्तं समरसजारितं जलूका स्यात् ॥

(रसरत्नसमुच्चये, अ० ११)

(७) गोपालकर्कटीमेषशृङ्गयोः पञ्चाङ्गमाहरेत् ।
कृत्वा तन्मूलिकान्तःस्थं रसं क्षिप्त्वा धमेत्पुनः ॥

स्तभ्यते तेन तं तोरीलज्जालुरसमर्दितम् ।
जलौकारसमाहुस्तं रसशास्त्रविशारदाः ॥

(रसराजलक्ष्म्यां, रसकामधेनौ ४५७ पृष्ठे च)

जलौकाबन्ध समाप्त ॥

अथ खेचरीगुटीबन्धः (वीर्यरोधिनी गुटिका)

रसचिन्तामणौ—

(गुटीनिर्माणविधिः)—

रसं टङ्कत्रयं शुद्धं कृष्णधत्तूरबीजजे ॥ ४११ ॥
तैले पलद्वये खल्वे १मर्दितं दिनसप्तकम् ।
२तावद्यावद्भवेत्तस्य जलौकारूपमुत्तमम् ॥४१२॥
माषान्नपिष्टकेनादौ दृढसूत्रेण वेष्टयेत् ।
३वर्तिं कृत्वा ततो गाढं शोषये४द्रविणा च ताम्४१३
दशप्रस्थमिते तैले सर्षपस्य विपाचयेत् ।
तैलक्षयो भवेद्यावत्तावत्५साऽप्यवतार्यते ॥ ४ १४ ॥
स्निग्धच्छाये निवेश्याथ शनैः सिद्धां च तां नयेत् ।
दुग्धेनापूर्यते कुम्भः शुभस्तत्र निवेशयेत् ॥४१५॥
विशोष्य सकलं दुग्धं गुटिका यदि तिष्ठति ।

१—'मर्दयेत्', २—'यावत्तावत्', ३—'कणिक्यया', ४—'रवितापतः', ५--'स्थाप्या' इति च पाठांतरं रसकामधेनौ

(गुटीपरीक्षा)

अर्करस्य मुखे पश्चाद्गुटिकां तां १प्रयच्छति ॥४१६॥
प्रविष्टा तन्मुखस्यान्तर्ज्वलमानेव २तद्धृदि ।
व्याकुलं कुरुते कामं ३देहे स्वास्थ्यं न तस्य वै ४१७
उदरस्था यदा ४स्यात्तु तदाऽसौ म्रियते पशुः ।
५गुटिकायाः परीक्षां च कृत्वैवं बुद्धिमान्नरः ॥४१८॥

(गुटीगुणाः)

स्वकीये वदने पश्चाद् धृत्वा शुभ्रां निरामयाम् ।
योजनानां शतं ६गच्छेदनायासेन साधकः ॥४१९॥
स्त्रीणां शतं तथा गच्छेच्छुक्रस्तम्भकरी मता ।
मुखस्थायामहो तस्यां प्रहारो नैव जायते ॥४२०॥
अन्येऽपि बहवो रोगा मुखस्था ७दन्तघातिनः ।
जिह्वातालुगता ये ते कण्ठशालूककादयः ॥४२१॥
उपजिह्वा द्विजिह्वा ८च ह्यधिजिह्वा सुदारुणाः ।

१—'प्रदापयेत्', २—'तं दृढं', ३—'देहस्वास्थ्यं', ४—'भूयात्' इति च पाठान्तरं रसकामधेनौ । ५—'इत्यर्धश्लोकोऽधिके उपलभ्यते रसकामधेनौ, ६—'अप्रयासेन', ७—'यान्ति संशयम्' इति च पाठान्तरं रसकामधेनौ । ८—'च ह्यधिजिह्वा' इत्ययं पाठो रसकामधेनुपाठसंवादादस्माभिः स्वीकृतः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'स्याद्धधिजिह्वा' इति पाठः समुपलभ्यते ।

सप्तषष्टिषु ये मध्ये, हृद्रोगाः पीनसादयः ४२४॥
१तांस्तांश्च नाशयत्येषा गुटिका २नाम खेचरी ॥

इति खेचरीगुटीबन्धः ॥

प्र०—जलौकाबन्धानन्तरं गुटीबन्धसादृश्यात् वीर्यरोधिन्यपराभिधेयां खेचरीगुटीमाह—रसमिति। स्पष्टम् टङ्कत्रयं= शाणत्रयं (अर्वाचीनमानेन नवमाषकम्) अस्या 'वीर्यरोधिनी गुटिका' इति नामान्तरमुपलभ्यते रसकामधेनौ (५०२-५०३ पृष्ठे)। अत्रानुष्टुप्छन्दः॥ ४११-४२२।

रसचिन्तामणि में वर्णित—

खेचरी गुटीबन्ध (वीर्य रोधिनी गुटिका)।

उ०—गुटीनिर्माणविधि—एक खरल में तीन टंक आधुनिक मान से ९ माशा) शुद्ध पारद, को दो पल (८तोला) काले धतूरे के बीजों के तैल में उत्तम जलौका (जोंक) के आकार के समान होने तक सात दिन मर्दन करे, और उड़द की पिट्ठी (पिष्टि) में रखकर दृढ़ सूत के धागे से लपेटे तथा मज़बूत बत्ती बनाकर धूप में सुखादे, फिर उस बत्ती को दशप्रस्थ (८ सेर) सरसों के तैल में पकावें, जब तैल जलजाय तब उसको उतार कर छायामें रखदे, फिर पारद के बँधजाने पर बनीहुई गुटी (गोली) को दूध भरे हुये एक घड़े में डालदे, तो वह गुटी (गोली) सब दूध को सुखा देगी।

१—'तान् सर्वान्'।
२—'वीर्यरोधिनी' इति च पाठान्तरं रसकामधेनौ।

गुटी की परीक्षा—

यदि वह गुटी (गोली) घड़े के सब दूध को सुखा दे, तब उसको घड़े में से निकाल कर, फिर एक काले बकरे के मुख में रखदे, मुख में स्थित हृदय में दाह उत्पन्न करती हुई वह गुटी, उस बकरे को अत्यन्त व्याकुल कर देती है और उसके शरीर का स्वास्थ्य भी ठीक नहीं रहताहै, जब वह गुटी बकरे के पेट में पहुँच जाती है तब वह पशु मर जाता है. बुद्धिमान् पुरुष इस प्रकार बकरे पर गुटी की परीक्षा करे।

गुटी के गुण—

साधक पुरुष, गुटी की इस प्रकार परीक्षा करने के अनन्तर रोग रहित इस सफेद गुटी को अपने मुख में रख कर श्रम (थकावट) को अनुभव किये बिना ही, सौ योजन (४०० कोस) चल सकता है, तथा सौ स्त्रियों से मैथुन कर सकता है यह अत्यन्त वीर्यस्तम्भ कारिणी मानी गई है, इसको मुखमें धारण करनेके समय कोई प्रहार नहीं होताहै, यह दन्तघातक मुख के रोग तथा मुख के सड़सठ (६७) रोगों में से भयंकर जीभ तथा तालु, के जो उपजिह्वादि रोग तथा कण्ठ (गले) के कण्ठशालूक, अधिजिह्वा आदि रोग तथा हृदय के ५ रोग तथा पीनस सब रोगों नष्ट कर देती है।

॥ ४११–४२२ ॥

ज्ञातव्य—माधव ने यह खेचरगुटी, रसचिन्तामणि से उद्धृत की है, रसकामधेनु (पृष्ठ ५०२-५०३) में भी यह मिलती है, परन्तु उसमें इसका नाम वीर्यरोधिनो गुटिका

लिखा मिलता है इस गुटी में भी जलौकाबन्ध की भांति पारद का बन्धन और स्वरूप (तावद्यावद्भवेत्तस्य) भी होता है, इसलिये जलौकाबन्ध के पश्चात्, इस खेचरीगुटी बन्ध का वर्णन यहाँ पर किया गया है।

(नित्यनाथोक्त रसमूर्च्छनम्)

अथ नित्यनाथेन रसमूर्च्छनमुक्तम्--

मेघनादवचाहिङ्गुलशुनैर्मर्दयेद्रसम् ॥ ४२३ ॥

नष्टपिष्टं तु तद्गोलं हिङ्गुना वेष्टयेद्बहिः।
पचेल्लवणयन्त्रस्थं दिनैकं चण्डवह्निना ॥४२४॥

ऊर्ध्वलग्नं समादाय १दृढं वस्त्रेण २बन्धयेत् ।
ऊर्ध्वाधो गन्धकं तुल्यं ३रसं दत्वाऽनले पचेत्॥४२५॥

जीर्णे गन्धे ४पुनर्देयः षड्भिर्वारैः ५समः समः ।
षड्गुणे गन्धके जीर्णे मूर्छितो रोगहा भवेत् ॥४२६ ॥

---

१ आनन्दकन्दरसमञ्जर्योः पाठसंवादेनायं पाठो ऽस्माभिः स्वीकृतः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'दृढवस्त्रेण' इति पाठः समुपलभ्यते ।

२ 'वेष्टयेत्' इति पाठान्तरं रसमञ्जर्याम्।

३ 'दत्वा सौम्यानले'। ४ 'देयं'।

५ 'समं समम्' इति पाठान्तरमानन्दकन्दे रसमञ्जर्यां च।

प्र०—नित्यनाथोक्तं रसमूर्च्छनमाह—मेघनादेति—मेघनादादिभिः सह रसं=पारदं मर्दयेत्, नष्टपिष्टं तु तद्गोलं बहिः =बहिर्भागे हिङ्गुना वेष्टयेत्, तदनन्तरं तल्लवणयन्त्रस्थं कृत्वा लवणयन्त्रे निधायेत्यर्थः, दिनैकं चण्डवह्निना=तीव्राग्निना पचेत् ऊर्ध्वलग्नं च पारदं समादाय=गृहीत्वा दृढं वस्त्रेण बन्धयेत्, तस्योर्ध्वाधस्तुल्यं=समभागं गन्धकं दत्वा तं रसं=पारदमनिले= मन्दानले पचेत्, गन्धे=गन्धके जीर्णे सति, षड्भिर्वारैः समः समः =समभागो गन्धको देयः, षड्गुणे गन्धके जीर्णे सति मूर्च्छितः पारदो रोगहा=व्याधिनाशको भवेत्। अत्रानुष्टप्छन्दः ४२३–४२६॥

नित्यनाथ के मत से रस (पारद) मूर्च्छन।

उ०—चौलाई, बच, हींग और लहसन के रस से पारद को घोट गोला बनाकर हींग का लेप करे और फिर उस गोला को लवण यन्त्र में रखकर, एक दिन तक तीव्र अग्नि से पकावे, तत्पश्चात् उड़कर ऊपर लगे हुये पारद को लेकर मज़बूती से कपड़े में बांधदे और ऊपर नीचे समान गन्धक रखकर उस पारद को मन्दमन्द अग्नि से पकावे, गन्धक जलजाने पर, छै बार समान भाग गन्धक डालता रहे इस प्रकार षड्गुण (छै गुना) गन्धक जीर्ण होने पर मूर्च्छित हुआ पारद रोगों को नाश करने वाला होता है ॥४२३–४२६॥

ज्ञातव्य—माधव ने यह पारद की मूर्च्छनविधि, रसमंजरी (अ० २। ४६-४८) से उद्धृत की है, परन्तु रस शास्त्र के अत्यन्त प्राचीन रसग्रन्थ 'आनन्दकन्द' (पृष्ठ १५२) मे भी यह मूर्च्छनविधि है, इसलिये यह विधि अत्यन्त प्राचीन समझनी चाहिये, 'आनन्दकन्द' में १७६ पृष्ठ में कुछ

पाठान्तर से फिर द्वितीय बार भी यह मूर्छनविधि लिखी गई है।

(मूर्च्छितलक्षणम्)

कज्जलाभो यदा सूतो विहाय घनचापलम्।
*मूर्च्छितस्तु तदा ज्ञेयो नानावर्णोऽपि च क्वचित्॥
॥ ४२७ ॥

प्र०—मूर्च्छितपारदस्य लक्षणमाह—कज्जलाभ इति—यदा सूतः=पारदः, घनचापलं विहाय, कज्जलाभः=कज्जलसदृशः कृष्णवर्णो भवेत्तदा मूर्च्छितो ज्ञेयः, स पारदः क्वचित् नानावर्ण=अनेकवर्णोऽपि भवेत्। अत्रानुष्टुप्छन्दः॥ ४२७॥

मूर्च्छितपारद का लक्षण।

उ०—जब पारद अपनी अत्यन्त चञ्चलता को छोड़कर, कज्जली के समान काला हो जाता है, तब उसको मूर्च्छित समझना चाहिये। यह कभी कभी संयोगवश अनेक रङ्ग का भी होता है॥ ४२७॥

ज्ञातव्य—माधव ने यह श्लोक, रसमञ्जरी (अ० २।५४) से उद्धृत किया है, रसेन्द्रसारसंग्रह (अ० १।५६) में भी यह श्लोक है, कुछ पाठान्तर से रसार्णव में भी यह श्लोक है, जो रसकामधेनु (पृष्ठ ३१६) में भी उद्धृत हुआ मिलता है।

---

१ 'दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितः सुतरां बुधः' इति पाठान्तरं रसमञ्जर्याम्।

(मूर्च्छित फलम्)

मारितो देहसिद्ध्यर्थं १मूर्च्छितो व्याधिनाशने ।
रसभस्म क्वचिद् २रोगे देहार्थे मूर्च्छितं क्वचित् ॥
॥ ४२८ ॥

प्र०—मूर्च्छितपारदस्य फलमाह—मारितमिति—मारितः पारदो देहसिद्ध्यर्थं भवति, मूर्च्छितः पारदो व्याधिनाशने = रोगहरणे समर्थो भवति, रसभस्म = पारदभस्म क्वचिद्रोगे, मूर्च्छितं क्वचिद्देहार्थे = देहसिद्ध्यर्थंमपि समर्थो भवति । अत्रानुष्टप्छन्द, ॥ ४२८ ॥

मूर्च्चित पारद का फल ।

उ०—मरा हुआ (भस्मरूप) पारद, देहसिद्धि के लिये होता है और मूर्च्छित पारद रोगों को नष्ट करने में समर्थ होता है । कभी कभी पारद भस्म, रोग नाश करने में और मूर्च्छित पारद. देहसिद्धि के लिये भी प्रयुक्त होता है ॥ ४२८ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसमंजरी (अ० २।५२) से उद्धृत किया है ।

मूर्च्छित पारद, प्रधानतया रोगनाशक होता है, ऐसा सब ग्रन्थों से प्रमाणित होता है ।

---

१ ' मूर्च्छितं ' । २ ' योगे ' इति च पाठान्तरं मुम्बय्यां मुद्रितायुर्वेदप्रकाशे, अस्माभिस्तु रसमञ्जरीपाठसंवादादेतयोः स्थाने मूर्च्छितः, रोगे इति साधीयान् पाठः स्वीकृतः ।

(१) मूर्च्छितो हरते व्याधिम्.... ।

(रसार्णवे, रसकामधेनौ ३१७ पृष्ठे च)

(२) मूर्च्छितो व्याधिनाशनम् ।

(रसार्णवे, रसकामधेनौ ३१८ पृष्ठे च)

(३) मूर्च्छित्वा हरति रुजम् ।

(रसहृदये, रसरत्नसमुच्चये १-३३ श्लोके च)

(४) मूर्च्छितो गदहृत.... ।

(रसराजलक्ष्म्यां, रसकामधेनौ ३१६ पृष्ठे च)

(५) हरति सकलरोगान् मूर्च्छितोयो नराणाम् ।

(रसमञ्जर्याम्, अ० १-६)

(६) मूर्च्छितो व्याधिघातकत्वं मूर्च्छना ।

(रसेन्द्रसारसंग्रहे, अ० १—६)

(७) अथाव्यभिचरितव्याधिघातकत्वं मूर्च्छना ।

(आयुर्वेदप्रकाशे, अ० १-४० रसेन्द्रचिन्तामणि अ० २-२च)

(अथ रसभस्मीकरणम्)

तत्रोर्ध्वभस्म यथा रसासिन्दूराख्यम्—

(रससिन्दूरस्य प्रथमो विधिः)

सूतः पञ्चपलः स्वदोषरहितस्तत्तुल्यभागो बलि

द्वौ टङ्कौ[1] नवसादररय तुवरीकर्षश्च सम्मर्दितः ।

---

१ 'नवसागरस्य' इति पाठान्तरं रसपद्धतिटीकायामुद्धृते श्लोके ।

*कूप्यां काचभुवि स्थितश्च सिकतायन्त्रे त्रिभिर्वासरैः,
पक्वो वह्निभिरुद्भवत्यरुणभाः सिन्दूरनामा रसः॥
॥ ४२९ ॥

प्र०—ऊर्ध्वभस्मनाम्ना प्रसिद्धं रससिन्दूरमाह—सूत इति—स्वदोषरहितः = विषवह्निमलदोषरहितः, सूतः = पारदः पञ्चपलः, बलिः = गन्धकः, तत्तुल्यभागः = पारदसमभागः पञ्चपल इत्यर्थः, नवसादरस्य द्वौ टङ्कौ = द्वौ शाणौ, तुवरीकर्षञ्च = तुवर्याः = स्फटिकायाः कर्षश्च, सम्मर्दितोऽयं पारदादिसमूहः, कूप्यां काचभुवि = अधस्तले स्थितश्च तदनन्तरं सिकतायन्त्रे बालुकायन्त्रे त्रिभिर्वासरैः = दिनत्रयं वह्निभिः = मन्दमध्यतीव्राग्निभिः पक्वः, अरुणभाः = अरुणकान्तिः सिन्दूरनामारसः = रससिन्दूराख्यो रसः, उद्भवति जायते, अत्र शार्दूलविक्रीडितं वृत्तम् ॥ ४२६ ॥

रस (पारद) भस्म विधान ।

उ०—पारदभस्म, ऊर्ध्वभस्म (शीशी के गले में ऊपर लगाने वाली) तथा तलभस्म भेद से दो प्रकार की होती है, इनमें से पारद की ऊर्ध्वभस्म, रससिन्दूर नाम से प्रसिद्ध है, उसके बनाने की विधि यहाँ पर लिखी जाती है।

ज्ञातव्य—पारद की भस्म लाल काली आदि भेद से कई प्रकार की होती है, इसका विस्तारपूर्वक वर्णन (४४६–४५०) श्लोक की उद्योत व्याख्या में देखिये।

---

* 'कूपे काचकृते' इति पाठान्तरं रसपद्धतिटीकायामुद्धृते श्लोके।

रससिंदूर निर्माण की प्रथमविधि ।

विष आदि अपने स्वाभाविक दोषों से रहित शुद्ध पारद पाँच पल (२० तोला), पारद के समान भाग शुद्धगन्धक अर्थात् पाँच पल (२० तोला), शुद्ध नौसादर दो टंक (६ माशा), शुद्ध फिटकरी (तवा पर भुनी हुई फिटकरी का फूला) एक कर्ष (१ तोला), इन सब औषधियों को खरल में दृढ़ता पूर्वक घोटकर सात कपड़मिट्टी की हुई आतशीशीशी में (आधे भाग तक) भरकर बालुकायन्त्र में तीन दिन तक मन्द, मध्य और तीन अग्नि द्वारा पकावे, फिर अग्नि बन्द करदे, तो स्वाङ्ग शीतल होने पर शीशी को फोड़कर देखने पर शीशी के ऊपर गले में लाल रंग का रससिन्दूर मिलेगा ॥

॥ ४२६ ॥

ज्ञातव्य—रससिन्दूर का यह पाठ, रसपद्धति की टीका (पृष्ठ५८) में भी उद्धृत हुआ मिलता है । मूल रसपद्धति में चतुर्थांश गन्धक का योग लिखकर अर्ध तथा समभाग गन्धक के योग से रससिन्दूर निर्माण करने का भी उल्लेख किया है । यथा—

सूतं पञ्चपलं सपादपलकं गन्धं च टङ्कद्वयं,
चुल्लीलोणमथो विमर्द्य सकलं कांदयास्तु कर्षं पुनः ।
यद्वा गन्धसमं तदर्धमथवा यन्त्रे दृढे शार्करे,
कूप्यां घस्रचतुष्टयं रसवरःसिन्दूरतुल्यो भवेत् ॥

(रसपद्धत्यां श्लोक ८३)

(रससिन्दूरस्य द्वितीयो विधिः)

रसराजलक्ष्म्यां तु—

कूपी सप्तमृदंशुकैः परिवृता शुष्काऽत्र गन्धेश्वरौ,
१तुल्यौ तौ नवसारपादकलितौ सम्मर्द्य २तस्यां न्यसेत्।
३तां यन्त्रे सिकताख्यके तलबिले पक्त्वाऽर्कयामं ४हिमां
भित्वा कुङ्कुमपिञ्जरं रसवरं ५भस्माददीतोत्तमम् ॥
॥ ४३० ॥

प्र०-रसराजलक्ष्म्यां निर्दिष्टं रसन्दिूरस्य द्वितीयं विधिमाह-कूपीति-अत्र = रससिन्दूरे पूर्वं सप्तमृत्कर्पटैः परिवृता शुष्का कूपी = काचकूपी ग्राह्या, तदनन्तरं खल्वे, तुल्यौ = समभागौ तौ रससिन्दूरे प्रधानोपादानस्वरूपेण प्रसिद्धौ गन्धेश्वरौ = शुद्धगन्धक पारदौ नवसारपादकलितौ — चतुर्थांशनवसादरयुतौ सम्मर्द्य तस्यां = कूप्यां न्यसेत् = निक्षिपेत् । तां = कूपीं सिकताख्यके यन्त्रे = बालुकायन्त्रे तलबिले निधाय ऽर्कयामं = द्वादशप्रहरं पक्त्वा, हिमां = स्वाङ्गशीतलां च तां भित्वा = स्फोटयित्वा कुङ्कुमपिञ्जरं = कुङ्कुमसदृशवर्णम्, श्रेष्ठं रसवरं भस्म = पारदभस्म, रससिन्दूर-

---

१ 'तुल्यांशौ'। २ 'यामं'। ३ 'सा'। ४ 'हिमं'। ५ 'भस्माददेद्वैद्यराट्' इति च पाठान्तरं रसपद्धतिटीकायामुद्धृते श्लोके ।

मित्यर्थः, आददीत = गृह्णीयात्, वैद्य इति शेषः। अत्र शार्दूलविक्रीडितं वृत्तम्॥ ४३०॥

रससिन्दूर की द्वितीय विधि।

७८—रसराजलक्ष्मी ग्रन्थ में रससिन्दूर की निम्न लिखित विधि मिलती है—

वैद्य, रससिन्दूर बनाने में, सबसे पहिले सात बार कपड़मिट्टी कर धूप में सुखाई हुई आतशीशीशी लेनी चाहिये, फिर एक खरल में, रससिन्दूर के प्रधानद्रव्य समानभाग शुद्ध पारद तथा शुद्ध गन्धक और चौथाई ($\frac{1}{4}$) भाग नौसादर को पीस कज्जली बनाकर, उस आतशीशीशीमें भरदे, फिर उसको बालुका यन्त्र में हांडी के छिद्रपर रखे हुये श्वेत अभ्रक पत्र के ऊपर स्थापित कर, भट्टीपर चढाकर बारह प्रहर (३६ घण्टे) की मन्द, मध्य तथा तीव्र अग्नि द्वारा पकाकर, स्वाङ्गशीतल होने पर सावधानी से फोड़कर केशर के समान वर्ण वाले उत्तम रससिन्दूर (पारद भस्म) को गृहण करे॥ ४३०॥

ज्ञातव्य-माधव ने रससिन्दूर की यह विधि, रसराजलक्ष्मी ग्रन्थ से उद्धृत की है, रसपद्धति की टीका (पृष्ठ ५६) में भी उद्धृत हुई मिलती है। रसतरङ्गिणी (षष्ठतरंग, श्लो० १८५) का "समान गन्धकजीर्ण रससिन्दूर" इसी विधि का अनुवाद मात्र है।

(रससिन्दूरनिर्माणे विशेषज्ञेयांशः)

अन्यच्च—

पाके रुद्धं मुखं कूप्या नवसारेण जायते ।
ततः शलाकया कुर्यात्कूपिकानाशशान्तये ॥ ४३१ ॥
अनेन विधिना पाका यावन्तोऽस्य भवन्ति हि ।
तावन्तो हि गुणोत्कर्षा जायन्ते रसभस्मनः ॥४३२॥

प्र०—रससिन्दूरनिर्माणे विशेषज्ञेयांशं निर्दिशन्नाह—पाक इति—पाके = रससिन्दूरपाके, नवसारेण = नवसारेण कूप्या मुखं रुद्धं जायते, ततः तस्माद्धेतोः, कूपिकानाशशान्तये = कूपिका रक्षणाय, शलाकया = अग्नितप्तशलाकया, कुर्यात् = कूपीमुखनिरोधकनवसारादिनिरसनं कुर्यात्, अनेनविधिना अस्य रसभस्मनः = रससिन्दूरस्य यावन्तः पाका भवन्ति, तावन्त एव गुणोत्कर्षा जायन्ते । अत्रानुष्टप्छन्दः ॥ ४३१ । ४३२ ॥

रससिन्दूरनिर्माण में विशेष ज्ञातव्य बात ।

उ०—रससिन्दूर के पाक में, अधिकतर नौसादर के उड़कर आतशीशीशी के गले में लग जाने से, शीशी का मुख रुक जाता है, धूआं रुकने से शीशी के टूटने का भय रहता है, इसलिये शीशी को टूटने से बचाने के लिये, अग्नि में खूब गर्म कर तपाई हुई लोहे की शलाका (सलाई) को शीशी के मुख में डाल कर, शीशी के मुख को रोकने (बन्द करने) वाले नौसादर को दूर करदे, इसविधि से रससिंदूर के जितने

अधिक पाक होते हैं, इसके उतने ही अधिक गुण होते हैं ॥ ४३१-४३२ ॥

ज्ञातव्य—रसतरङ्गिणी में जीर्णगंधपारद (पारद में मिले गंधक के जीर्ण होने) की निम्नलिखित परीक्षा भी लिखी है—

जीर्णगन्धक पारद की परीक्षा ।

बालुकायंत्र में रखी हुई आतशीशीशी के मुख से जब गोरोचन के समान पीले रंग का धूआं निकलना बन्द हो जाय, तब चतुर रसवैद्यों को पारद में मिश्रित गंधक का जारण हो चुका है, यह समझ लेना चाहिये, यह ही जीर्णगन्ध पारद की परीक्षा है। यथा—

बालुकायन्त्रके काचकूपीमुखात्,
रोचनासन्निभो नैति धूमो यदा ।
सूतपाकक्रियाज्ञानदक्षैर्बुधै,
र्वेदितव्यस्तदा जीर्णगन्धो रसः ।
(रसतरङ्गिणी, तरंगः ६।१६५)

रसतरङ्गिणी, में समभाग पारदगंधक की कज्जली से बनाये गये इस रससिंदूर की पूर्ण विधि निम्नलिखित है—

तोलकाष्टकमितं रसेश्वरं,
तन्मितं च विमलं बलिं हरेत् ।
खल्वके खलु विमर्द्य कज्जलीं,
भावयेदथ वटाङ्कुराम्बुभिः ।

मषीपात्रसमाकारां सुश्लक्ष्णां काचकूपिकाम् ।
सतूलकुट्टितमृदा लेपयेत्खलु यत्नतः ॥
स्थापयेत्कज्जली काचकुप्यां,
ततो यत्नतः पाचयेद्वालुकायन्त्रगाम् ।
अग्निवृद्धिक्रमै र्जीर्णगन्धे रसे,
रोधयेद्युक्तितः काचकूपीमुखम् ॥

बालुकायन्त्रके काचकूपी मुखात् रोचना सन्निभो नैति धूमो यदा ।
सूतपाकक्रियाज्ञानदक्षैर्बुधैर्वेदितव्यस्तदा जीर्णगन्धो रसः ॥
निवेश्य कुप्यां खटिकाभिधानं जलेन सम्पेषितया प्रकामम् ।
प्रलेपयेद्वै गुडचूर्णपिष्टया ततः पचेद्यामयुगं रसज्ञः ॥
अबबुध्य तदङ्गशीततां खलु बालारुणसूर्यसन्निभम् ।
गलदेशविलग्नमुज्ज्वलं रससिन्दूरमिहाहरेद् बुधः ॥

(रसतरङ्गिणी, तरंग ६ । १६२ । १६७)

रसतरङ्गिणी में इस गन्धकजीर्ण रससिंदूर के अतिरिक्त, अर्द्ध गन्धक जीर्ण, द्विगुण गंधकजीर्ण, त्रिगुणगंधकजीर्ण तथा षड्गुणगंधकजीर्ण रससिंदूर की निर्माण विधि भी लिखी है । यथा—

अर्द्धगन्धकजीर्ण रससिन्दूर ।

तोलकाष्टकमितो रसेश्वरः कर्षकद्वयमितश्च गन्धकः ।
नव्यसार इह कर्षसम्मितःपेषयेदथ च लुङ्गवारिभिः ॥
कूपिकागतमथ प्रबुद्धधीः सम्पचेत्सिकतयन्त्रके भिषक् ।
शास्त्रवित्खलु विमर्द्य कूपिकां हिङ्गुलाभमिह सूतमाहरेत ॥

(रसतरङ्गिणी, तरङ्ग ६ । १८३ । १८४)

द्विगुणगंधकजीर्ण रससिन्दूर ।

पामारिं विमलं पलद्वयमितं सूतं पलैकोन्मितं ।
सम्मर्द्याथ विभावयेद्धि कुसुमैः रक्ताकाभर्पासजैः ॥
कूपीमध्यगतं पचेच्च सिकतायन्त्रे त्वहोरात्रकम् ।
राजीवोपममूर्ध्वभागनिचितं सिन्दूरकञ्चाहरेत् ॥

त्रिगुणादिगंधकजीर्ण रससिन्दूर ।

अनेनैव विधानेन गन्धकं वर्द्धयन् क्रमात् ।
रसकर्मविशेषज्ञो रससिन्दूरमुद्धरेत् ।
जीर्णगन्धे रसे जाते क्रमागतदिनक्रमैः ।
यामद्वयं ततः प्राज्ञै रसपाको विधीयते ॥

षड्गुणगंधकजीर्ण रससिन्दूर ।

पामारिं विमलो ऽङ्गसङ्ख्कपलः सूतस्य चैकं पलं ।
सम्पेष्याथ विभावयेद् बुधवरो यामं कुमारीरसैः ॥
कूपीमध्यगतं विधाय सिकतायन्त्रे ततः सम्पचेत् ।
गाढं वासरसप्तकञ्च विधिना सिन्दूरकञ्चाहरेत् ॥

(रसतङ्गिणी, तरंग ६ । १८६ । १८९)

विशेष ज्ञातव्य —

१—अन्य रसग्रन्थों में यह षड्गुण गंधकजीर्ण रससिंदूर विश्वामित्र ऋषि का बनाया हुआ लिखा है । यह ५०६ रोगों का नाशक माना गया है। यथा—

हिङ्गुलोत्थरसं भागं षड्भागं शुद्धगन्धकम् ।
खल्वमध्ये विनिक्षिप्य कुमारीरसमर्दितम् ॥
काचकूप्यां विनिक्षिप्य बालुकायन्त्रगं हरेत् ।
पाचयेत्सप्तरात्राणि, सिन्दूरं भवति ध्रुवम् ॥
....

शतानि पञ्चषट्कं च रोगाणां नाशयेद्ध्रुवम् ।
नाम्ना षड्गुणगन्धोऽयं विश्वामित्रेण निर्मितः ॥
(बृहद्रसराजसुन्दरे, २७ पृष्ठे)

२—समगुणगंधकजीर्ण रससिंदूर ही 'उदयभास्कर रस' नाम से रसप्रकाशसुधाकर ग्रन्थ में लिखा गया है। यथा—

विगतदोषकृतौ रसगन्धकौ तदनु लुङ्गरसेन परिप्लुतौ ।
प्रहरयुग्ममितं च शिलातले रविकरेण विमर्द्य विचूर्णितौ ॥
रुचिरकाचघटीविनिवेशितौ सिकतयन्त्रवरेण दिनत्रयम् ।
कुरु भिषग्वर ! वह्निमधस्ततः स च भवेदरुणः कमलच्छविः॥
उदयभास्करनामरसो ह्ययं भवति रोगविघातकरः स्वयम्।
(रसप्रकाशसुधाकरे अ० ३।१०-१२)

३—द्विगुणगन्धकजीर्ण रससिन्दूर ही कई रसग्रन्थों में तथा वैद्योंमें हरगौरीरस नाम से प्रसिद्ध है। यथा—

रसभागो भवेदेको गन्धको द्विगुणो मतः ।
खल्वे कज्जलिसंकाशं काचकूप्यां क्षिपेत्सुधीः ॥
खर्परे बालुकापूर्णे स्थापयेत्तत्र कूपिकाम् ।
इष्टिकां च मुखे दत्वा कृत्वा कर्पटमृत्तिकाम् ॥
सप्तविंशतियामश्च सिताकूपीं विपाचयेत् ।
पश्चादूर्ध्वसमायातं, रसं ज्ञात्वा विचक्षणः ॥

हंसपादसमंवर्णं निष्पन्नं रसमादिशेत् ।
हरगौरीरसो देयः सर्वरोगप्रशान्तये ॥

(बृहद्रसराजसुन्दरे २·७ पृष्ठे)

रससंकेतकलिका में तृतीयांशगन्धकजीर्ण तथा समगन्धकजीर्ण रससिन्दूर का नाम भी हरगौरीरस लिखा है, और धातुक्षय में इसका प्रयोग किया है। यथा–

(१) पारदं तत्तृतीयांशं गन्धं दत्वा तु मर्दयेत् ।
दशांश नवसारेण युतं चोन्मत्तवारिणा ॥
....
पक्वः सुशीतलो ग्राह्यो हरगौरीरसो भवेत् ॥
(२) सूतं गन्धं समं कृत्वा सर्पाक्षीरसमर्दितम् ।
पूर्ववत्पाचितं त्वन्ये हरगौरीरसं विदुः ॥

(रससंकेतकलिका, उल्लास ४।६०-६३)

रससिन्दूर की मात्रा ।

एक वर्ष के रोगी बालक को १/१६ रत्ती, दो वर्ष के बालको १/७ रत्ती, छै वर्ष के बालक को १/३ रत्ती, बारह वर्ष के बालक को १/२ रत्ती की मात्रा में दे, रससिन्दूर की पूर्ण मात्रा १ रत्ती है। यथा—

एकहायनदेशीयं बालकं वीक्ष्य रोगिणम् ।
गुञ्जायाः षोडशो भागस्तत्र मात्रा प्रकल्प्यते ॥
तथा द्विवर्षदेशीये सप्तमो भाग इष्यते ।
रसहायनदेशीये तृतीयं भागमाहरेत् ॥

द्वादशाङ्ककदेशीये गुञ्जार्धं परिकल्पयेत्।
गुञ्जामात्रमिता चास्य पूर्णमात्रा प्रशस्यते॥

(रसतरङ्गिण्यां ६।२३५-२३७)

(रससिन्दूरस्य तृतीयो विधिः)

अन्यच्च—

भागो रसस्य त्रय एव भागा,
गन्धस्य माषः पवनाशनस्य।
सम्मर्द्य गाढं सकलं सुभाण्डे,
तां कज्जलीं २काचकृते निदध्यात् ॥४३३॥
३संवेष्ट्य मृत्कर्पटकैः ४घटीं तां,
मुखे ५सचूर्णां ६गुटिकां च दत्त्वा।
क्रमाग्निना त्रीणि दिनानि ७पक्त्वा,
तां वालुकायन्त्रगतां, ततः स्यात् ॥४३४॥

१—'भागौ' इति रसमञ्जर्यां, २—'काचघटे' इति रसेन्द्रसारसंग्रहे, ३—'संरुध्य' इति योगरत्नाकरे, सम्मर्द्य इति तु रसप्रदीपे, रसेन्द्रसारसंग्रहे, रसपद्धतिटीकायामुद्धृते श्लोके च। ४—'वटीनां' इति योगरत्नाकरे, ५—'सुचूर्णां' इति योगरत्नाकरे, ६—'गुटिकां' इति योगरत्नाकरे 'खटिकां' इति रसेन्द्रसारसंग्रहे, रसरत्नप्रदीपे, रसपद्धतिटीकायामुद्धृते श्लोके च। ७—'पच्यात्' इति रसरत्नप्रदीपे च पाठान्तरम्।

बन्धूकपुष्पारुणमीशजस्य,
भस्म प्रयोज्यं ७सकलामयेषु ।
निजानुपानै र्मरणं जरां च,
८निहन्ति वल्लक्रमसेवनेन ॥ ४३५ ॥

'गन्धस्य भागो नवसादरस्य' इति मुख्यः पाठः । 'भागशब्दस्तु कर्षत्रयवाची' इति वृद्धाः । केचन पवनाशन शब्देन सीसकं व्याचक्षते; तत्तु धातुवादे उपयुज्यते, इति ज्ञेयम् । आरुण्योत्पत्त्यै कूपीमुखे मुद्राकार्या इति केचिद्वदन्ति, अन्ये तु मुद्रामदत्वैव रसभस्म सम्पादयन्ति, यथा सम्प्रदायं व्यवस्था ।

प्र०—रससिन्दूरस्य तृतीयं विधिमाह—भाग इति—रसस्य =पारदस्य भागः=एकोभागः, त्रयः कर्षा इत्यर्थः, गन्धस्य= गन्धकस्य त्रय एव भागः, नवकर्षा इत्यर्थः, नवसादरस्य भाषः= षट्रक्तिका, सकलमेतत खल्वे गाढं यथास्यात्तथा सम्मर्द्य निष्पन्नां तां कज्जलीं काचकृते भाण्डे=काचकूप्यां निदध्यात् = स्थापयेत, निक्षिपेत, तां घटीं मृत्कर्पटैः=सप्तमृत्कर्पटैः संवेष्ट्य मुखे सचूर्णां =गुडचूर्णनिर्मितां गुटिकां च दत्वा, बालुकायन्त्रगतां तां क्रमग्निना=मन्दमध्यतीव्रक्रमवह्निना त्रीणि दिनानि पक्त्वा स्वाङ्गशीतलानन्तरं स्फोटयेत् । ततः=तदनन्तरं बन्धूकपुष्पारुण=बन्धूक

१—'च किलाऽऽमयेषु' इति योगरत्नाकरे, २—'हन्त्यग्य' इति रसेन्द्रसारसंग्रहे, योगरत्नाकरे, रसपद्धतिटीकायामुद्धृते श्लोके रसरत्नप्रदीपे च पाठान्तरम् ।

पुष्पसदृशरक्तवर्णम्, ईशजस्य भस्म = पारदस्य भस्म रससिंदूरमित्यर्थः, सकलामयेषु = निखिलरोगेषु प्रयोज्यं स्यात् । एतद्रससिन्दूरं निजानुपानैः = अग्रिमश्लोकनिर्दिष्टानुपानैः, सह वल्लक्रम सेवन = गुञ्जात्रयमात्रसेवनेन = जरां = वार्द्धक्यं मरणं च निहन्ति अत्र प्रथमश्लोके इन्द्रवज्रावृत्तम्, अन्तिमद्वयश्लोके चोपजातिवृत्तम् ४३३—४३५ ॥

रससिन्दूर की तृतीय विधि।

उ०—मुख्य उपादानद्रव्य— शुद्ध पारद १ भाग (३ कर्ष या ३ तोला) शुद्ध गन्धक ३ भाग (६ कर्ष या ६ तोला) नौसादर १ माशा (६ रत्ती)।

विधि—ऊपर के सब पदार्थों को एक खरल में डालकर दृढ़ता पूर्वक मर्दन कर कज्जली बनावे, फिर इस कज्जली को काँच की शीशी में भर दे। और उस पर सातबार कपड़ मिट्टी कर, उसके मुख में खड़िया मिट्टी की डाट लगाकर चारों ओर गुड़ और चूना के लेप से सन्धि बन्द कर दे, फिर उस शीशी को बालुकायन्त्र में रखकर तीन दिन तक क्रम-से मन्द, मध्यम और तीव्र अग्नि देकर पकावे और स्वाङ्गशीतल हुई शीशी को फोड़ने पर दुपहरिया के फूल के समान लाल रङ्ग का रससिन्दूर (पारदभस्म) मिलेगा, इसका सब रोगों में प्रयोग करना चाहिये, यह तीन रत्ती की मात्रा में आगे के श्लोक में लिखे गये अपने अनुपान के साथ देने से वृद्धावस्था (बुढ़ापा) तथा मृत्यु को दूर करता है।

इस विधि में, 'गन्धस्य माषः पवनाशयस्य' के स्थान में 'गन्धस्य भागो नवसादरस्य' यह प्रधान पाठ है, वृद्ध वैद्यों के मत में भाग शब्द का अर्थ तीन कर्ष है, कुछ वैद्य, पवनाशन शब्द का अर्थ सीसा (नाग) धातु करते हैं। यथा—

अर्धपलं शुद्धरसं कर्ष त्रितयं विशुद्धगन्धस्य ।
....माषमितं स्यात् ॥

(रसकामधेनु पृष्ठ ३७२)

परन्तु सीसा का ऐसा प्रयोग तो ताँबे आदि से स्वर्ण आदि धातु बनाने लिये होता है, यह भी जानना चाहिये। कुछ वैद्य कहते हैं कि रससिन्दूर का उत्तम लाल रङ्ग करने के लिये, पहिले से ही शीशी के मुख पर डाट लगा देनी चाहिये, परन्तु अन्य वैद्य डाट लगाये बिना ही रससिन्दूर बनाते हैं, अपने अपने गुरु सम्प्रदाय के अनुसार यह सब व्यवस्था जाननी चाहिये ॥ ४३३-४३५ ॥

ज्ञातव्य—माधव ने यह विधि, रसरत्नप्रदीप से उद्धृत की है, क्योंकि रसकामधेनु (३७१ पृष्ठ) में भी यह रसरत्नप्रदीप से ही उद्धृत की गई है, रसमञ्जरी (अ० २ । ३३), रसपद्धति की टीका (पृष्ठ ५६) रसेन्द्रसारसंग्रह (अ०१।६२-६४) और योगरत्नाकर में भी यह विधि मिलती है।

अथानुपानानि—

वाते सक्षौद्रपिप्पल्यपि च कफरुजि त्र्यूषणं साग्निचूर्णं

पित्ते १सैलं सितेन्दु व्रणवति २तु वरागुग्गुलश्चारुशुद्धः।
३चातुर्जातेन पुष्टौ हरनयनफला शाल्मली पुष्पवृन्तं
किं वा कान्ता ललाटाभरणमनुरसे पानमेतद्वदन्ति४॥

प्र०—रससिन्दूरस्यानुपानानाह—वात इति—स्पष्टम्। अग्नि चूर्णं = चित्रकचूर्णं। सैलं = एलयासहितं, सिता, इन्दुः = कर्पूरः, हरनयनफला = त्रिफला। कान्ताललाटभरणं = सिन्दूरम् (अत्र रससिन्दूरमित्यर्थः)। अत्रस्रग्धरावृत्तम्॥ ४३६॥

रससिन्दूर का अनुपान।

उ०—रससिन्दूर को वायु के रोग में शहत तथा छोटी पीपल के साथ, कफ के रोग में सोंठ, मरिच, पीपल और चित्रक की जड़ के छाल के साथ, पित्त के रोग में छोटी इलायची, मिश्री और कपूर के साथ, व्रण (घाव) युक्त रोग में त्रिफला और शुद्ध गुग्गल के साथ, शरीर की पुष्टि के लिये दालचीनी छोटी इलायची, तेजपत्र और नाग केशर के साथ, अथवा त्रिफला रससिन्दूर में तथा सेमर की मूसली का अनुपान कहा गया है॥ ४३६॥

ज्ञातव्य—यह श्लोक तथा इससे आगे का श्लोक, योगरत्नाकर में भी मिलते हैं।

१—'सैलासितास्यात्', २—'बृहतीनागराद्रामृताम्बु', ३—'पुष्टौ साज्यत्रियामा', ४—'रसपतेः स्यादनूपानमेतत्' इति इति च पाठान्तरं योगरत्नाकरे।

अथ गुणाः-

अपहरति रोगवृन्दं दृढयति कायं महद्बलं कुरुते ।
शुक्रशतानि च सूते सिंदूराख्यो रसः पुंसाम् ॥४३७॥
स्मरस्यायु र्नानागदगहनदावानलशिखा
परं वह्नेस्तेजो बलरुचिरतावल्लिमुदिरः ।
अपि प्रौढस्त्रीणामतुलबलहारी निधुवने
रसः सिंदूराख्यः सकलरसराजो विजयते ॥४३८॥

मुदिरो = मेघः ।

प्र०—रससिंदूरस्य गुणानाह—अपहरतीति-स्पष्टम । अत्र प्रथमश्लोके, आर्यावृतं द्वितीयश्लोके तु शिखरिणीवृत्तम् ४३७-४३८

रससिन्दूर के गुण ।

रससिन्दूर मनुष्यों के रोग समूह को नष्ट करता है, शरीर को पुष्ट करता है, अत्यन्त बल देता है, वीर्य उत्पन्न करता है, यह कामदेव को जीवन देने वाला है अर्थात् कामशक्ति को बढ़ाने वाला है, अनेकप्रकार के रोगरूपी बन के लिये दावानल की ज्वाला है अग्नि का अत्यन्त दीपक है, बल तथा सुन्दरतारूपी लता (वेल) के लिये बादल स्वरूप है, और मैथुन में प्रौढ़ स्त्रियों के अतिशय बल को हरने वाला है, इसप्रकार सब रसों का राजा यह रससिन्दूर सर्वोत्तम माना जाता है ॥ ४३७-४३८ ॥

(अपथ्यम्)

कूष्माण्डं कर्कटी कोलं कलिंगं करमर्दकम्।
करीरं चेति षट्कादीन् वर्जयेद्रससेवकः ॥ ४३९॥

प्र०— रससिंदूरसेवनेऽपथ्यमाह— कूष्माण्डमिति—रसव =रससिंदूरप्रयोगकर्त्ता कूष्माण्डादीन् षट्कादीन् = ककार आदिर्येषान्तथाभूतान् कूष्माण्डादीन् वर्जयेत्। कोलं = बदरम्॥ अत्रानुष्टप्वृत्तम् ॥४३६॥

अपथ्य।

उ०—रससिन्दूर को सेवन करने वाला पुरुष जिन पदार्थों के प्रारम्भ में ककार (क) अक्षर है, ऐसे कूष्माण्ड (कद्दू, पेठा) ककड़ी, खट्टा बड़ा बेर, तरबूजा, करौंदा और करीर इन छै पदार्थों को छोड़ दे॥ ४३६॥

ज्ञातव्य—यह श्लोक, योगरत्नाकर में भी मिलता है।

(रससिन्दूरस्य योगवाहिकता)

यस्य रोगस्य यो योगस्ते नैव सह योजितः।
रसेन्द्रो हरते व्याधीन्नरकुञ्जरवाजिनाम्॥ ४४०॥

---

* 'रसभुग्वर्जयेन्नरः' इति पाठांतरं योगरत्नाकरे।

रससिंदूरस्य योगवाहिकतामाह–यस्येति–यस्य रोगस्यनाशनो यो योगः = सिद्धप्रयोगोऽस्ति तेनैव योगेन सह योजितो रसेंद्रः = रससिंदूराख्यः, नरकुञ्जरवाजिनाम् = मनुष्यहस्तिहयानां व्याधीन् = रोगान् हरते = विनाशयति ॥ अत्रानुष्टप्छन्दः ॥ ४४० ॥

रससिन्दूर की योगवाहिकता ।

उ०—जिस रोग की नाश करने वाली जो औषधि है उसी औषधि के साथ मिलाकर दिया गया रससिन्दूर, मनुष्य, हाथी और घोड़े के उस रोग को नष्ट कर देता है ॥ ४४० ॥

ज्ञातव्य—माधव ने यह श्लोक, रसमञ्जरी (अ० २ । ६४) रसामृत अथवा भावप्रकाश से उद्धृत किया है ।

अथ सिन्दूररसः—
(अथवा रससिंदूरस्य चतुर्थो विधिः)

शुद्धसूतं तदर्धं तु शुद्धगन्धकमेव हि ।
तयो कज्जलिकां कुर्याद्दिनमेकं विमर्दयेत् ॥४४१॥
मृत्कर्पटैर्विलिप्तायां कूप्यां कज्जलिकां क्षिपेत् ।
वालुकायन्त्रगां यावत्पचेद्यामचतुष्टयम् ॥४४२॥
गृह्णीयादूर्ध्वसलग्नं सिंदूरसदृशं रसम् ॥

इति सिन्दूररसः ॥

प्र०—सिंदूररसं (रससिंदूरस्य चतुर्थविधि) माह—शुद्धेति —शुद्धसूतं = शुद्धपारदं, तदर्धं = शुद्धपारदार्द्धं शुद्धगन्धकं दिनमेकं

खल्वे विमर्दयेत्, इत्थं तयोः = शुद्धपारदगन्धकयोः कज्जलिकां कुर्यात्, मृत्कर्पटैः = सप्तमृत्कर्पटै विलिप्तायां कूप्यां कज्जलिकां क्षिपेत्, तदनु बालुकायंत्रगां = बालुकायत्रे स्थितां तां कूपीं याम चतुष्टयं यावत् चतुःप्रहरपर्यन्तं पचेत् । स्वाङ्गशीतलानन्तरमूर्ध्व संलग्नसिंदूरसदृशं रसं = रससिंदूरं गृह्णीयात् ॥ अत्रानुष्टप्छन्दः ४४१—४४२ ॥

सिन्दूररस (रससिन्दूर की चतुर्थ विधि)

उ०—शुद्ध पारद और शुद्ध पारद से आधा भाग शुद्ध गन्धक लेकर, खरल में एक दिन तक घोटे, इसप्रकार इन दोनों की कज्जली बनाकर, सातबार कपड़ मिट्टी की हुई आतशीशीशी में भरे फिर बालुकायन्त्र में रखकर चार पहर (१२ घण्टे) की अग्नि दे, और स्वाङ्गशीतल होने पर ऊपर शीशी के नाल में लगे हुये सिन्दुररस (रससिन्दूर) को ग्रहण करे ॥ ४४१-४४२ ॥

ज्ञातव्य—माधव ने यह विधि, भावप्रकाश से उद्धृत की है, परन्तु उसमें कुछ पाठान्तर है, रससिन्दूर ही सिन्दूर-रस कहलाता है, इसी लिये वैद्यकशब्दसिन्धु नाम के वैद्यक कोष में 'सिन्दूररस' शब्द का अर्थ रससिन्दूर लिखा है, भावप्रकाश में भी इसप्रयोग का नाम 'सिन्दूररस' लिखा है, परन्तु अन्य रसग्रन्थों में ऐसे प्रयोग रससिन्दूर नाम से लिखे गये हैं, इसप्रकार रससिन्दूर और सिन्दूररस शब्द एकही वस्तु होने के कारण, हमने रससिन्दूर के प्रकरण में यह सिन्दूररस के प्रयोग लिख दिये हैं, वैसे मूल प्रतियों में तथा बम्बई की

आयुर्वेदीय ग्रन्थमाला में मुद्रित मूल आयुर्वेदप्रकाश में, 'रसकर्पूर' के प्रकरण के पश्चात् यह सिन्दूररस के प्रयोग छपे हैं।

अपर सिन्दूररसः (रससिन्दूरस्य पंचमो विधिः पारदस्यारुणं भस्म वा)

अथ रसचिन्तामणौ—

नागार्जुनीति विख्याता दुग्धिका क्षितिमण्डले॥४४३॥
तया विमर्दयेत् सूतं दिनमेकं निरन्तरम् ।
काकमाचीरसैः कार्यं मर्दनं दोषनाशनम् ॥ ४४४॥

पारदो दश टङ्कः स्याद्दशटङ्कश्च गन्धकः ।
नवसारश्च पादः स्यात्त्रयमेकत्र मर्दयेत् ॥४४५॥

काचस्य कूपके कृत्वा मुखं तस्य निरुध्य च ।
अष्टयामावधि यावत्तावत्सूतः प्रपच्यते ॥ ४४६ ॥

एवं निष्पद्यते साक्षात्तरुणादित्यसन्निभः ।
अरुणो भस्मसूताख्यः सर्वकार्यार्थसाधकः ॥ ४४७॥

प्रवालकोमलच्छायो नृणामत्यन्तवल्लभः ॥

प्र०—रसचिन्तामणिनिर्दिष्टं, सिन्दूररसं (पारदस्यारुणं भस्म) आह—नागार्जुनीतीति – क्षितिमण्डले = पृथिव्यां, नागार्जुनीति दुग्धिकानाम्ना विख्याता = प्रसिद्धा, तया = दुग्धिकया

सूतं = पारदं, दिनमेकं निरन्तरं विमर्दयेत्, तदनन्तरं काकमाची-रसैर्दोषनाशनं = पारदस्य दोषनाशनं मर्दनं कार्यम्, इत्थं शुद्धः पारदो दशटङ्कः = दशशाणः (२४० रत्ती = आधुनिकमतेन ३० माशाः), गन्धको दशटङ्कः = पारदसमभागः (३० माशाः) तथा नवसारश्च पादः = पारदस्य चतुर्थांशः (७½ माशाः) एतत् त्रयमेकत्र खल्वे मर्दयेत्, संमर्द्य च काचस्य कूपके = काचकुप्यां कृत्वा तस्य मुखं च निरुध्य, बालुकायन्त्रे ऽष्टयामावधिर्यावत् = प्रहराष्टकपर्यन्तं सूतः = पारदः प्रपच्यते, एवम् = अनेनविधिना सर्वकार्यार्थसाधकः, तरुणादित्यसन्निभः = तरुणसूर्यसदृशः अरुणः = रक्तवर्णो भस्म सूताख्यः—पारदस्यारुणभस्म (पारदस्य रक्तभस्म), निष्पद्यते, एष, प्रवालकोमलच्छायो नृणामत्यन्तवल्लभः = अतिशयप्रियश्चास्ति ॥ अत्रानुष्टप्छन्दः ॥४४३–४४७॥

अन्य सिंदूररस (रससिंदूर की पञ्चमविधि अर्थात् पारद की अरुणभस्म)

उ०—रसचिन्तामणि नाम के रसग्रन्थ में लिखा है कि—

पृथ्वी पर नागार्जुनी, दुग्धिका (दुद्धी) नाम से प्रसिद्ध है, उसके रससे पारद को एक दिन तक लगातार घोटे, फिर मकोय के रस से घोटे, जिससे पारद के दोष नष्ट होजाँय, इसप्रकार शुद्ध हुआ पारद दशटंक (२४० रत्ती आधुनिक ३० माशा), शुद्ध गन्धक माशा, और शुद्ध नौसादर ७½ माशा लेकर इन तीनों को एक खरल में डालकर घोटकर कज्जली बनावे, फिर आतशीशीशी में भर, डाट लगाकर मुख को बन्द कर, बालुकायन्त्र में आठ पहर (२४ घण्टे) तक पकावे, इस प्रकार सब कामों को सिद्ध

करने वाला अरुणसूर्य के समान, पारद की अरुणभस्म (रक्त अथवा लाल भस्म) बनती है। यह प्रवाल (मूंगा) के समान कोमलकान्तिवाली तथा मनुष्यों को अत्यन्त प्यारी है॥ ४४३-४४७॥

ज्ञातव्य—माधव ने यह विधि, 'रसचिन्तामणि' से उद्धृत की है।

(मात्रा, अनुपानं गुणाश्च)

भक्षयेद्रक्तिकाः पञ्च मरिचेन समं रसम् ॥४४८॥
क्षुद्बोधकारकः प्रायः सद्यः कामाग्निदीपनः।
ज्वरादिकानयं दोषान् संयोगान्नाशयत्यपि ॥४४९॥
येषु येषु प्रयुक्तो हि रसो रोगेषु सत्वरम्।
तांश्च तान्नाशयेच्छ्रेष्ठः समर्थो रसपार्थिवः ॥४५०॥

इति सिन्दूररसः।

प्र०—सिन्दूररसस्य मात्रादिकमाह—भक्षयेदिति—पञ्चरक्तिकाः = पञ्चगुञ्जामितं, पारदस्यारुणभस्माख्यं सिन्दूररसम्; मरिचेन समं = मरिच चूर्णेन सह भक्षयेत्। शेषं स्पष्टम्। इदानीमेषा मात्रा अधिका वर्तते, अद्यत्वे तु रक्तिकार्धतो रक्तिकामिता प्रदेया चास्य मात्रा। अत्रानुष्टप्छन्दः॥ ४४८—४५०॥

सिन्दूररस (पारद की लालभस्म) की मात्रा, अनुपान और गुण ।

उ०—मात्रा तथा अनुपान—यह सिन्दूररस (पारद की लालभस्म), पाँच रत्ती की मात्रा में काली मरिच के चूर्ण के साथ देना चाहिये । यह मात्र अधिक है, आजकल तो आधी ($\frac{1}{2}$) रत्ती से एक रत्ती तक की मात्रा में इसका व्यवहार करना चाहिये ॥ ४४८)

गुण—

यह सिन्दूररस भूख लगाने वाला, कामशक्ति का उत्तेजक, तथा ज्वर आदि रोगों को नष्ट कर देता है, यह उत्तम रस, जिन जिन रोगों में दिया जाता है, उन उन रोगों को शीघ्रही नष्ट करदेता है । ४४९-४५० ॥

पारदभस्म ।

ज्ञातव्य—रस केतकलिका में लिखा है कि विभिन्न औषधियों के संयोग से वर्ण (रंग) बदलजाने पर, पारदभस्म (१) रक्त (लाल), (२) पीत (पीला), (३) कृष्ण (काली), (४) नील (नीली), (५) पाण्डुरारुण (पाटल, गुलाबी) भेद से पाँच प्रकार की होती है । परन्तु रसप्रकाश सुधाकर में रक्त और पांण्डुरवर्ण (पाटल) दो भेदों के स्थान में लोहित (लाल) वर्ण की एक ही भस्म मानी है तथा नील भस्म के स्थानमें श्वेतभस्म मानकर, पारदभस्म चार प्रकार की ही मानी है, रसेन्द्रसारसंग्रह में भी यह ही चार प्रकार

माने गये हैं। रसकामधेनु में इन पारदभस्मों में से, कृष्ण (काली) भस्म उत्तम मानी गई है। पारदभस्म के इन भेदों के अतिरिक्त पारद की स्वर्णवर्ण (सुनहरी रंग) की भी भस्म होती है, इसका वर्णन आयुर्वेदप्रकाश (श्लो० ४८२) में आया है, परन्तु इसमें गन्धक का योग नहीं है, शेष भेदों में पारद के साथ गन्धक का भी योग होता है। यथा—

(१) औषधान्तरसंयोगाद्भवये वर्णविपर्ययम् ।
रक्तं पितं तथा कृष्णं नीलं च पाण्डुरारुणम् ॥
(रससंकेतकलिका, उल्लास० १–२६)

(२) अथ मया रसभस्म निगद्यते,
सकलसूतसुशास्त्रनियोगतः ।
ससितकृष्णसुपीतसुलोहितं,
भवति वर्णचतुष्टयभूषितम् ॥
(रसप्रकाशसुधाकर, अ० ३–१)

(३) श्वेतं रक्तं पीतकृष्णं श्यामं कञ्चुकभस्मवत् ।
सर्वेषामुत्तमं कृष्णं जरादारिद्र्यमृत्युजित् ॥
(४) श्वेतं पीतं तथा रक्तं कृष्णं चेति चतुर्विधम् ।
लक्षणं भस्म तां श्रेष्ठं स्यादुत्तरोत्तरम् ॥
(रसेन्द्रसारसंग्रहः, अ० १–८५)

रक्तवर्ण आदि पारदभस्म के लक्षण

रक्तभस्म ।

निर्गुण्डीरससंयुक्तं चपलेन समन्वितम् ।
रक्तवर्णं भवेद् भस्म दाडिमीकुसुमोपमम् ॥

पीतभस्म।

भूधात्रीहस्तिशुण्डीभ्यां रसं गन्धं च मर्दयेत्।
काचकूप्यां चतुर्यामं पक्वः पीतो भवेद्रसः॥
(रससंकेतकलिका अ० १।३०-३१)

रसेन्द्रसारसंग्रह में पारद की इस पीतभस्म का नाम 'सर्वाङ्गसुन्दररस' लिखा है, और चन्द्रिकाकार के मत से यह रस ही पीतभस्म है यह भी स्पष्ट कर दिया है। यथा—

मर्दयेद्रसगन्धौ च हस्तिशुण्डीद्रवैर्दृढम्।
भूधात्रिकारसैर्वापि पर्यन्तं दिनसप्तकम्॥
विघृष्य बालुकायन्त्रे मूषायां सन्निवेशयेत्।
दिनमेकं दहेदग्नौ मन्दं मन्दं निशावधि।
एवं निष्पाद्यते पीतः शीतः सूतस्तु गृह्यते॥
(रसेन्द्रसारसंग्रह अ० १, श्लो० ७६-८१)
(पीतभस्मेति चन्द्रिकाकारः)

कृष्ण भस्म।

सूतं गन्धकसंयुक्तं कुमारीरसमर्दितम्।
कृष्णवर्णं भवेद् भस्म देवानामपि दुर्लभम्॥
(रससंकेत कलिका अ० १।३२)

रसप्रकाशसुधाकर में पारदगन्धक की कज्जली को हंसपदी के रस में घोट, पाककर यह कृष्ण भस्म बनाई है। यथा—

विशुद्धसूतसमोऽपिहि गन्धकस्तदनु खल्वतले सुविमर्दितः
त्रिदिनमेव हि हंसपदीरसै र्दिनकरस्य करेण सुशोषितः ॥
....
सुपच एव रसो जलदोपमः..................
(रसप्रकाशसुधाकर अ० १।३१–३५)

रसेन्द्रसारसंग्रह तथा आनन्दकन्द (पृष्ठ १४८) में गन्धक के स्थान में धान्याभ्रक के योग से कृष्णभस्म बनाना लिखा है। यथा—

(१) धान्याभ्रकं रसं तुल्यं मारयेन्मारकद्रवैः ।
दिनैकं तेन कल्के वस्त्रं लिप्त्वा तु वर्तिकाम् ॥
विलिप्य तैलैर्वर्ति तामेरण्डोत्थैः पुनः पुनः ।
तदाज्यभाण्डे प्रज्वाल्य गृह्णीयात्पतितं च यत् ॥
कृष्णभस्म भवेत्तच्च पुनर्मर्द्यं नियामकैः ॥
दिनैकं पातयेद्यन्त्रे कन्दुकाख्ये न संशयः ।
मृतःसूतो भवेत्तच्च तद्रोगेषु योजयेत् ॥
(रसेन्द्रसारसंग्रह अ० १।८२–८४)

(२) सूतं धान्याभ्रकं तुल्यं मारकौषधजै रसः ।
(आनन्दकन्दे १४८ पृष्ठे)

नीलभस्म ।

वाराहीकन्दसंयुक्तं रसकेन समन्वितम् ।
नीलवर्णं भवेद् भस्म वलीपलितनाशनम् ।

पाटल भस्म ।

लवणान्तर्विलिप्तायां कूप्यां स्यात्पाण्डुरारुणम् ॥
(रससंकेतकलिका अ० १।३३–३४)

श्वेत भस्म ।

रसमंजरी का रसकर्पूर ही, श्वेतभस्म कहलाता हैं, ऐसा चन्द्रिकाकार का मत है। रसकर्पूरमिति रसमञ्जरीकारः, श्वेतभस्मेति चन्द्रिकाकारः (रसेन्द्रसारसंग्रह)

स्वर्णवर्ण भस्म ।

पञ्चाङ्गीबर्वरीलिङ्गीद्रवैर्घस्त्रत्रयं रसः
मर्दितः पुटितो भस्म स्वर्णवर्णं प्रजायते ॥

(आयुर्वेदप्रकाश अ० १।४८२) रसकामधेनुः ४१० पृष्ठ

अथ रसकर्पूरः—

परक्लोराइड आफ मर्करी Perclride of Mercery

प्रथमो विधिः—

गैरिकतुवरीखटिकासैन्धवगड १ रजः कुडवम् ।
प्रत्येकं दृढहण्ड्यामाधाया स्योपरि रसः २ स्थाप्यः ॥४५१
कुडवमितोऽथ तदूर्ध्वं देया हण्डी ३तदास्यायतमुखी ।
अथ तत्सन्धे४र्मुद्रां कृत्वा तदधो हुताशनो ज्वाल्यः ॥४५२
अर्मणषट्कप्रमितैर्दारुभिरनु नातिदुर्बलस्थूलैः ।
अग्निं क्रमेण दद्याद्गुरूदर्शितवर्त्मना ५द्विनिशम् ॥४५३॥

---

१ ' गड़काः करञ्जमिति ' । २ ' तस्योपरीशजः ' ।
३ ' तदास्यपातमुखी ' । ४ ' तत्सन्धौ ' । ५ ' घुनिशम् ' ।
इति च पाठान्तरं योगतरङ्गिण्याम् ।

१तदनु ततो यन्त्रवराद्युक्त्या कर्पूरसन्निभं सूतम् ।
आदाय काचकुम्भे निधाय नवसादरं दद्यात् ॥४५४॥
सम्मर्द्य चाथ काष्ठैरर्धार्मणसंमितैः २पचेद्भस्त्रम् ।
३चुल्लीडमरुकमध्यं वितस्तिचतुरङ्गुलावकाशं तु ॥४५५॥
कर्त्तव्यं, क्रमदहनं तदधः प्रज्वालयेन्मध्यम् ।
शशिधवलमुपरिलग्नं युक्त्या संगृह्य रक्षयेद्यत्नात् ॥४५६
नवसादरं दद्यात् 'पारदा च्चतुर्थांशं', इति शेषः ।
तुवरी = फिटकड़ीः गड = सांभरिलवणं, शेषं स्पष्टम् ॥

प्र० – रसकर्पूरस्य प्रथमविधिमाह—गैरिकेति—दृढहण्डयां गैरिकं, तुवरी = स्फटिका, खटिका, सैन्धवं, गडजं रजः = सांभरिलवणचूर्णमेतेषांपृथक् पृथक् प्रत्येकं कुडवं = पलचतुष्टयमितमाधाय, अस्य मिश्रितचूर्णस्योपरि कुडवमितः = पलचतुष्टयमितो रसः शुद्धः पारदः स्थाप्यः, अथ = तदनन्तरं तदूर्ध्वं तदास्यायतमुखी हण्डी देया, अथ हण्डीस्थापनानन्तरं तत्सन्धेः = तयोर्हण्डयोः संधे मुद्रां कृत्वा तदधः = तस्याहण्डया अधो हुताशनः = अग्निः ज्वाल्यः, अर्मणषट्कप्रमितैः = षट्द्रोणमितैः (९६ प्रस्थमितैः) नातिदुर्बलस्थूलैः दारुभिः = काष्ठैः, गुरुदर्शितवर्त्मना = गुरूपदिष्टमार्गेण, गुरुप्रदर्शितरीत्या द्विनिशं क्रमेण = मन्दमध्यक्रमेणाग्निं दद्यात् । तदनु = तदनन्तरं, ततो यन्त्रवरात् = डमरुकाख्ययन्त्रात् कर्पूरसन्निभं = कर्पूरसदृशं सूतं = पारदं युक्त्या आदाय = गृहीत्वा, काचकुम्भे = काचघटे, काचकुप्यामित्यर्थः, निधाय, नवसादरं =

---

१ 'उत्तार्य च तद्यन्त्रवरात्' । २ 'चुल्ल्याम्' ।
३ 'चुल्ल्याम्' इति च पाठान्तरं योगतरङ्गिण्याम् ।

पारदाच्चतुर्थांशमिं नवसादरं दद्यात् अथ सम्मर्द्य च, अर्धार्मणसम्मितैः = अर्धद्रोणमितैः (८प्रस्थमितैः) काष्ठैर्घस्त्रं = दिनैकं पचेत्, चुल्लीडमरुकमध्यं = चुल्ल्या धरातले डमरुकयन्त्रस्य मध्ये च वितस्ति चतुरङ्गुलावकाशं = षोडशांगुलमितं रिक्तस्थानं कर्त्तव्यम् । तदधः = डमरुकयन्त्राधोदेशे मध्यम क्रमदहनं = मध्यम क्रमेणाग्निं दद्यात् । स्वाङ्गशीतलं यन्त्रं पृथिव्यामवतार्य स्फोटयित्वा चोपरिलग्नं, शशिधवलं = कर्पूरवच्छ्वेतवर्णं रसकर्पूरं यत्नात् संगृह्य,यत्नतः = यत्नपूर्वकं रक्षयेत् । अत्र ४५१ श्लोके उद्गीतिवृत्तं, ४५२ श्लोके गीतिवृत्तं, ४५३ ४५४ श्लोके आर्यावृत्तं ४५५ श्लोके गीतिवृत्तिं, ४५६ श्लोके चोद्गीतिवृत्तमस्ति ॥४५१–४५६॥

रसकर्पूर (रसकपूर)

एक दृढ़ हांडी में गेरू, फिटकरी, खड़िया, सैंधवनमक तथा सांभरनमक का चूर्ण अलग अलग एक एक कुडव (सोलह सोलह तोला) रखकर, ऊपर से एक कुडव (सोलह तोला) शुद्ध पारद रखदे, फिर नीचे की हांडी के ऊपर बड़े मुख की एक हांडी रख कपड़मिट्टी द्वारा सन्धि बन्द कर, चूल्हे पर चढ़ाकर अग्नि जलादे । इसमें छै अर्मण (६ द्रोण = १॥।८६ ४ तोला) लकड़ियों से जो बहुत मोटी न हो दो दिन तक, गुरू के उपदेश के अनुसार मन्द तथा मध्यभाग से अग्निदे, फिर स्वांग शीतल हुये उस डमरूयन्त्र से कपूर के समान श्वेत वर्ण के पारद को कांच की शीशी में रखकर उसमें पारद का चौथाई ($\frac{1}{4}$) भाग नौसादर डाल घोटकर, आधा अर्मण (आधा द्रोण = ८६। = २ तोला) लकड़ियों से एक दिन पाक करे, चूल्हे के धरातल और डमरुयन्त्र में

सोलह अङ्गुल का अन्तर रखना चाहिये । और उस डमरू यन्त्र के नीचे मध्यम क्रम से अग्नि देनी चाहिये । स्वाङ्गशीतल होने पर, उस डमरू यन्त्र को पृथ्वी पर उतार फोड़कर, ऊपर की हांडी में लगे हुये, कपूर के समान श्वेतवर्ण के रसकर्पूर को युक्तिपूर्वक (ऊनी वस्त्र द्वारा) एकत्रित कर सावधानी से रखदे ।४५१-४५६।।

ज्ञातव्य—माधव ने रसकर्पूर की यह विधि, योग तरङ्गिणी से उद्धृत की है ।

(रसकर्पूरस्य मात्रा)

*बल्लं वल्लार्धं वा गुडेन जीर्णेन रोगिणे दद्यात्।।४५७।।

प्र०—रसकर्पूरस्य मात्रामाह—वल्लमिति—रसकर्पूरस्य वल्लं=त्रयोगुञ्जा, वल्लार्धं=सार्धैकगुञ्जा मात्रा दद्यात् । जीर्णेन पुराणेन गुडेन सह, रोगिणे = फिरङ्गोपदंशादिव्याधिग्रस्ताय दद्यात् ।। ४५७ ।।

ज्ञातव्यम्—रसकर्पूरस्यैषा प्राक्कालिकीमात्रा, इदानी मधिका वर्तते, अद्यत्वे तु रक्तिकायाश्चतुः षष्ठ्यंशतः ($\frac{1}{64}$ रत्ती) द्वात्रिंशभाग ($\frac{1}{32}$) मात्रा देयेति रसतरङ्गिणीकारस्य मतम् ।

रसकर्पूर की मात्रा ।

उ०—फिरङ्गोपदंश आदि से पीड़ित रोगी के लिये,

---

* 'वल्लं वा वल्लार्धं जीर्णेन गुडेन' इति पाठान्तरं योग-तरङ्गिण्याम् ।

रसकर्पूर तीन रत्ती अथवा डेढ रत्ती की मात्रा में पुराने गुड़ के साथ देना चाहिये ॥ ४५७ ॥

ज्ञातव्य—रसकर्पूर की यह ऊपर लिखी हुई मात्रा प्राचीन समय की है, आजकल तो १/६४ रत्ती से १/३२ रत्ती तक की मात्रा में रसकर्पूर का व्यवहार करना उचित है, ऐसा रसतरंगिणी नाम के आधुनिक रसग्रन्थ में लिखा है। इसी ग्रन्थ में आभ्यन्तरिक (पीने और खाने के) प्रयोग के लिये रसकर्पूर की मात्रा बनाने की विधि, निम्न प्रकार से लिखी है—

१–आभ्यन्तरिक (पेय पीने की) रसकर्पूर की–मात्रानिर्माणविधि।

एक खरल में, शुद्ध नौसादर ५ रत्ती और रसकर्पूर ५ रत्ती डाल पीसकर, ६० तोला जल में मिलाकर शीशी में रख दें, और ३० बूँद तक की मात्रा में व्यवहार करें।

२–आभ्यन्तरिक चूर्ण (खाने की) रसकर्पूर की–मात्रानिर्माणविधि।

दालचीनी ५ माशा और निम्बुकाम्ल (साइट्रिक एसिड) के साथ पिसा हुआ रसकर्पूर १ रत्ती को खरल में पीस, शीशी में भरकर रख ले और १ रत्ती की मात्रा में व्यवहार करे, यह इसकी पूर्णमात्रा है। यथा—

आरभ्य रक्तिकायास्तु चतुःषष्ट्यंशतो भिषक्।
द्वात्रिंशद्भागपर्यन्तं मात्रामस्य,प्रयोजयेत् ॥

चूलिकालवणं शुद्धं गुञ्जापञ्चकसम्मितम् ।
समञ्च रसकर्पूरं षष्टितोलकसम्मिते ॥
जले विनिक्षिपेत्प्राज्ञो मात्रामस्य प्रकल्पयेत् ।
बिन्दुत्रिंशत्तकश्चादौ षष्टिबिन्दुमितां पराम् ॥
श्लक्ष्णं दारुसिताचूर्णं पञ्चमाषकसम्मितम् ।
गुञ्जैकं रसकर्पूरं क्षिपेन्निम्बुवल्कलमर्दितम् ॥
रक्तिकैकमितं चूर्णं मात्रायां विनियोजयेत् ।
रक्तिकैकमिता पूर्णमात्रास्य परिकीर्तिता ॥
(रसतरंगिणी, तरंग ६ । ७६-८०)

(पथ्यम्)

दुग्धौदनं तु पथ्यं देयं [1]तस्मै च ताम्बूलम् ।
हरति [2]समस्तं रोगं कर्पूराख्यो रसो नृणाम् ॥४५८॥

प्र०—रसकर्पूरसेवने पथ्यमाह—दुग्धौदनमिति—तस्मै = फिरङ्गादिरोगिणे दुग्धौदनं ताम्बूलं = नागवल्लीदलं च पथ्यं देयम् । कर्पूराख्योरसः = रसकर्पूरः, नृणां समस्तं रोगं = फिरङ्गादिनिखिलरोगजालं हरति = विनाशयति ॥ अत्रोपगीति वृत्तम् ॥४५८॥

रसकर्पूर सेवन करने में पथ्य ।

उ०—फिरङ्गोपदंश के पीड़ित रोगी के लिये पथ्य में दूध और चावल का भात तथा पान देना चाहिये । यह

१—'त्वस्मै', २—'समस्तान् रोगान् इति पाठान्तरं योगतरङ्गिण्याम् ।

रसकर्पूर मनुष्यों के फिरङ्गोपदंश आदि सम्पूर्ण रोगों को नष्ट कर देता है ॥ ४५८ ॥

(रसकर्पूरस्य गुणाः)

फिरङ्गकरिकेसरी सकल कुष्ठ *कालानलो
ऽखिलव्रणविनाशकृद्व्रणजगर्तपूर्तिप्रदः ।
सुवर्णसमवर्णकृद् बलहुताशतेजस्करः
समस्तगदतस्करो रसपतिः स कर्पूरकः॥४५९॥

प्र०—रसकर्पूरस्य गुणानाह—फिरंगेति—स्पष्टम् ॥ अत्र पृथ्वीवृत्तम् ॥ ४५६ ॥

रसकर्पूर के गुण ।

उ०—यह रसकर्पूर, फिरङ्गरूपी हाथी के लिये सिंह के समान, सम्पूर्ण कुष्ठ तथा व्रणनाशक और व्रणपूरक,शरीर का वर्ण (रङ्ग) सुवर्ण की भाँति करने वाला, बल, जठराग्नि तथा तेज बर्द्धक और सम्पूर्ण रोगों को दूर करने वाला है ॥ ४५६ ॥ —

(रसकर्पूरस्य द्वितीयो विधिः)

अथ रसकर्पूरस्यापरो विधिः—
शुद्धसूतसमं कुर्यात्प्रत्येकं गैरिकं सुधीः ।

* 'दावानल' इति पाठान्तरं योगतरंगिण्याम् ।

इष्टिकां खटिकां तद्वत्स्फटिकां सिन्धुजन्म च॥४६०॥
वल्मीकं क्षारलवणं भाण्डरञ्जनमृत्तिकाम्।
सर्वाण्येतानि संचूर्ण्य वाससा परिशोधयेत् ॥४६१॥
एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्दयेत्।
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् ॥४६२॥
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्समाम्।
सवस्त्रकुट्टितमृदा मुद्रयेद् +उभयोर्मुखम् ॥ ४६३ ॥
संशोष्य मुद्रयेद् भूयो भूयः संशोष्य मुद्रयेत्।
सम्यग्वि शोष्य मुद्रां तां स्थालीं चुल्ल्यां *विधारयेत् ४६४
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम्।
अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् ॥ ४६५ ॥
शनैरुद्घाटयेद्यन्त्रमूर्ध्वस्थालीगतं रसम्।
कर्पूरवत्सुविमलं गृह्णीयाद् गुणवत्तरम् ॥ ४६६ ॥

सिन्धुजन्म = सैन्धवं, वल्मीकं तज्जामृत्, क्षारलवणं = खारियालोणं, भाण्डरञ्जनमृत्तिका = कुलालगृहे 'कावीस' इति नाम।

+ 'अनयोः' इति पाठान्तरं वैद्यकशब्दसिन्धु समुद्धृत पाठे।

* भावप्रकाशसम्मतः समीचीनोऽयं पाठः, स्वीकृतोऽस्माभिः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'निरोधयेत्' इति पाठ उपलभ्यते।

प्र०--रसकर्पूरस्य द्वितीयं विधिमाह—शुद्धेति–सुधीः = विद्वान् रसवैद्यः, शुद्धसूतसमं = शुद्धपारदतुल्यं, गैरिकादिकं प्रत्येकं द्रव्यं कुर्यात्, सर्वाण्येतानि = गैरिकादिद्रव्याणि, संचूर्ण्य वाससा = वस्त्रेण परिशोधयेत्, एभिश्चूर्णैः = गैरिकादिचूर्णैः, युतं = सहितं, सूतं = पारदं, यामं यावत् = प्रहरपर्यन्तं विमर्दयेत्, मर्दितं च तच्चूर्णसहितं सूतं, स्थालीमध्ये = हण्डिकामध्ये परिक्षिपेत्, तस्याः स्थाल्याः = हण्डिकाया मुखेऽपरां समां स्थालीं = तत् समानामन्यां हण्डिकां धारयेत, उभयोर्मुखं सवस्त्रकुट्टितमृदा मुद्रयेत्, तदनु घर्मे संशोष्य मुखं मुद्रयेद्, इत्थं भूयोभूयः = पुनः पुनः संशोष्य मुद्रयेत्, मुद्रां = सम्यग्विशोष्य, तां स्थालीं = हण्डिकां चुल्ल्यां = चुल्हिकोपरि विधारयेत, दिनचतुष्टयं यावन्निरन्तरमग्निंच दद्यात्, अंगारोपरि तद्यन्त्रं = तड्डमरुयन्त्रम = हर्निशं यत्नाद्द्रवयेत, स्वांगशीतलानन्तरं च यन्त्रं शनैरुद्घाटयेत् ऊर्ध्वस्थालीगतम् = उपरिस्थहंडिकासंलग्नं, गुणवत्तरं कर्पूरवत्सुविमलं = स्वच्छं रसं = रसकर्पूरं गृह्णीयात् ॥ अत्रानुष्टप्छन्दः ॥४६०–४६६॥

रसकर्पूर की द्वितीय विधि।

विद्वान् वैद्य, शुद्ध पारद के समान गेरू, पक्की ईंट का चूर्ण, खड़िया, फिटकरी, सैन्धवनमक, बांबी की मिट्टी, खारी नमक और बर्त्तन रङ्गने की मिट्टी (काबीस) प्रत्येक पदार्थ को अलग अलग चूर्ण कर कपड़े में छान ले और गेरू आदि के चूर्ण के साथ पारद को खरल में घोटकर हाँडी में भर दे, और उस हाँडी के मुख पर उसी के समान दूसरा हाँडी रख कर, वस्त्र सहित मुलतानी मिट्टी से कपड़ मिट्टी कर मुख की सन्धि बन्द कर दें, फिर धूप में सुखा कर, कपड़े

मिट्टी करे, इस प्रकार बारबार सुखाकर सन्धि बन्द करने के लिये कपड़ मिट्टी करे, और भली भाँति सुखाकर हाँडी को चूल्हे पर रखकर, चार दिन तक लगातार अग्नि दे, अङ्गारों पर रखे हुये डमरूयन्त्र की, दिनरात स्वांगशीतल होने तक भली भाँति रक्षा करे, और फिर उसको खोलकर, ऊपर की हाँडी में लगे हुये, अत्यन्त गुणवान् और कपूर के समान निर्मल पारद को ग्रहण करे, यह पारद ही कर्पूर के समान श्वेत तथा निर्मल होने के कारण रसकर्पूर कहलाता है।

॥ ४६०–४६६ ॥

ज्ञातव्य—माधव ने रसकर्पूर की यह विधि, भावप्रकाश (पूर्वखण्ड, प्रकरण ६। ३४०–४६६) से उद्धृत की है।

(रसकर्पूरस्यानुपानं गुणाश्च)

तं देवकुसुमचन्दनकस्तूरीकुंकुमैर्युक्तम्।
खादन हरति फिरङ्गं व्याधिं सोपद्रवं सपदि ॥४६७॥
विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्यं बलं विपुलम्।
रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम्॥४६८॥

इति रसकर्पूरः॥

प्र०—रसकर्पूरस्यानुपानादिकमाह–तदिति–देवकुसुमः = लवंगम्, देवकुसुमादिभिर्युक्तं तं = रसकर्पूरं खादन् पुरुषः सोपद्रवं फिरंगव्याधिं = फिरङ्गोपदंशं, सपदि = शीघ्रं हरति। रसकर्पूरस्य सेवकः सततं वह्नेः = जठराग्नेर्दीप्तिं पुष्टिं वीर्यं विपुलं बलं

विन्दति=लभते, रमणीशतकं च रमयति । अत्र ४६७ श्लोके गीतिवृत्तम्, ४६८ चोद्गीतिवृत्तम् ॥ ४६७—४६८ ॥

रसकर्पूर का अनुपान तथा गुण ।

रसकपूर को लौंग, चन्दन, कस्तूरी और केशर के साथ मिलाकर खाने से, यह उपद्रव सहित फिरङ्गोपदंश रोग को शीघ्र दूर कर देता है । रसकर्पूर को खाने से पुरुष की जठराग्नि तीव्र होती है तथा पुष्टि वीर्य और अत्यन्त बल प्राप्त करता है तथा सौ स्त्रियों के साथ मैथुन कर सकता है ॥ ४६७-४६८ ॥

ज्ञातव्य—माधव ने यह श्लोक, भावप्रकाश (पूर्वखण्ड, प्रकरण ५ । श्लोक ४२-४३) से उद्धृत किये हैं ।

रसकर्पूर खाने की विधि (आभ्यन्तरिक प्रयोग)

रसकर्पूर का प्रयोग, फिरङ्गोपदंश रोग को निश्चतरूप से नष्ट करता है, यह इस रोग की प्राथमिक तथा माध्यमिक अवस्था में शीघ्र प्रभाव दिखाता है, निम्नलिखित विधि से रसकर्पूरखाने से मुख में शोथ तथा छाले नहीं पड़ते हैं—

वैद्य, गेंहू के आटे को पानी में सानकर छोटी छोटी कुल्हियाँ बनावें, फिर उनमें चार चार रत्ती रसकर्पर रखकर गोलियाँ बना ले, जिससे पारद बाहर न दीखे, और उनको लौंग के सूक्ष्म चूर्ण में लपेट कर, इसप्रकार पानी से निगल जाय कि जिसमें वह दांत से न छुये, फिर पान खावे, रसकर्पूर

को खाने वाला पुरुष शाक खट्टे तथा नमकीन पदार्थ, परिश्रम, धूप, मार्ग चलना और अधिकतर मैथुन को त्याग दे । यथा—

फिरङ्गसञ्ज्ञकं रोगं रसः कर्पूरसञ्ज्ञकः ।
अवश्यं नाशयेदेतदूचुः पूर्वचिकित्सकाः ॥
लिख्यते रसकर्पूरप्राशने विधिरुत्तमः ।
अनेन विधिना खादेन्मुखे शोथं नविन्दति ॥
गोधूमचूर्णं सन्नीय विदध्यात्सूक्ष्मकूपिकाम् ।
तन्मध्येनिक्षिपेत्सूतं चतुर्गुञ्जामितं भिषक् ॥
ततस्तु गुटिकां कुर्याद्यथा न दृश्यते बहिः ।
सूक्ष्मचूर्णं लवंगस्य तां वटीमवधूलयेत् ॥
दन्तस्पर्शो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत्पश्चाच्छाकाम्ललवणाँस्त्यजेत् ॥
श्रममातपमध्वानं विशेषात्स्त्रीनिषेवणम् ॥

(भावप्रकाशे, मध्यमखण्डे, फिरंग चि० १०-१४)

विशेष ज्ञातव्य—ऊपर लिखी हुई रसकर्पूर की मात्रा आज कल अधिक है, रसतरङ्गिणी में १/४ से १/२ रत्ती तक मात्रा लिखी है, रसपुष्प की भाँति सेवन करने पर भी १/२ से २ १/२ रत्ती तक सेवन करना चाहिये ।

प्राचीनकाल में रसकर्पूर का उपयोग ।

वैद्यकग्रन्थों में सर्वप्रथम, भावप्रकाश में ही फरङ्ग रोग के लिये रसकर्पूर का उपयोग किया है, इससे पहिले

रसप्रकाशसुधाकर में रसकर्पूर को त्रिदोषनाशक, सर्व रोगहर, बलप्रद, कामशक्तिवर्धक तथा सब प्रकार के कुष्ठों को नष्ट करने वाला माना है। यथा—

पवनपित्तकफक्षयकारकः सकलरोगहरः परमः सदा।
गजपतेर्बलवद्बलदो नृणां द्विजपतीक्षणवन्नयनप्रदः॥
युवति कामविलासविधायको भवति सूतवरः सुखदः सदा।
स घनसाररसः किलकान्तिदस्त्वखिलकुष्ठहरः कथितो मया॥
(रसप्रकाशसुधाकरे अ० ३। ८)

रसेन्द्रसारसंग्रह में रसकर्पूर, विरेचक, त्रिषनाशक तथा सिंह के नाखून के विष को दूर करने वाला माना गया है। यथा—

पिष्टं पांशुपटुप्रगाढममलं वज्र्यम्बुना नैकशः
सूतं धातुगतं खटीकवलितं तं सम्पुटे रोधयेत्।
अन्तःस्थं लवणस्य तस्य च तले प्रज्वाल्य वह्निं दृढं
घस्रं ग्राह्यमथेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः॥
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रभुक्तं नृणा
मूर्ध्वं रेचयति क्रियाममसकृत् पेयं जलं शीतलम्।
एतद्धन्ति च वत्सराधिकविषं षाण्मासिकं मासिकं
शैलोत्थं गरलं मृगेन्द्रकुटिलोद्भूतञ्च तात्कालिकम्॥
(रसेन्द्रसारसंग्रहे। अ० १। ७४–७५)

रसकर्पूर मिति रसमञ्जरी कारः, श्वेतभस्मेति चन्द्रिकारः। इसको सुधानिधि रस भी कहा जाता है।

रसेन्द्रचिन्तामणि में रसकर्पूर के (१) पारदगन्धक, (२) हिङ्गुलगन्धक, (३) पारदगन्धक हरिताल, (४) पारद गन्धक लाल ईंट का चूर्ण, सैन्धव और फिटकरी द्वारा, चार प्रयोग लिखे हैं, इनमें तीसरा हरिताल का योग, विशेषरूप से कुष्ठ नाशक माना गया है। यथा—

(१) मारकाम्बुसित सैन्धवमिश्रः कूपिकोदरगतः सिकतायाम्।
पाचितो यदि मुहुर्मुहुरित्थं बन्धमृच्छति तदैष रसेन्द्रः।

(२) शुद्धरसाभावे हिङ्गुलुरेव लवणे मिश्रणीयः।

(३) किंवा अधस्ताद्धिङ्गुलगुटकं परित उपरिष्टाच्च लवणं, तेनैव शुद्धिमूर्च्छाविधानात्। अत्यन्त दीर्घनालाऽत्र कूपी, अनुत्थाने चाप्सु च रसलवणपिण्डो निधेयः, तालमिश्रश्चेत्कुष्ठहरो विशेषेण।

(४) स्थाल्यां दृढघटितायामर्धं परिपूर्य तूर्यलवणांशैः।
रक्तेष्टिकारजोभिस्तदुपरि सूतस्य तुर्यांशम्॥
सितसैन्धवं निधाय स्फटिकारीं तत्सम्राञ्च तस्योर्ध्वे।
स्फटिकारिधवल सैन्धवशुद्धरसैः कन्यकाम्बुपरिघृष्टैः॥
कृत्वा पर्पटमुचितं तदुपर्याधाय तद्वदेव पुनः।
स्फटिकारिसैन्धवरसौ दद्यादितः स्खलतो रसस्य॥
लाभायतदुपरि खर्परखण्डकान् धृत्वाऽपरया दृढस्थाल्या।
आच्छाद्य मुद्रयित्वा दिवसत्रितयं पचेद्विधिना॥
अत्रानुक्तमपि भल्लातकं ददति वृद्धाः पारदतुल्यम्।
(रसेन्द्रचिन्तामणौ, अ० २। २५–३२)

रसकर्पूर की नूतन निर्माण विधिः।

आजकल रसकर्पूरको (परक्लोराइड आफ मर्करी या कोरोसिव सब्लीमेट अथवा बाई क्लोराइड आफ मर्करी), तथा सुधानिधिरस अथवा रसपुष्प (केलोमल या सब क्लोराइड आफ मर्करी) नाम से दो प्रयोग, पाश्चात्य डाक्टरों में प्रसिद्ध हैं, परन्तु भावप्रकाश तथा उससे उद्धृत आयुर्वेदप्रकाश (५२६-५२७ पृष्ठ पर रसकर्पूर की द्वितीय विधि) का रसकर्पूर, आजकल का शुद्ध रसकर्पूर नहीं है। अपितु वैज्ञानिकों के मत से वह रसकर्पूर तथा सुधानिधि रस दोनों का मिश्रण है, इसलिये रसतरङ्गिणीकार ने आजकल के पाश्चात्य वैज्ञानिकों के प्रयोगों के अनुसार, रसकर्पूर तथा रसपुष्प के दो अलग अलग प्रयोग निम्नलिखित विधि से लिखे हैं।

रसकर्पूर की निर्माण विधि।

शुद्धपारद एक पल, शुद्ध गन्धकाम्ल (सल्फयूरिकएसिड) १॥ पल, इन दोनों को एक काच के बर्तन में भरकर लोहे की तिपाई (स्टैण्ड) के ऊपर रख दे और उसके नीचे स्प्रिट लैम्प जलाकर गन्धक द्राव के जलीयांश (पानी के भाग) को जलाकर सुखावें, चूर्णरूप शेष रहने पर, काच के बर्तन को नीचे उतारकर पारद के समान सफेद सैन्धवनमक का चूर्ण डालकर खरल में मर्दन करें, और फिर आतशीशीशी में भरकर बालुकायन्त्र में चार प्रहर (१२ घंटे) की मन्दाग्नि से पाक करें, पाक करने के समय, जब देखें कि सैन्धवनमक की पानी के भाग की भाप का निकलना बन्द होगया है, तब शीशी में (रससिंदूर की शीशी की

भांति डाट लगादें, तथा शीशी के गले के आसपास चारों ओर से थोड़ी बालू को हटादें, जिससे गला ठण्डा होने पर वहाँ उड़ कर आया हुआ पारद, जम जाय, स्वाङ्गशीतल होने पर शीशी को उतार कर सावधानी से फोड़ ले, तो शीशी के गले में कपूर के समान सफेद (श्वेत) रङ्ग का रसकर्पूर मिलेगा । यथा—

पलसम्मितं प्रयत्नाद् विमलीकृतं रसेशम् ।
सपलार्द्धकं पलैकं विमलञ्च गन्धकाम्लम् ॥
चषकोपमे विशुद्धे निदधीत काचपात्रे ।
विनिधाय काचपात्रं त्वयसस्त्रिपादिकायाम् ॥
ज्वलिते सुराप्रदीपे संशोषयेज्जलांशम् ।
अथ शोषिते तु चूर्णं त्ववतार्य वै प्रदीपात् ॥
समभागिकं त दद्याल्लवणं तु सैन्धवाख्यम् ।
परिमेल्य चूर्णमेतन्निदधीत काचकुप्याम् ॥
युगसङ्ख्यकैस्तु यामैः सिकताख्ययन्त्रसंस्थम् ।
विपचेदतिप्रयत्नाद् रसतन्त्रकर्मविज्ञः ॥
अवबुध्य काचकूपीं स्वत एव शीतलाङ्गीम् ।
घनसारनामधेयं रसमाहरेद्रसज्ञः ॥
जलीयवाष्पे निर्याते पिधानेन पिधापयेत् ।
कूपीकण्ठस्थितां स्वल्पां सिकताञ्चापसारयेत् ॥

(रसतरङ्गिणी, षष्ठ तरङ्ग, ६५–७१)

आधुनिक मत से रसकपूर के गुण ।

रसकपूर, संक्रामकजीवाणुविषनाशक, त्वग्दोष तथा रक्तदोषनाशक, ग्राही, रुचिवर्द्धक, अतीसार हर और विशेषकर

कृमिनाशक है, यह कफरक्तमिश्रित प्रवाहिका नाशक है, परन्तु अधिक मात्रा में देने से विष के समान विषैला प्रभाव करता है। यह विस्फोट, पुरानी खुजली, मण्डल आदि कुष्ट, सन्निपातज तथा सहज (जन्म से उत्पन्न हुई) तथा स्पर्श (छूत) से उत्पन्न फिरङ्गोपदंशनाशक, का अनेकप्रकार के भयङ्कर व्रणों की भयङ्कर पीड़ा को दूर करने वाला और जठराग्नि वर्द्धक है। यह कमसे कम सोलहगुने जल में घुल कर द्रव बन जाता है।

(रसतरङ्गिणी षष्ठतरङ्ग, ७२-७५ श्लोकानुवाद)

रसकर्पूर की मात्रा।

रसकर्पूर की मात्रा, तथा मात्रा बनाने की विधि इसी अध्याय में ५२४ पृष्ठ पर श्लोक की प्रदीप व्याख्या लिखदी है। पाठक वहाँ पर ही देखलें।

रसकर्पूर का आमयिक (रोगावस्था में) प्रयोग।

रसकर्पूर, मात्रापूर्वक सेवन करने से, प्रातःकाल तथा भोजन करने के उपरान्त होने वाले तथा दाह (जलन) सहित, पुराने पतले और मल सहित अतिसार का नाशक तथा कफ और रक्तमिश्रित प्रवाहिका को दूर करने वाला है।

(रसतरंगिणी, षष्ठ तरंग, ८१-८३ श्लोकानुवाद)

अथ रसस्यमारणविधिः।

(अधःस्थं रससिन्दूरं पारदस्य तलभस्म वा)

धूमसारं रसं १तूरीं गन्धकं नरेसादरम् ।
यामैकं मर्दयेदम्लैर्भागं कृत्वा २समं समम् ॥४६९॥

काचकूप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया ।
विलप्य परितोवक्त्रे मुद्रां दत्वा ३विशोषयेत्॥४७०॥

४अधश्छिद्रयुतस्थालीमध्ये कूपीं निवेशयेत् ।
५स्थालिकां बालुकापूरैर्भृत्वा चाकूपिकागलम्॥४७१

६चुल्ल्यां निवेश्य तदधः कुर्याद्वह्निं शनैः शनैः ।
तस्मादप्यधिकं किञ्चित्पावकं ज्वालयेत्क्रमात्॥४७२॥

एवं द्वादशभिर्यामैर्म्रियते ७रस उत्तमः ।
स्फोटयेत्स्वाङ्गशीतं ८तदूर्ध्वगं गन्धकं त्यजेत्॥४७३॥

अधःस्थं ९च मृतंसूतं गृह्णीयात्तं तु मात्रया ।
यथोचितानुपानेन सर्वकर्मसु योजयेत् ॥ ४७४ ॥

१—'तारी' इति शारंगधरसंहितायां भावप्रकाशे च, २—'समांशकम्', ३—'च शोषयेत्' इति शारङ्गधरसंहितायां. ४—'सच्छिद्रपिठरीमध्ये', ५—'पिठरी', ६—'निवेश्य चुल्ल्यां' इति शारङ्गधरसंहितायां भावप्रकाशे च, ७—'सूतकोत्तमः' इति शारंगधरसंहितायां, ८—'तमूर्ध्वगम्' इति शारंगधरसंहितायां भावप्रकाशे च, ९—'मृतं सूतं च सर्वकर्मसु योसयेत्' इति च शारंगधरसंहितायां पाठान्तरम् ।

प्र०—अधःस्थं रससिंदूरं पारदस्य तलभस्म वा निर्दिशन्नाह —धूमसारमिति-धूमसारं=गृहधूमं, रसं=शुद्धपारदं, तूरीं= स्फटिकां, गन्धकं, नवसादरं, सर्वमेतत्समं समभागं कृत्वा, अम्लैः =निम्बुरसादिभिः, यामैकं=प्रहरैकं खल्वे मर्दयेत्, सम्मर्द्य च तां कज्जलीं काचकुप्यां विनिक्षिप्य तां=काचकूपीं मृद्वस्त्रमुद्रया= सप्तमृत्तिकावस्त्रैः परितो विलिप्य वक्त्रे=मुखे, मुद्रां दत्वा=मुखे पाषाणखटिकां दत्वा, मुद्रां प्रदाय विशोषयेत्, तदनन्तरमधश्छिद्र युतस्थालीमध्ये=सच्छिद्रहण्डिकामध्ये कूपीं निवेशयेत्, स्थालिका = हण्डिकां च, आकूपिकागलं=काचकुप्या गलपर्यन्तं बालुकापूरैर्भृत्वा=पूरयित्वा, तद्वालुकायन्त्रं चुल्ल्यां निवेश्य, तदधः शनैः शनैर्वह्निं कुर्यात्=मन्दाग्निं दद्यात्, तस्मादपि मन्दाग्नेरपि किञ्चिदधिकं पावकं क्रमात्=मध्यतीव्रक्रमात् ज्वालयेत्, एवम्=इत्थमुत्तमो रसः=पारदो द्वादशभिर्यामैः=द्वादश प्रहरैर्म्रियते, स्वाङ्गशीतं तद्यन्त्रमवतार्य काचकूपीं स्फोटयेत्, ऊर्ध्वगम्=ऊर्ध्वलग्नं गन्धकं त्यजेत्, अधःस्थं च मृतं सूतं= रससिन्दूरं गृह्णीयात्, मात्रया यथोचितानुपानेन च सर्वकर्मसु योजयेत्॥ अत्रानुष्टुप् छन्दः॥ ४६६-४७४॥

पारदमारण की प्रथमविधि

(अधःस्थ रससिन्दूर अथवा पारद की तल भस्म)

उ०—घर का धूआं, शुद्ध पारद, फिटकरी, शुद्ध गन्धक और शुद्ध नौसादर, प्रत्येक समान भाग लेकर खरल में डालकर नीबू के रस से एक पहर (३ घण्टे) तक घोटकर कज्जली बनावे, फिर सातबार कपड़मिट्टी की हुई आतशीशीशी में उस कज्जली को भरकर शीशी के मुख में खड़िया मिट्टी की

डाट लगाकर, बज्रमुद्रा अथवा दृढ़मुद्रा के लेप से सन्धि बन्द कर धूप में सुखा दे, फिर एक हाँडी के पृष्ठ भाग (पेंदे के धरातल) के बीच में तर्जनी अंगुली के बराबर छिद्र कर, उस हाँडी में आतशी शीशी को रख, शीशी के गले तक बालू भर दे और इस बालुकायन्त्र को चूल्हे पर चढ़ा कर मन्दाग्नि जलावें, फिर मध्य तथा तीव्र क्रम से अग्नि दे, इस प्रकार बारह प्रहर (३६ घण्टे) की अग्नि देने से पारद मर जाता है, स्वाँग शीतल होने पर आतशीशीशी को सावधानी से तोड़े और ऊपर लगे हुये गन्धक को छोड़कर गन्धक की नली के नीचे लगे हुये मरे हुये (भस्मरूप) पारद (रससिन्दूर) को ग्रहण करे, तथा फिर इस अधःस्थ रससिन्दूर अथवा पारद की तलभस्म को मात्रापूर्वक उचित अनुपान से सब रोगों में व्यवहार करे ।। ४६६–४७४ ।।

ज्ञातव्य—माधव ने यह विधि, भावप्रकाश (पूर्वखण्ड, प्रकरण ५ । २३–२८) से उद्धृत की है, शार्ङ्गधरसंहिता मध्यमखण्ड (अ० १२ । १६–३४) में भी यह विधि है और रसेन्द्रसारसंग्रह में भी यह विधि कुछ पाठान्तर से मिलती है । यथा—

पृथक् समं समं कृत्वा पारदं गन्धकं तथा ।
नरसारं धूमसारं स्फटिकं याममात्रकम् ॥
निम्बूरसेन सम्मर्द्य कांचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्वा मुद्रां प्रलेपयेत ॥
सप्तमिमृ त्तिकावस्त्रैः पृथक् संशोष्य वेष्टयेत् ।
सच्छिद्रायां मृदः स्थाल्यां कूपिकां तां निवेशयेत् ॥

पूरयेत् सिकतापूर्णैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्ध्वलग्नं बलिं त्यजेत् ॥
अधःस्थं रससिन्दूरं सर्वरोगेषु योजयेत् ॥

(रसेन्द्रसारसंग्रहे, अ० १ ६१--७२)

किसी किसी रसग्रन्थ में, इस विधि में धूमसार (घर का धूआं) के स्थान में, सीसा (नाग) धातु का प्रयोग मिलता है । यथा—

पृथक् पृथक् समं कृत्वा पारदं गन्धकं तथा ।
नवसारं स्फटिकं च सनागं याममात्रकम् ॥
निम्बूनीरेण सम्मद्य काचकूप्यां विनिक्षिपेत् ।
बुधश्च बालुकायन्त्रे यामद्वादशकं पचेत् ॥
स्वाङ्गशीतं स्फोटयित्वा ह्यूर्ध्वलग्नं बलिं त्यजेत् ।
अधःस्थं रससिन्दूरं योजयेद्रसकर्मणि ॥

(शार्ङ्गधरसंहिता म०खण्ड, अ० १२ । २६–३४ दीपिका टीका)

रसतरङ्गिणी नाम के अर्वाचीन रसग्रन्थ में, केवल पारद और गन्धक के योग से तलस्थ (अधःस्थ) रससिन्दूर का निर्माण करना लिखा है । यथा—

रसगन्धौ समौ कृत्वा तयोः कुर्याच्च कज्जलीम् ।
तां क्षिपेत्काचकूप्यन्तर्मुखे मुद्रां च दापयेत् ॥
विस्तारे च तथायामे निम्नतायां भिषग्वरः ।
हस्तैकप्रमितं गर्तं कृत्वा कूपीं तु विन्यसेत् ॥

चतुरङ्गुलमुत्सेधे बालुकाभिः प्रपूरयेत्।
स्याच्च शिष्टः कूपिकायाः कायस्तत्तद्वदनावृते:॥
वन्योपलैस्तु तद्गतं पूरयित्वा पुटेत्खलु।
स्वाङ्गशीतां कूपिकां च तस्मादपहरेद् भिषक्॥
तलस्थं रससिन्दूरं शोणवर्णं प्रजायते।
नाम्नाधः सैकतं यन्त्रं खल्वे तत्परिकीर्तितम्॥
नरेन्द्रनाथमित्राख्यैरयं पन्था निदर्शित:।
अनुभूतश्च सुगमः प्रकारः सम्प्रकीर्तितः॥
(रसतरङ्गिण्यां षष्ठेतरंगे १७७--१८२)

(पारदमारणस्य प्रथमः प्रकारः)

अथान्य प्रकार:—

काष्ठोदुम्बरिका दुग्धै रसं किंचिद्विमर्दयेत्।
तद्दुग्ध १पिष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत्॥४७५॥
क्षिप्त्वा तत्सम्पुटे सूतं तत्र मुद्रां २प्रकल्पयेत्।
धृत्वा ३तदगोलकं प्राज्ञो मृन्मूषा सम्पुटेऽधिके।
पचेद् ४गजपुटे तेन सूतको याति भस्मताम्॥४७६॥

१—'घृष्ट', २—'प्रदापयेत्', इति च पाठान्तरं शार्ङ्गधरसंहितायां भावप्रकाशे च। ३—'तं गोलकं', ४—'गजपुटे नैव' इति च पाठान्तरं भावप्रकाशे, मृदुपुटे नैव इति च पाठान्तरं शार्ङ्गधरसंहितायाम्।

प्र०—पारदमारणस्य प्रथमं विधिमाह—काष्ठेति प्राज्ञः = विद्वान् रसवैद्यः, काष्ठोदुम्बरिकादुग्धैः = काकोदुम्बरिकादुग्धैः, रसं = शुद्धपारदं किंचिद् = प्रहरैकं विमर्दयेत्, तद्दुग्धपिष्टहिंगोश्च = काष्ठोदुम्बरिका दुग्धेनैव हिंगुँ पिष्ट्वा तेन हिङ्गुना मूषायुग्मं = मूषाद्वयं प्रकल्पयेत्, तत्सम्पुटे = मूषासम्पुटमध्ये सूतं = काष्ठोदुम्बरिका दुग्धमर्दितं पारदं क्षिप्त्वा तत्र = सम्पुटे मुद्रां प्रकल्पयेत्, तद्गोलकमधिके = बृहत्तरे मृन्मूषासम्पुटे धृत्वाऽवरोधयेत्, गजपुटे = लघुगजपुटे च पचेत्, तेन सूतकः = पारदो भस्मतां याति । अत्रानुष्टप्छन्दः ॥ ४७५—४७६ ॥

पारदमारण के अन्य प्रकार ।

(प्रथम प्रकार)

उ०—पहिले कठगूलर (कटूमर), के दूध से पारद को एक प्रहर (३ घण्टे) कुछ समय तक खरल में मर्दन करे, फिर इसी कठगूलर के दूध से हींग को पीसकर, उस हींग के कल्क की दो मषा बनावै और इस मूषाके सम्पुट में, कठगूलर में मर्दन किये गये पारद को भरकर मुद्रा से सन्धि बन्द कर उस सम्पुट के गोले को, एक मिट्टी की मूषा के सम्पुट में रखदे और फिर कपड़मिट्टी कर धूप में सुखाकर लघुगजपुट में फूंक दे। इसप्रकार से पारदकी काली भस्म बनजाती है ॥४-७५-४७६

ज्ञातव्य—माधव ने यह प्रथम प्रकार, भावप्रकाश, (पूर्व खण्ड, प्रकरण ५-३२—३३) से उद्धृत किया है । शार्ङ्गधरसंहिता (मध्यमखण्ड, अ० १२,३८।४०) में भी यह है, आनंद कन्द (पृष्ठ १४७),तथा रसकामधेनु (पृष्ठ ४१३) में भी यह विधि

कुछ पाठान्तर से मिलती है। रसतरङ्गिणी में वर्णित अनुभूत पारदमारण का षष्ठ (छठा) प्रकार इसी विधि का अनुवाद-मात्र है। यथा—

काकोदुम्बरिका दुग्धै र्भावयेद्रामठं भिषक् ।
तत्कल्केन पुनः प्राज्ञो मूषायुग्मं प्रकल्पयेत् ॥
तद्दुग्धमर्दितश्चैव सूतं तत्र विनिक्षिपेत् ।
मुद्रां कृत्वा सूतगोलं मृण्मूषायां निधापयेत् ॥
सन्धिं विलेपयेद्वह्नि मृत्स्नया चाथ शोषयेत् ।
पचेल्लघुपुटे सूतं स्वाङ्गशीतं समुद्धरेत् ॥
मूषासन्धिं विलिख्याथ कालाञ्जनसमप्रभाम् ।
लाघवादिगुणोपेतं गृह्णीयाद् भस्मसूतकम् ॥
(रसतरङ्गिण्या सप्तमे तरंगे ३० ३३ श्लोके)

पारद मारण का यह प्रकार, रसतरङ्गिणी कार का अनुभूत है।

लघु गजपुट ।

शार्ङ्गधरसंहिता में इस पारदभस्म को मृदुपुट में बनाने का उल्लेख है और उसकी दीपिका टीका में मृदुपुट का अर्थ लघुगजपुट बतला कर उसका लक्षण भी लिख दिया है। इस प्रकार उसमें सोलह अङ्गुल गहरे चौड़े और लम्बे गढ़े में आरनेकण्डों में दिये गये को लघुगजपुट कहा गया है। यथा—

निपुणविहितगर्तैः षोडशैरङ्गुलैर्यो
मितसकलविभागस्तस्य मध्ये निधाय ।
ज्वलनमतिविशुष्कैर्गोमयैः पारदस्य
लघुगजपुटमेतत् प्रोक्तमेवं मुनीन्द्रैः ॥
(शार्ङ्गधरसहितायां, म०ख०, अ० १२।श्लो.३८-४०दीपिकाटीका)

अथान्य प्रकारः —

(पारदमारणस्य द्वितीयः प्रकारः)

अपामार्गस्यबीजानां मूषायुग्मं प्रकल्पयेत् ।
तत्सम्पुटे १क्षिपेत्सूतंमलयूदुग्धमिश्रितम् ॥४७७॥
द्रोणपुष्पीप्रसूनानि बिडङ्गमरिमेदकः२ ।
३एतच्चूर्णमधश्चोर्ध्वं दत्वा मुद्रां४ प्रदापयेत् ॥४७८॥
५तद्गोलं सन्धयेत्६सम्यङ् मृन्मूषासम्पुटे ७सुधीः ।
मुद्रां दत्वा शोषयित्वा ततो गजपुटे पचेत् ॥४७९॥
८एकेनैव पुटेनैतत्सूतस्य भस्म जायते ।
तत्प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥४८०॥

प्र०—पारदमारणस्य द्वितीयं प्रकारमाह—अपामार्गस्येति सुधीः=विद्वान् रसवैद्यः, अपामार्गस्य नूतनानि बीजानि विचूर्ण्य

---

१ 'न्यसेत्'। २ 'इरिमेदकः'। ३ 'ऊधोर्ध्वं च' इति इति शार्ङ्गधरसंहितायाम् ।

४ 'मुद्रा प्रदीयते' इति शार्ङ्गधरसंहितायां भावप्रकाशे च ।

५ 'तंगोलं सन्धयेत्' इति शार्ङ्गधरसंहितायाम् ।

६ 'स्थापयेत्'। ७ 'पचेत्' इति च भावप्रकाशे ।

८ 'एवमेकपुटेनैव जायते भस्मसूतकम्' इति शार्ङ्गधर-संहितायाम्, एवमेकपुटेनैव सूतकं भस्म जायते, इति च भाव-प्रकाशे पाठान्तरम् ।

जलेन पिष्ट्वा कल्कं विधाय तेन मूषायुग्मं प्रकल्पयेत् = सम्पुटाकारां मूषां कुर्यात्, तदनन्तरं द्रोणपुष्पीप्रसूनानि = द्रोणपुष्पी-पुष्पाणि विडङ्गम्, अरिमेदकः = विट्खदिरस्तस्य त्वक् ,एतच्चूर्णम् एतेषामर्धंचूर्णं तत्सम्पुटे = मूषासम्पुटमध्ये ऽधोनिधाय, तदुपरि मलयूदुग्धमिश्रितं = काष्ठोदुम्बरिका दुग्धे यत्नेन मर्दितं, सूतं = शुद्धपारदं क्षिपेत्, ऊर्ध्वञ्च = पारदस्योपरि च पुनः शेषमर्धं चूर्णं दत्वा मुद्रां प्रदापयेत् , तद्गोलं = पारदादिजनितगोलकमन्यस्मिन् मृन्मूषासम्पुटे सम्यग्यथास्यात्तदा ऽन्धयेत् = अवरोधयेत्, ततः = तदनन्तरं मुद्रां दत्वा = वह्निमृत्स्नया सन्धिलेपं विधाय, शोषयित्वा आतपे मूषां संशोष्य गजपुटे = लघुगजपुटे पचेत , एवमेकेनैवपुटेन सूतस्य = पारदस्यैतद्भस्म जायते, ततः पारदभस्म यथास्थाने यथामात्रम् = आवश्यकतानुसारमुचितमात्रया यथाविधि प्रयो-ज्यं वैद्येनेति शेषः। अत्रानुष्टप्छन्दः ॥ ४७७—४८० ॥

पारद मारण का द्वितीय प्रकार।

उ०—विद्वान रसवैद्य, अपामार्ग के नवीन बीजों को पानी में पीस कल्क बना कर उसकी दो मूषा बनावे। फिर द्रोणपुष्पी (गूमा) के सूखे फूल, बायविडङ्ग, तथा विट्खदिर की छाल का चूर्ण बना कर, उसमें से आधा चूर्ण उस मूषा में बिछा कर, चूर्ण के ऊपर, कठगूलर के दूध में मर्दन किये गये पारद को रख कर, ऊपर से शेष चूर्ण को रख कर सन्धि बन्द करदे और उस पारद आदि के बनाये हुये मूषासम्पुट स्वरूप गोले को दूसरे मिट्टी के मूषा में रख कर वह्निमृत्स्ना की मुद्रा से सन्धि बन्द कर, धूप में सुखा कर लघुगजपुट में फूंक

दे, इसप्रकार से एक पुट में ही पारद की भस्म हो जाती है; इस पारद भस्म को आवश्यकतानुसार उचित मात्रा में विधि पूर्वक प्रयोग करना चाहिये ॥ ४७७-४८० ॥

ज्ञातव्य—माधव ने पारदभस्म का यह द्वितीयप्रकार, भावप्रकाश (पूर्वखण्ड, प्रकरण ५।२६-३१) से उद्धृत किया है, शार्ङ्गधरसंहिता (मध्यमखंड, अ० १२।३५-३७) तथा योग रत्नाकर में भी यह है, रससङ्केतकलिका (उल्लास १।३८-४१) तथा रसकामधेनु (पृष्ठ ४१३) में भी यह कुछ पाठान्तर से विद्यमान है। रसतरङ्गिणी का पारदमारण का चतुर्थ प्रकार इस द्वितीय प्रकार का ही अनुवाद मात्र है। यथा—

अपामार्गस्य बीजानि नूतनानि विचूर्णयेत्।
कल्कीकृत्य पुनस्तेन मूषायुग्मं प्रकल्पयेत् ॥
अरिमेदः कृमिरिपुः द्रोणपुष्पीसुमं समम्।
सञ्चूर्ण्य चूर्णमेतेषां मूषामध्ये निधापयेत् ॥
काकोदुम्बरिकादुग्धे सूतं यत्नेन मर्दितम्।
चूर्णोपरि तु संस्थाप्य पुनश्चूर्णं प्रदापयेत् ॥
प्रलिप्य रसगोलञ्च मूषायां स्थापयेत्ततः।
सन्धिलेपं ततः कुर्यादवश्यं वह्निमृत्स्नया ॥
संशोष्य चातपे मूषां पुटेद् गजपुटे भिषक्।
एकेनैव पुटेनैवं रसो यातीह भस्मताम् ॥

(रसतरङ्गिणी, अ० ७।२३-२७)

अथान्य प्रकारः—

(पारदमारणस्य तृतीयः प्रकारः)

नागवल्ली रसैर्घृष्टः कर्कोटीकन्दगर्भगः१ ।
मृन्मूषासम्पुटे २पक्वः सूतो यात्येव भस्मताम् ॥४८१॥

प्र०—पारदमारणस्य तृतीयं प्रकारमाह—नागवल्लीति—नागवल्ली = ताम्बूलवल्ली तस्य रसैः = पत्ररसेन घृष्ट = मर्दितः, शुद्धपारदः कर्कोटीकन्दगर्भगः = वन्ध्याकर्कोटकीकन्दस्थः सन् मृन्मूषा सम्पुटे निरुध्य, लघुगजपुटे पक्वो भस्मतां यात्येव = अयमेव पारदस्य भस्म भवतीत्यर्थ । अत्रानुष्टप्छन्दः ॥ ४८१ ॥

पारदमारण का तृतीयप्रकार ।

शुद्धपारद को पान के रस में मर्दन कर, बांझककोड़ा (बांझखेखसा) के कन्द में रख बन्द करे फिर मिट्टी की मूसा में रख कपड़मिट्टी से सन्धि बन्द कर धूप में सुखाकर, लघुगज पुट में फूंक दे तो पारद की भस्म बन जाती है ॥ ४८१ ॥

ज्ञातव्य—माधव ने यह तृतीय प्रकार, भावप्रकाश (पूर्व खण्ड, प्रकाश ५।३४) से उद्धृत किया है तथा शार्ङ्ग-

---

१ 'गर्भितः ' इति पांठान्तरं शार्ङ्गधरसंहितायां भावप्रकाशे च ।

२ 'पक्त्वा ' इति पाठान्तरं शार्ङ्गधरसंहितायाम् ।

धर संहिता (मध्यमखण्ड-अ० १२।४१) में भी है, और कुछ पाठान्तर से रसमंजरी (अ० ३।१३), रसकामधेनु (पृष्ठ ४१३-४१४) और रसेन्द्रसारसंग्रह (अ० १।५६) में भी विद्यमान है। यथा—

भुजङ्गवल्लीनीरेण मर्दयेत्पारदं दृढम्।
कर्कटीकन्दमूषायां सम्पुटस्थं पुटेद्गजे।
भस्म तद्योगवाहि स्यात्सर्वकर्मसु योजयेत्॥

(रसेन्द्रसारसंग्रहे अ० १।५६)

रसतरङ्गिणी का पारदका पञ्चम मारण प्रकार, आयुर्वेद प्रकाश में वर्णित इस तृतीयप्रकार का अनुवाद मात्र है। तथा-

भुजङ्गबल्लरीरसै रसेश्वरं विमर्दयेत्।
ततश्चकर्कटीभवं सुपेषयेत्तु कन्दकम्॥
विधायकल्कमुत्तमं क्षिपेद्रसं तदन्तरे॥
निधाय सम्पुटे पुटेत्पुटे तु वारणाह्वये॥

(रसतरङ्गिणी ७।२८-२९)

(पारदमारणस्य चतुर्थः प्रकारः)

अन्यच्च—

पञ्चाङ्गीबर्बरीलिङ्गीद्रवैर्घस्त्रत्रयं रसः।
मर्दितः पुटितो भस्म स्वर्णवर्णं प्रजायते ॥४८२॥

प्र०—पारदमारणस्य चतुर्थं प्रकारमाह—पञ्चाङ्गीति—पञ्चाङ्गी बर्बरीलिङ्गी द्रवैः = पञ्चाङ्गी वनतुलसीश्वरीरसैः, बर्बरी =

वनतुलसी भारङ्गी वा लिङ्गी = ईश्वरी शिववल्ली वा, एतेषां द्रवैः = रसैर्घस्त्रत्रयं = दिनत्रयं मर्दितस्तदनु पुटितः = लघुगजपुटे पुटित श्चैव सूतः = पारदस्तर्हि तस्य स्वर्णवर्णं भस्म प्रजायते । अत्रानुष्टप् छन्दः ॥ ४८३ ॥

पारदमारण का चतुर्थ प्रकार ।

३०—पारद को पञ्चाङ्गी, वनतुलसी तथा ईश्वरी औषधियों के रससे तीन दिन तक खरल में मर्दन कर लघु-गजपुट में फूंकदेने से पारद की स्वर्णवर्ण (सुनहरी) की भस्म होजाती है ॥ ४८२ ॥

ज्ञातव्य—पारदमारण का यह चतुर्थप्रकार, रसकामधेनु (पृष्ठ ४१०) में भी मिलता है ।

(पारदमारणस्य पञ्चमः प्रकारः)

सूतश्चतुष्पलमितः समशुद्धगन्धः,
स्याद्धूमसारपिचुरेक इदं क्रमेण ।
संमर्दयेद्विमल दाडिमपुष्पतोयै,
र्घस्त्रं विमर्द्य सितसोमलेमाषकेण ॥४८३॥
एतन्निधाय सकलं जलयन्त्रगर्भे,
सम्मुद्रय सन्धिमुदितेन पुरा क्रमेण ।
आपूर्य यन्त्रमुदकेन दिनानिचाष्टौ,
वह्निं क्रमेण तदधो विदधीत विद्वान् ॥४८४॥

पश्चात्ततो जलमुदस्य रसं तलस्थ–
मादाय भाजनवरे सुभिषङ् निदध्यात्।

मात्रा—

सम्पूज्य शम्भुगिरिजागिरिजातनूजान्,
दद्याच्छुभेऽहनि रसं वरमेकगुञ्जम् ॥४८५॥

अनुपानम्—

ताम्बूलिकादलयुतं ससितं पयोऽनु,
पीत्वाऽम्लभाषलवणौ रहितं सदन्नम् ।
अद्यात्कियन्त्यपि दिनानि ततो यथेच्छं,
भक्ष्यं भजेदथ नरो विगतामयः स्यात्॥४८६॥

सितसोमलं = 'सखिया सोमल' इति भाषा ।

प्र०—पारदमारणस्य पञ्चमप्रकारमाह—सूत इति–स्पष्टम् धूमसारं = गृहधूमं, पिचुः = कर्षः, जलयन्त्रं = कच्छपयन्त्रनाम्ना प्रसिद्धं रसेन्द्रचूडामणौ । अत्र बसन्ततिलका वृत्तम् ॥४८३-४८६॥

पारदमारण का पञ्चम प्रकार

उ०—विद्वान रसवैद्य, एक खरल में शुद्ध पारद ४ पल (१६ तोला), शुद्ध गन्धक १५ तोला, घर का धुआँ १ कर्ष (१ तोला) डालकर अनार के फूलों के रस से मर्दन करे फिर उसमें १ माशा (आधुनिक ६ रत्ती) शुद्ध सफेद संखिया डालकर, एक दिन तक मर्दन करे और जलयन्त्र (कच्छपयन्त्र) में रख दृढ़ तोयमृत्स्ना अथवा वह्निमृत्स्ना से सन्धि बन्दकर,

तथा यन्त्र में गर्म जल भरकर उसके नीचे मन्दमध्यतीव्रक्रम से आठ दिन तक अग्नि जलावे, फिर स्वांग शीतल होने पर यन्त्र को उतार जल फेंककर तलभाग में रखे हुये पारद को निकालकर एक अच्छे बर्तन में रखे, यह ही पारदभस्म है।

मात्रा—

महादेव, पार्वती और गणेश की पूजाकर शुभ दिन में इस पारद भस्म को १ रत्ती की मात्रा में प्रयोग करे।

अनुपान—

पारदभस्म खाने के पश्चात् पान खावे, मिश्री डालकर दूध पीवे तथा खट्टे, पदार्थ, उड़द और नमक से रहित पथ्यरूप उत्तम भोजन कुछ दिन तक खावे, और फिर स्वस्थ होने पर, अपनी रुचि के अनुसार भोजन करे ॥ ४८३-४८६ ॥

जलयन्त्र का लक्षण।

ज्ञातव्य—रसप्रकाशसुधाकर में पारद के चारण संस्कार के प्रकरण जलयन्त्र का निम्नलिखित लक्षण लिखा गया है। एक उत्तम गोल लोहका बर्तन ले जिसमें तीन आढ़क (१२ प्रस्थ) आसके, फिर उस बर्त्तन के बीच में एक दृढ़ लोहसम्पुट रखे और इस लोहसम्पुट के भीतर मर्दन किये हुये पारद को रखकर, सम्पुट को सन्धि को दृढ़ जलमृत्स्ना अथवा वह्निमृत्स्ना से बन्द करदे तथा चूल्हे पर यन्त्र को चढ़ाकर, उसमें ३ आढ़क गर्म जल भरकर, मन्द मध्य तीव्र क्रमसे अग्नि दे। यथा—

अतो हि जलयन्त्रस्य लक्षणं कथ्यते मया ।
सुवृत्तं लोहपात्रं च जलं तत्राढकत्रयम् ॥
तन्मध्ये सुदृढं सम्यक्कर्त्तव्यं लोहसम्पुटम् ।
लोहसम्पुटमध्ये तु निक्षिप्तं शुद्धपारदम् ।
....

सम्पुटं मुद्रयेत्पश्चाद् दृढया तोयमृत्स्नया ।
वह्निमृत्स्नया वापि सन्धिरोधं तु कारयेत् ॥
चुल्ल्यां निवेश्य तद्यन्त्रं जलेनोष्णेन पूरितम् ।
क्रमादग्निः प्रकर्त्तव्यः.........................

(रसप्रकाशसुधाकरे, अ० १-८७-९१)

विशालवदने भाण्डे तोयपूर्णे निवेशयेत् ।
खर्परं पृथुकं सम्यक् प्रसरे तस्य मध्यमे ॥
आलवालं विडैः कृत्वा तन्मध्ये पारदं क्षिपेत् ।
तदूर्ध्वं च विडं दत्वा मल्लेनारुध्य यत्नतः ।
पुटेदौचित्ययोगेन म्रियते तन्निगद्यते ।
यन्त्रं कच्छपसञ्ज्ञं हि तदुक्तं रसजारणे ॥

(रसेन्द्रचूडामणौ, अ० ५)

अथान्यन्मतम्—

(पारदमारणस्य षष्ठः प्रकारः)

अङ्कोलस्य शिफावारिपिष्टं खल्वे१ विमर्दयेत् ।

---

१ 'रसरत्नसमुच्चयपाठसंवादानुसारमयं पाठोऽस्माभिः स्वीकृतः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'कल्के' इति पाठः तन्न समीचीनं प्रतिभाति ।

सूतं गन्धकसंतुल्यं२ दिनान्ते तं निरोधयेत् ॥४८७॥
पुटेद्भूधरे यन्त्रे दिनान्ते स मृतो भवेत् ॥

प्र०—पारदमारणस्य षष्ठं प्रकारमाह—अङ्कोलस्येति—खल्ले गन्धकसंतुल्यं सूतं = शुद्धपारदम् निक्षिप्य कज्जलीं कृत्वा अङ्कोलस्य शिफावारिपिष्टम् ॥ अङ्कोलमूलरसेन दिवसत्रयं पिष्ट्वा विमर्दयेत्, तदनन्तरं तं मूषायां निधाय वह्निमृत्स्नया सन्धिलेपं कृत्वा घर्मे संशोष्य दिनान्ते भूधरे यन्त्रे पुटेत् = प्रहरचतुष्टयं पचेत्, एवं पारदस्य भस्म भवति। अत्रानुष्टप्छन्दः ॥ ४८७ ॥

पारदमारण का षष्ठ (छठा) प्रकार।

उ०—एक खरल में समभाग शुद्ध पारद और शुद्ध गन्धक की कज्जली कर श्वेत, अङ्कोल (ढेरा) की जड़ के रस से तीन दिन तक खूब मर्दन करे, फिर उसको मूषा में रख दे और वह्निमृत्स्ना से सन्धि लेप कर धूप में सुखा दे और सायंकाल भूधरयन्त्र में पुट दे, इस प्रकार चार प्रहर (१२ घण्टे) पकाने से प्रातः काल उत्तम पारदभस्म हो जाती है ॥४८७॥

ज्ञातव्य—माधव ने यह षष्ठ मारणप्रकार, रसरत्नसमुच्चय (अ० ११।१२०) से उद्धृत किया है, आनन्दकन्द (१४८पृष्ठ) रसमञ्जरी (अ० १।१४-१५) तथा रसेन्द्रसारसंग्रह (अ० १ ६०) में भी यह कुछ पाठान्तर से विद्यमान है। यथा—

---

२ 'संयुक्तं' इति पाठान्तरं रसरत्नसमुच्चये।

श्वेताङ्कोटजटानीरैर्मर्द्यः सूतो दिनत्रयम्।
पुटेत्तु चान्धमूषायां सूतो भस्मत्वमाप्नुयात्॥

(रसेन्द्रसारसंग्रह, अ० ११६०)

रसकामधेनु (पृष्ठ ४११) में अङ्कोठ के स्थान में अर्क (मन्दार) मूलके रस में पारद के घोटने का उल्लेख मिलता है।

रसतरङ्गिणी में वर्णित पारदमारण का तृतीय प्रकार, आयुर्वेदप्रकाश के इस षष्ठप्रकार का ही अनुवाद मात्र है।

यथा—

अङ्कोलमूलसलिलैः सूतं खल्वे विमर्दयेत्।
सूतमानोन्मितं गन्धं शुद्धं तत्र विनिक्षिपेत्॥
संस्थाप्य सूतं मूषायां, विदध्याद्वह्निमृत्स्नया।
सन्धिलेपं, ततः प्राज्ञः प्रदीप्तोपलपावके॥
यन्त्रे भूधरसञ्ज्ञे च पचेद्यामचतुष्टयम्।
एवं रसेश्वरः शीघ्रं नियतं याति भस्मताम्॥

(रसतरङ्गिणी, अ० ७ २०-२२)

विशेष ज्ञातव्य—मूल आयुर्वेदप्रकाश में, ४८६ श्लोक के अनन्तर, मृतसूत के लक्षण के ३ श्लोक लिख कर, फिर यह मारण प्रकार लिखा है, इस प्रकार बीच में क्रमभङ्ग हो गया है, इसलिये हमने मारणक्रम में यह अन्यमत के मारणप्रकार लिख कर अन्त में मृतसूत के लक्षण के ३ श्लोक लिखे हैं, जिससे क्रमभङ्ग का दोष दूर हो जाता है।

अथान्यच्च—

(पारदमारणस्य सप्तमः प्रकारः)

वटक्षीरेण सूताभ्रौ मर्दयेत्प्रहरत्रयम्[१] ॥४४८॥
[२]पाचतेत्तस्यकाष्ठेन भस्मीभवति तद्रसः ।

प्र०—पारदमारणस्य सप्तमं प्रकारमाह—वटेति—सूताभ्रौ पारदाभ्रकौ, वटक्षीरेण=वटदुग्धेन प्रहरद्वयं मर्दयेत्, तदनन्तरं मृद्भाण्डे निक्षिप्य चुल्ल्यां च संस्थाप्य, पूर्वं कार्पासशुष्कदण्डादि काष्ठस्यात्यन्तमन्दाग्निं दत्वा, तस्य वटवृक्षस्य काष्ठेन=आर्द्र-दण्डेन संचालयन् पाचयेत्, इत्थं तद्रसो भस्मीभवति । अत्रानुष्टप्छन्दः ॥ ४८८ ॥

पारदमारण का सप्तम (सातवां) प्रकार

उ०—एक खरल में, समानभाग शुद्ध पारद और शुद्ध अभ्रक को वट के दूध से तीन प्रहर (बारह घण्टे) तक मर्दन करे, फिर एक मिट्टी के बर्त्तन (चौड़ी हांडी आदि) में भरकर चूल्हे पर चढ़ाकर वट के गीले डण्डा (लकड़ी) से पारद के प्रयोग को चलाता हुआ, पहिले कपास (बन) की

---

१ आनन्दकन्दरसरत्नसमुच्चययोः पाठसंवादादयं पाठोऽस्माभिः स्वीकृतः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'प्रहरद्वयम्' इति पाठः समुपलभ्यते ।

२ 'तेन' इति पाठान्तरं रसरत्नसमुच्चये ।

सूखी लकड़ी आदि से, अत्यन्त मन्द अग्नि द्वारा पाक करे, अन्यथा प्रारम्भ में ही तीव्र अग्नि देने से पारद उड़ जायगा, फिर अन्त में कुछ तीव्र अग्नि से पकाने से वह पारद मर जाता है अर्थात् पारद की काली भस्म बन जाती है।४८८॥

ज्ञातव्य—माधव ने यह मारणप्रकार, रसरत्नसमुच्चय (अ० ११।११२) से उद्धृत किया है, तथा आनन्दकन्द (पृष्ठ १४८) में भी कुछ पाठान्तर से मिलता है। इसीके आधार पर, रसतरङ्गिणी में पारदमारण का अनुभूत सप्तमप्रकार लिखा गया है, परन्तु उसमें अभ्रक के स्थान पर गन्धक डाला गया है। यथा—

सूतं हिङ्गुलसम्भवं पलमितं तुल्यं बलिञ्चाहरेद्।
युक्त्या कज्जलिकां विधाय वटजक्षीरै स्ततः पेषयेत्।
मृद्भाण्डे विनिधाय तत्र नवभूदण्डेन संचालिते।
मृद्वग्नौ दिनपाचितो रसविरो याति ध्रुवं भस्मताम्॥
रसेश्वरं सुमसृणं कृष्णाञ्जनसमप्रभम्।
निर्धूमादिगुणोपेतंगृह्णीयाद् भस्मतां गतम्॥

(रसतरङ्गिणी ७ ३४-३५)

(पारदमारणस्याष्टमः प्रकारः)

अथान्यच्च—

कटुतुम्ब्युद्भवे कन्दे गर्भो नारीपयःप्लुतः१ ॥४८९॥

---

१ 'प्लुता' इति पाठान्तरं रसरत्नसमुच्चये।

सप्तधा १मिश्रयेत् सूतःस्वेदितो गोमयाग्निना ।

प्र०—पारदमारणस्याष्टमं प्रकारमाह-कटिवति-कटुतुम्ब्यु-द्भवे कन्दे गर्भे = कटुतुम्ब्याः कन्दमध्ये नारीपयः प्लुतः सूतः = पारदो गोमयाग्निना सप्तधा स्वेदितः सन् म्रियते। अत्रानुष्टुप्छन्दः ॥ ४८६ ॥

पारदमारण का अष्टम (आठवां) प्रकार ।

उ०—कड़वी तूंबी के कन्द में स्त्री का दूध भर, उसमें पारद डाल कर, सन्धि बन्द करे फिर मिट्टी की मूषा में रख वह्निमृत्स्ना से सन्धि बन्द कर धूप में सुखा कर, गौ के जंगली उपलों (कण्डों) की अग्नि से पारद को स्वेदन करे, इस प्रकार सात बार स्वेदन करने से पारद मर जाता है। अर्थात् पारद की भस्म बन जाती है ॥ ४८६ ॥

ज्ञातव्य—माधव ने यह मारणप्रकार, रसरत्नसमुच्चय (अ० ११ । ११६) से उद्धृत किया है, तथा आनन्दकन्द (पृष्ठ १४७-१४८) में भी यह कुछ पाठान्तर से मिलता है।

अन्यच्च—

(पारदमारणस्य नवमः प्रकारः)

अपामार्गस्य बीजानि तथैरण्डं२ च चूर्णयेत् ॥४९०॥

---

१ 'स्वेदितः सूतो म्रियते' इति च पाठान्तरं रसरत्न समुच्चये।

२ 'एरण्डस्य'। इति पाठान्तरं रसरत्नसमुच्चये।

तच्चूर्णं पारदे देयं मूषायामधरोत्तरम् ।
रुद्ध्वा [१]पचेल्लघुपुटैश्चतुर्भिर्भस्मतां व्रजेत् ॥४९१॥

प्र०—पारदमारणस्य नवमं प्रकारमाह-अपामार्गस्येति-अपामार्गस्य बीजानि तथैरण्डबीजं च चूर्णयेत्, तच्चूर्णं मूषायां पारदे ऽधरोत्तरं देयं=मूषायामधं चूर्णं निधाय शुद्धपारदं निक्षिप्य, तदुपरि शेषमर्धं चूर्णं प्रदेयम्, मूषासम्पुटं मुद्रयित्वा, अन्यस्मिन् मूषासम्पुटे रुद्ध्वा वह्निमृत्सया सन्धिलेपं विधाय घर्मे संशोष्य लघुपुटैः=लघुगजपुटैः पचेत्, एवं चतुर्भिः पुटर्भस्मतां व्रजेत्। अत्रानुष्टप्छन्दः ॥ ४९०-४९१ ॥

पारदमारण का नवम (नवां) प्रकारः ।

उ०—अपामार्ग (लटजीरा, चिरचिटा) के बीज, तथा एरण्ड के बीजों का चूर्ण करे, फिर एक मूषा में आधा चूर्ण नींचे भर, पारद रख, ऊपर से शेष आधा चूर्ण डाल सम्पुट बन्द कर, फिर इसको दूसरे मूषा सम्पुट में रख वह्निमृत्स्ना से सन्धि बन्द कर, धूप में सुखाकर लघुगजपुट में फूंक दे, इस प्रकार चार पुट में पारद की भस्म बन जाती है ॥ ४९०-४९१ ॥

ज्ञातव्य—माधव ने यह मारणप्रकार, रसरत्नसमुच्चय (अ० ११-११८) से उद्धृत किया है।

---

१ 'लघुपुटैः पच्यात्' इति च पाठान्तरं रसरत्नसमुच्चये।

अथान्य प्रकारः—

(पारदमारणस्य दशमः प्रकारः)

खरमञ्जरिबीजान्वित१ पुष्पकन्दबीजैः २सुचूर्णितं कल्कं।
कृत्वा सूतं पुटयेद् दृढमूषायां भवेद्भस्म ॥४९२॥

प्र०—पारदमारणस्य दशमं प्रकारमाह—खरमञ्जरीति—सुचूर्णितैः खरमञ्जरी = अपामार्गः तस्यबीजै रचितैः = युक्तैः पुष्करबीजैः कल्कं कृत्वा, तत्कल्कमध्ये दृढमूषायां पारदं निधाय वह्निमृत्स्नया सन्धि मुद्रयित्वा पुटयेत् = लघुगजपुटे पचेत्, इत्थं पारदस्य भस्म भवेत्। अत्रार्या वृत्तम् ॥ ४९२ ॥

पारदमारण का दशम (दसवाँ) प्रकार।

उ०—अपामार्ग के बीज तथा कमल के बीज का चूर्ण कर पानी में पीस कल्क कर, उस कल्क में पारद को रख सम्पुट बनादे, फिर दृढ मूषा में उस सम्पुट को एक दृढ मूषा में रख कर लघुगजपुट में फूंक दे, इस प्रकार से पारद की भस्म हो जाती है ॥ ४९२ ॥

ज्ञातव्य—माधव ने यह मारणप्रकार, रसरत्नसमुच्चय (अ० ११।११४) से उद्धृत किया है।

१, २, इमौ पाठौ रसरत्नसमुच्चयपाठसंवादादस्माभिः स्वीकृतौ, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु ‘पुष्पक’ इति ‘सुचूर्णितम्’ इति च पाठौ समुपलभ्येते।

(पारदमारणस्यैकादशः प्रकार)

अथान्यच्च—

काकोदुम्बरिकाया दुग्धेन[1] विभावितो हिंगुः ।
मर्दनपुटनविधानात्सूतं भस्मीकरोत्येव ॥४६३॥

इति भस्मसूतः ॥

प्र०—पारदमारणस्यैकादशं प्रकारमाह—काकोदुम्बरिकाया इति—काकोदुम्बरिकायाः = काष्ठोदुम्बरिकाया दुग्धेन विभावितो हिङ्गुर्ग्राह्यः, तस्य मूषाद्वयं प्रकल्प्य तत्र काष्ठोदुम्बरिका दुग्धमर्दितं सूतं = पारदं क्षिप्त्वा, अन्यस्मिन् मूषासम्पुटे ऽवरुध्य लघुगजपुटे पचेत् , इत्थं मर्दनपुटनविधानात् , सूतं = पारदं भस्मी करोत्येव । अत्रानुष्टप्छन्दः ॥ ४६३ ॥

पारदमारण का एकादश (ग्यारहवां) प्रकार ।

उ०—कठगूलर के दूध में पिसी हुई हींग की दो मूषा बना कर, इस मूषा सम्पुट में कठगूलर के दूध में तीन घण्टे तक मर्दन किये गये पारद को भर सन्धि बन्द करे, फिर इस सम्पुट को दूसरी मिट्टी की मूषा के सम्पुट में बन्द कर वह्निमृत्स्ना की मुद्रा से सन्धि बन्द कर, धूप में सुखा कर लघुगजपुट में फूंके, इस प्रकार मर्दन कर पुट देने से पारद की भस्म हो जाती है ॥ ४६३ ॥

ज्ञातव्य—माधव ने यह मारणप्रकार, रसरत्नसमुच्चय (अ० ११।११५) से उद्धृत किया है ।

---

१ 'सुभावितः' इति पाठान्तरं रसरत्नसमुच्चये ।

(अथ मृतसूतलक्षणम्)

अतेजा अगुरुः शुभ्रो लोहहाऽ चंचलो *रसः ।
यदा नावर्तते वह्नौ नोर्ध्वं गच्छेत्तदा मृतः ॥४२४॥

अचञ्चल इति छेदः ।

प्र०—मृतसूतलक्षणमाह—अतेजा इति–अतेजाः = तेजसा हीनः, चाकचक्यरहित इत्यर्थः, अगुरुः = लघुः शुभ्रो वर्णेन लोहहा = स्वर्णादिधातुभोक्ता, अचञ्चलः = चापल्यरहितः, रसः = पारदः, यदा वह्नौ नावर्तते = निर्धूमो भवति, ऊर्ध्वं न गच्छेत् = अग्निस्थायी च भवेत्तदा मृतो ज्ञेय इति शेषः ॥ अत्रानुष्टप्छन्दः ॥ ४६४ ॥

मृतपारद (पारदभस्म) का लक्षण ।

उ०—जो पारद चकाचौंधस्वरूप तेजरहित, लघु (हलका), सफ़ेद, स्वर्णादिधातुओं का भक्षक, चञ्चलता रहित, अग्नि पर डालने से धूमरहित, तथा ऊपर को न उड़े अर्थात् अग्निस्थायी हो, उसको मृत (मरा हुआ) पारद (पारदभस्म) समझना चाहिये ॥ ४६४ ॥

ज्ञातव्य—माधव ने मृतपारद का यह लक्षण, रससंकेत कलिका (उल्लास १ । ४३) से उद्धृत किया है ।

(मतान्तरम्)

तन्त्रान्तरेऽपि—

* 'मृतोऽपि विषवद्भवेत्' इति पाठान्तरं रसेंद्रचिंतामणौ ।

अगुरुरतेजाः शुभ्रो वह्निस्थायी स्थिरोऽधूमः ।
हेमादिधातुभोक्ता तत्कर्त्ता स्यान्मृतः सूतः ॥४९५॥

प्र०—मतान्तरेण मृतसूतलक्षणमाह—अगुरुरिति–स्पष्टम्। अत्रोपगीतिवृत्तम् ॥ ४६५ ॥

अन्यशास्त्र के मत से मृतपारद का लक्षण ।

उ०—लघु (हलका), चकाचौंधस्वरूप तेज रहित, श्वेतवर्ण (सफ़ेद रङ्ग), अग्निस्थायी, स्थिर, धूमरहित, तथा स्वर्णादि धातुओं के भक्षक पारद को, मृतपारद समझना चहिये ॥ ४६५ ॥

ज्ञातव्य—रसार्णव, रसमञ्जरी (अ० २ । ५५) तथो रसकामधेनु (पृष्ठ ३१६) में दूसरे ढंग से मृतपारद का लक्षण लिखा गया है । यथा—

आर्द्रत्वं च घनत्वं च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥

(अथ गुणाः)

रसायनं त्रिदोषघ्नो योगवाह्यतिशुक्रलः ।
भस्मसूतोऽखिलातङ्कनाशनस्त्वनुपानतः ॥४९६॥

इति भस्मसूत गुणाः ॥

प्र०—मृतसूतगुणानाह—रसायनमिति–भस्मसूतः = भस्मरूपो मृतपारदः = (पारदभस्म) रसायनं = जरामृत्युहरो रसायन-

स्वरूप', त्रिदोषघ्नः, वातादिदोषत्रयनाशकः, योगवाही, अतिशुक्लः = अतिशयवीर्यवर्द्धकः, अनुपानतश्च, अखिलातङ्कनाशनः = निखिलरोगहरति ॥ अत्रानुष्टप्छन्दः ॥ ४६६ ॥

मृतपारद का गुण।

उ०—मृतपारद (पारदभस्म), रसायनस्वरूप (वृद्धावस्था तथा मृत्यु को दूर करने वाला), वायु पित्त तथा कफ दोषनाशक, योगवाही, अत्यन्त वीर्यवर्द्धक और अनुपानभेद से सम्पूर्ण रोगों को नष्ट करने वाला है ॥ ४६६ ॥

ज्ञातव्य—अर्वाचीन रसग्रन्थ रसतरङ्गिणी में, मृतपारद के गुण तथा आमयिक प्रयोग, विस्तारपूर्वक लिखे हैं। यथा—

गुणाः— ग्रहणीगजकर्षणदक्षतरं त्वतिसारहरं क्षयशोषहरम्।

जठरानलमान्द्यविनाशकरं परिशीलय सूतभवं भसितम् ॥

....

(रसतरङ्गिणी, ७। ३६-४०)

आमयिकः प्रयोगः—

पांशुमुस्तकषायेण सुरसाक्वथितेन वा।

कणाक्वाथेन वा युक्तो मृतः सूतो हरेज्ज्वरम् ॥

....

(रसतरङ्गिणी, ७। ४१-७४)

(पारदभक्षणाख्यः संस्कारः)

अथ पारदसेवनविधिं वक्ष्यामः ।

(क्षेत्रीकृतदेहस्य पारदरसायनसेवनाधिकारित्वम्)

क्षेत्रीकृतनिजदेहः कुर्वीत रसायनं मतिमान् ।
विधिना पथ्यविधानादमरदेहतुल्यदेहः स्यात् ॥४९७॥

प्र०--पारदसेवनविधिवर्णनप्रसंगे, प्राक् क्षेत्रीकृतदेहं पारदरसायनसेवनाधिकारिणं निर्दिशति-क्षेत्रीति-स्पष्टम् ॥ अत्रानुष्टप्छन्दः ॥ ४९७ ॥

पारद सेवन विधि—

पारदरसायन के सेवन करने का अधिकारी ।

बुद्धिमान् पुरुष, आगे ५०५ वें श्लोक में बताई हुई क्षेत्रीकरणप्रक्रिया से शरीर का क्षेत्रीकरण (रसायन सेवन करने योग्य) करके, 'रसायन' का सेवन करे । इससमय परिमित और विधिपूर्वक साठी चावल का भात तथा मूंग की दाल आदि स्वरूप पथ्य (भोजन) करने से, मनुष्य का शरीर, देवताओं के शरीर के समान दृढ़ शरीर वाला हो जाता है ॥ ४९७ ॥

ज्ञातव्य—यह श्लोक, कुछ परिवर्तित रूप से, आयुर्वेद प्रकाश में आगे (श्लोक ५०८) भी आया है। रसतरङ्गिणी (७ । ७६) का निम्नलिखित श्लोक, इसी श्लोक का अनुवाद मात्र है—

क्षेत्रीकृत्यं निजं देहं सेवेतेह रसायनम्।
विधिना मितपथ्याशी देहं सिद्धि हि विन्दति ॥

देवीयामलतन्त्र में पारद रसायन सेवन करने के लिये अनुकूल समय आदि का भी विधान है, इस विधान के निम्नलिखित श्लोक, रसकामधेनु (पृष्ठ ५२६) में उद्धृत हुये मिलते हैं—

सुमुहूर्ते सुनक्षत्रे ह्यनुकूलदिने गृहे।
शुद्धपक्षे च पुण्याहे पुण्याहं वाचयेत्सुधीः ॥
पूजयेद्योगिनीचक्रं रसेन्द्रं गुरुभैरवौ।
विप्रांश्च भोजयेत्पश्चाद्यथाविभवविस्तरम् ॥
रसायनविधानाय कल्पिते स्वगृहोत्तमे।
सुधाधौते सुधाशुभ्रे प्रत्यहं मार्जिते गृहे ॥
इत्थं गृहे भूगृहे वा विजने वा समाचरेत्।
प्रियं स्वभक्तं निर्लोभमनुरक्तमलोलुपम् ॥
सदाचारं बुधं प्राज्ञं सहायं परिकल्पयेत्।
नासहायः प्रकुर्वीत सर्वथा रससाधनम् ॥

विशेष ज्ञातव्य—पारद का विधिपूर्वक भक्षण (सेवन) करना, पारद का अन्तिम संस्कार माना गया है, रसेन्द्र-चिन्तामणि में 'भक्षण' और रसरत्नसमुच्चय में 'शरीरयोग' नाम से इसका वर्णन किया गया है, रसार्णव में 'देहवेध' विधान शब्द इसके लिये लिखा है, जैसा कि रसकामधेनु (५२५ पृष्ठ) में उद्धृत हुए रसार्णव के निम्नलिखित श्लोक से ज्ञात होता है—

लोहवेधास्त्वया देव ? यदर्थमुपवर्णिताः ।
तं देहवेधमाचक्ष्व येन स्यात्खेचरी गतिः ॥

(क्षेत्रीकरणमन्तरा पारदरसायनसेवने दोषः)

*अक्षेत्रीकरणे सति रसायनं यो नरः प्रयुञ्जीत ।
तस्य क्रामति न रसः +सर्वाङ्गजदोषकृद्भवति ॥४९८॥

प्र०—क्षेत्रीकरणमन्तरा पारदरसायनसेवने दोषमाह— अक्षेत्रीकरण इति-स्पष्टम् । अत्रार्यावृत्तम् ॥ ४६८ ॥

उ०—जो मनुष्य, शरीर का क्षेत्रीकरण किये बिना ही, रसायन का प्रयोग करता है, उसके शरीर में पारद भली भाँति लाभ नहीं करता है और विपरीत क्रिया कर अङ्गों को दूषित कर देता है ॥ ४६८ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १६०) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, ' रसहृदय ' ग्रन्थ का है, रसकामधेनु (५२८ पृष्ठ) में भी,यह रसहृदय से ही उद्धृत किया गया है । रसमञ्जरी ग्रन्थ

---

* अकृते क्षेत्रीकरणे' इति रसेन्द्रचिन्तामणौ, 'अकृतक्षेत्रीकरणे' इति रसकामधेनावुद्धृते श्लोके च पाठान्तरम् ।

+रसकामधेनुसम्मतोऽयं साधीयान्पाठोऽस्माऽभिः स्वीकृतः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे रसेन्द्रचिंतामणौ तु 'सर्वाङ्गदोषकृद्भवति' इति पाठः समुपलभ्यते ।

में भी यह श्लोक मिलता है। रसतरङ्गिणी (७ । ७७) का निम्नलिखित श्लोक, इस श्लोक का अनुवादमात्र है—

रसायनं यः कुरुते क्षेत्रीकरणमन्तरा।
देहसिद्धिर्नतस्य स्यात् प्रत्युत क्लेशकृद्भवेत् ॥

(क्षेत्रीकरणाभावे फलाभावः)

अक्षेत्रीकरणे सूतोऽप्यमृतोऽपि विषं *भवेत्।
फलसिद्धिः कुतस्तस्य सुबीजस्योषरे यथा ॥४९९॥

प्र०--क्षेत्रीकरणाभावे फलाभावमाह--अक्षेत्रीति-स्पष्टम्। अत्रानुष्टप्छन्दः ॥ ४६६ ॥

उ०—जिस प्रकार ऊसर भूमि में बोया गया उत्तम बीज भी, उत्पन्न नहीं होता है, उसी प्रकार बिना क्षेत्रीकरण किये हुये शरीर में सेवन किया गया अमृत स्वरूप उत्तम संस्कृत पारद भी लाभदायक न होकर, उलटा विष के समान हानिकारक हो जाता है ॥ ४६६ ॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १८६) से उद्धृत किया है, रसमञ्जरी में भी यह मिलता है। रसतरङ्गिणी (७ । ७७) के निम्नलिखित श्लोक का, यह श्लोक ही आधार है--

सुबीजमपि संस्कृतं कृषिविधानदक्षैरिह

* 'चाऽचलः' इति पाठान्तरं रससंकेतकलिकायाम्।

प्ररोहति न कर्हिचित् सुविततोषरोप्तं यथा।
तथैव सुभिषग्वरैःकृतपञ्चकर्मक्रमे
नरे हि न रसायनं फलति जातु संयोजितम् ॥

(क्षेत्रीकरणेनैव सर्वरसायनसिद्धिः)

कर्त्तव्यं क्षेत्रकरणं सर्वस्मिंश्च रसायने।
*नाक्षेत्रकरणाद्देवि ! किंचित्कुर्याद्रसायनम् ॥५००॥

प्र०—क्षेत्रीकरणेनैव सर्वेषां पारदादिरसायनानां सिद्धिमाह—कर्त्तव्यमिति—स्पष्टम्। अत्रानुष्टप्छन्दः ॥ ५०० ॥

उ०—हे पार्वती देवि ? पारद (पारा) आदि सब प्रकार की रसायन सेवन करने से पहिले शरीर का क्षेत्रीकरण कर लेना चाहिये, क्षेत्रीकरण किये बिना किसी भी रसायन का सेवन नहीं करना चाहिये ॥ ५०० ॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १८८) से उद्धृत किया है, रसमञ्जरी में भी यह मिलता है।

---

* 'न क्षेत्रकरणात्' इति पाठान्तरं रसेन्द्रचिन्तामणौ, तत्र क्षेत्रकरणात् (ल्यब्लोपेपञ्चमी) = क्षेत्रीकरणं विहायेत्यर्थो विधेयः।

(क्षेत्रीकरणस्वरूपम्)

अथ नित्यनाथः—

पंचकर्म पुरा कृत्वा पश्चात्सकलदेहिनाम् ।
योजनीयो रसो दिव्यः शीघ्रं सिद्धिमवाप्नुयात् ५०१

प्र०—नित्यनाथमतेन क्षेत्रीकरणस्वरूपमाह—पञ्चेति—स्पष्टम्, पञ्चकर्म = ५०३ श्लोके वक्ष्यमाणम् । अत्रानुष्टप्छन्दः॥५०१॥

नित्यनाथ के मत से क्षेत्रीकरण का स्वरूप ।

उ०—सब मनुष्यों को, पहिले पञ्चकर्म द्वारा शरीर को शुद्ध कर, फिर रसायन स्वरूप उत्तम संस्कृत आरोट (शुद्ध) पारद का प्रयोग करना चाहिये, इससे शीघ्र ही सिद्धि प्राप्त होती है ॥ ५०१ ॥

ज्ञातव्य—माधव ने यह श्लोक, नित्यनाथ सिद्धकृत रसरत्नाकर से उद्धृत किया है । रसतरङ्गिणी (७ । ७६) के 'क्षेत्रीकरण स्वरूप' का, यह श्लोक ही आधार है ।

पञ्चकर्म का वर्णन, आगे ५०३ वें श्लोक में किया गया है । शरीर के क्षेत्रीकरण के लिये, आरोटसञ्ज्ञक पारद का प्रयोग किया जाता है । यथा—

(१) सुशोधितो रसः सम्यगारोट इति कथ्यते ।
स क्षेत्रीकरणे श्रेष्ठः शनैर्व्याधिविनाशनः ॥
(आयुर्वेदप्रकाश अ० १ । ३०६)

(२) आरोटं भक्षयेत् पूर्वं................ ..

(३) आरोटमिति सेवेत प्रथमं देहसिद्धये ।

(रसकामधेनु, ४२८ पृष्ठ)

(४) आरोटं रसराजं क्षेत्रीकरणार्थमुपयोज्यम् ।

(रसकामधेनु ४२९ पृष्ठ)

(५) क्षेत्रीकरणाय नरैः प्रयुज्यते भूय आरोटः ।

(रसकामधेनु ४३० पृष्ठ)

आरोट पारद—स्वेदन, मर्दन, तथा सात बार ऊर्ध्व-पातन से शुद्ध हुए पारद की आरोट सञ्ज्ञा है ।

(१) आरोट शब्दस्तु शुद्धपर्यायवाचकः ।

(आयुर्वेदप्रकाश २४२ पृष्ठ)

(२) तदनु च पातनशुद्धं सूतकमारोटकमश्नीयात् ।

....

स्वेदनमर्दनशुद्धं सूतं वाराँस्तु पातयेत्सप्त ।
इत्यारोटः सूतः क्षेत्रीकरणे प्रयुज्यते प्रथमम्॥

(रसकामधेनु ४२८ पृष्ठ)

(ज्वरादिषु पञ्चकर्मादिनिषेधः)

नवज्वरेऽतिसारे च गर्भिण्यां बालवृद्धयोः ।
न कुर्यात्पंचकर्माणि रक्तस्रावं च दाहनम् ॥५०२॥

प्र०—ज्वरप्रभृतिरोगेषु पञ्चकर्मादिनिषेधमाह — नवेति स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५०२ ॥

ज्वर आदि रोगों में पञ्चकर्म प्रभृति का निषेध ।

उ०—नवीन ज्वर तथा अतिसार रोग में और गर्भिणी स्त्री, बालक तथा वृद्ध (बूढ़े) पुरुष को, पञ्चकर्म, रक्तस्राव और अग्निदाह कर्म नहीं करना चाहिये ॥ ५०२ ॥

(पञ्चकर्माणि)

पाचनं स्नेहनं स्वेदो वमनं रेचनं तथा ।
एतानि पंचकर्माणि ज्ञातव्यानि भिषग्वरैः ॥५०३॥

प्र०—पञ्चकर्माण्याह—पाचनमिति—स्पष्टम् । अत्रानुष्टप्-छन्दः ॥ ५०३ ॥

पञ्चकर्म ।

उ०—वैद्यों को, (१) पाचन (२) स्नेहन (३) स्वेद (स्वेदन) (४) वमन (५) रेचन (विरेचन) यह पञ्चकर्म जानने चाहिये ॥ ५०३ ॥

ज्ञातव्य- रससिद्धों ने, शरीर के सामान्य शोधन को ध्यान में रखकर, यह पञ्चकर्म बताये हैं, इसलिये यहाँ पर शरीर के विशेष शोधन के लिये प्रयुक्त, चरकसंहिता में वर्णित नस्य, निरूहण और अनुवासन का ग्रहण नहीं किया है ।

बम्बई की आयुर्वेदग्रन्थमाला में प्रकाशित मूल आयुर्वेद प्रकाश में, इस श्लोक के आगे ' अमृतं च विषं प्रोक्तं-इत्यादि

श्लोक मुद्रित है जो अप्रासङ्गिक है, इसलिये हमने उस श्लोक को यहां न लिखकर, प्रसङ्ग के अनुसार आगे ५७२ वें श्लोक के पश्चात् मुद्रित किया है।

(विरेचनान्तेऽपि पारदरसायनसेवनम्)

पञ्चकर्मभयत्रस्तैः सुकुमारनरैरिह ।
रेचनान्ते इदं सेव्यं सर्वदोषापनुत्तये ॥५०४ ॥

प्र०—असंजातपञ्चकर्मणि विरेचनान्तेऽपि पारदरसायन सेवनं निर्दिशन्नाह–पञ्चेति । स्पष्टम् । अत्रानुष्टप्छन्दः ॥५०४॥

उ०—पञ्चकर्म करने से डरने वाले कोमल पुरुषों को, केवल विरेचन द्वारा ही शरीर का शोधन करने के पश्चात्, सब दोषों को नष्ट करने के लिये, यह पारद रसायन सेवन करनी चाहिये ॥ ५०४ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १८५) से उद्धृत किया है, रसमञ्जरी में भी यह श्लोक मिलता है।

(क्षेत्रीकरणप्रक्रिया)

अथान्यच्च—

स्निग्धं स्विन्नं विरिक्तं १च नीरुजं सिद्धभेषजैः ।

---

१ 'यन्नीरुजं'।

एतत्क्षेत्रं समासेन रसबीजार्पणक्षमम् ।। ५०५ ।।

स्निग्धं प्रातस्त्रिदिनं घृतसैन्धवपानेन, स्विन्नं वस्त्रादिपुटवह्निना, विरिक्तम् १इच्छाभेदिनाराचादिसेवनेन, २वान्तं वचादिरसेन, पलाशबीज ३जन्तुघ्नगुडमोदकभक्षणेन४ कीटपातनमपि कर्त्तव्यं, ५सिद्धभेषजै र्नीरुजं संवत्सरमयनं वा परिशीलितैः शृङ्गाराभ्रकलक्ष्मीविलासाद्यभ्रसत्वप्रधानप्रयोगैरिति भावः ।।५०६।।

प्र०—क्षेत्रीकरण प्रक्रियामाह—स्निग्धमिति—स्निग्धं, स्विन्नं विरिक्तं = वान्तं विरिक्तञ्च, अत्र विरिक्तपदेन वान्तं विरिक्तं च द्वयमपि ग्राह्यं, विरचनेन वमन विरेचनयोरुभयोरपि ग्रहणात् । तद्यथा चरके—“ उभयं वा शरीरमलविरेचनाद्विरेचनमिति सञ्ज्ञां लभते ” । सिद्धभेषजैः = शृङ्गारादिभि नीरुजं = नीरोगं स्वस्थमित्यर्थः, पञ्चकर्मविशुद्धमिदं शरीरं समासेन = संक्षेपेण रसबीजार्पणक्षमं = पारदरसायनसेवनयोग्यं ज्ञेयमितिशेषः । अत्रानुष्टप्छन्दः ।। ५०५ ।।

क्षेत्रीकरणप्रक्रियामेव विस्तरेण निरुपयति—स्निग्धमिति—स्पष्टम् जन्तुघ्नः = विडङ्गः, संवत्सरं, एकवर्षम्, अयनम् = उत्तरायणदक्षिणायनरूपः षण्मासमितः समयः ।। ५०६ ।।

---

१ ‘ इच्छाभेदिना ’ इति च पाठान्तरं रसेन्द्रचिन्तामणौ ।

२ रसेन्द्रचिन्तामणित उद्धृतोऽयं प्राकरणिकः पाठः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु नैष मुद्रितः ।

३ ‘ विडङ्ग ’ । ४ ‘भक्षणात्’ इति च पाठान्तरं रसेन्द्रचिन्तामणौ । ५ अयं पाठो रसेन्द्रचिन्तामणौ नास्ति ।

क्षेत्रीकरण प्रक्रिया (रसायन सेवन करने योग्य शरीर बनाने की क्रिया)

उ०—स्निग्ध, स्विन्न, वान्त, विरिक्त और शृङ्गाराभ्रक-लक्ष्मी विलास आदि सिद्ध औषधियों से नीरोग हुये, इस शरीर को, संक्षेप में पारद रसायन सेवन करने के योग्य जानना चाहिये ॥ ५०५ ॥

इसी क्षेत्रीकरण प्रक्रिया को अब विस्तार पूर्वक बतलाते हैं—

मनुष्य सबसे पहिले, शीघ्र स्निग्ध होने के लिये तीन दिन तक प्रातःकाल घृत में सैन्धव नमक डालकर अपने मृदु मध्यक्रूर कोष्ठ के अनुसार उचित मात्रा में पीवे, इस प्रकार स्नेहपान करने से वह शीघ्र ही स्निग्ध हो जाता है, फिर वस्त्र तथा बालुका स्वेद आदि की उष्णता (गर्मी) द्वारा किये गये स्वेदन से स्विन्न होकर, इच्छाभेदी अथवा नाराचरस के प्रयोग द्वारा विरेचन होने पर, ढाक के बीज, वायविडङ्ग तथा गुड़ मिलाकर बनाये हुये मोदकों (लड्डुओं) को खाकर उदर (पेट) के कृमियों को बाहर निकाल देना चाहिये। फिर जिन प्रयोगों में अभ्रकसत्व की प्रधानता है, ऐसे शृंगाराभ्रक तथा लक्ष्मीविलास आदि सिद्धप्रयोगों को, एक वर्ष अथवा छै मास सेवन कर शरीर को स्वस्थ करे ॥ ५०६ ॥

ज्ञातव्य—माधव ने यह क्षेत्रीकरण प्रक्रिया, रसेन्द्र-चिन्तामणि (अ० ३ । १८२-१८३) से उद्धृत की है।

पाठक, इस क्षेत्रीकरणप्रक्रिया में ५०६ वें सूत्र में आये हुये इच्छाभेदीरस, नाराचरस, शृंगाराभ्रक तथा लक्ष्मी विलास रस के प्रयोग, रसेन्द्रचिन्तामणि अथवा रसेन्द्रसार-संग्रह आदि रसग्रन्थों में देख लें।

(अभ्रकेण क्षेत्रीकरणम्)

उक्तञ्च—

मृताभ्रं भक्षयेन्मासमेकमादौ विचक्षणः ।
पश्चात्तं योजयेद्देहे क्षेत्रीकरणमिच्छतः ॥५०७॥

प्र०—अभ्रकप्रयोगेण क्षेत्रीकरणमाह—मृतेति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५०७ ॥

अभ्रक के प्रयोग द्वारा क्षेत्रीकरण ।

उ०—क्षेत्रीकरण का इच्छुक, बुद्धिमान् पुरुष, पारद (पारा) भक्षण करने से पहिले एक मास तक अभ्रकभस्म को खावे, और फिर पारद का उपयोग करे ॥ ५०७ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। १८७) से उद्धृत किया है. रसमंजरी में भी यह श्लोक मिलता है, रसतरंगिणी का निम्नलिखित आधा श्लोक (७–८३), इस श्लोक के पूर्वार्द्ध का अनुवाद मात्र है—

मृताभ्रकमुख्ययोगाँश्च तदा संयोजयेद् भिषक् ।

अभ्रकभस्म आदि का सेवन एक मास के पश्चात् भी, छै मास अथवा एक वर्ष तक करना चाहिये, तभी रसायन का गुण प्राप्त हो सकता है, ऐसा पहिले ५०६ वें सूत्र (संवत्सर-मयनं वा परिशीलितैः) में भी निर्देश किया जा चुका है।

(रसायनसेवनात्प्राक् शाल्योदनादीनां सेवनम्)

इतिशुद्धो जातबलः शाल्यौदनजाङ्गलादि *मुद्गरसैः।
क्षेत्रीकृतनिजदेहः कुर्वीत रसायनं मतिमान् ॥५०८॥

प्र०—रसायनसेवनात्प्राक् शाल्योदनादीनां सेवनमाह—इतीति—स्पष्टम्। अत्रार्यावृत्तम् ॥ ५०८ ॥

रसायन सेवन करने से पहिले चावलों के भात आदि का सेवन।

उ०-इस प्रकार विरेचन आदि के शोधन द्वारा शरीर का क्षेत्रीकरण कर लेने वाला बुद्धिमान पुरुष, साठी चावलों का भात तथा हरिण आदि जंगली पशुओं का मांसरस-(शोरवा) खाकर, बलवान होने पर, रसायनरूप पारद का सेवन करे ॥ ५०८ ॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३१ १८६) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक,

---

* 'यावकाख्यमांसमुद्गैश्च' इति पाठान्तरं रसकाम-धेनावुद्धृते श्लोके।

'रसहृदय' ग्रन्थ का है, रसकामधेनु (५२७-५२८ पृष्ठ) में भी रसहृदय से ही उद्धृत किया गया है, इस श्लोक का उत्तरार्ध, पहिले ४९७ वें श्लोक में आ चुका है। रसतरंगिणी (७। ७१) का निम्नलिखित श्लोक, इसी श्लोक का अनुवाद मात्र है--

क्षेत्रीकृतनिजकायः कामं शाल्योदनादिपथ्याशी।
लब्धबलो रसभोक्ता विदधीत रसायनं प्राज्ञः॥

(क्षेत्रीकरणानन्तरं घनसत्वादिजीर्ण पारदप्रयोगः)

घनसत्वपादजीर्णोऽर्द्धकान्तजीर्णश्च १तीक्ष्णजीर्णश्च।
क्षेत्रीकरणाय रसः प्रयुज्यते भूय २आरोटः॥ ५०९॥

प्र०-क्षेत्रीकरणानन्तरमभ्रकसत्वादिजीर्णपारदस्य प्रयोगमाह—घनेति—स्पष्टम्। क्षेत्रीकरणाय = क्षेत्रीकरणमस्यास्तीति तादृशाय पुरुषाय, क्षेत्रीकृतशरीरायेति भावः। अत्रार्यावृत्तम्॥५०९

क्षेत्रीकरण करने के पश्चात् अभ्रसत्वादिजीर्ण पारद का प्रयोग।

उ०—जिस पुरुष ने शरीर का क्षेत्रीकरण कर लिया है, उसके लिये फिर चौथाई ($\frac{1}{4}$ भाग) अभ्रकसत्व जीर्ण किया

---

१ 'तीक्ष्णसमजीर्णः' इति पाठान्तरं रसेन्द्रचिन्तामणौ रसकामधेनावुद्धृते श्लोके च।

२ 'आरोग्याय' इत्यशुद्धः पाठो रसेन्द्रचिन्तामणौ।

हुआ, आधा (१/२) भाग कान्तलोहभस्म जीर्ण किया हुआ, तथा समानभाग तीक्ष्ण (फ़ौलाद, स्टील) 'लौहभस्मजीर्ण किये हुये आरोट (संकृत) पारद का प्रयोग करना चाहिये ॥ ५०६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३।१६१) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, रसहृदय ग्रन्थ का है, रसकामधेनु (५३० पृष्ठ) में भी रसहृदय से ही उद्धृत किया गया है।

(विधिवत्पारदसेवनेन सिद्धीनां प्राप्तिः)

योऽग्निसहत्वं प्राप्तः १संजातो हेमतारकर्त्ता च।
२बद्धो ३रसश्च भुक्तो विधिना सिद्धिप्रदो भवति ॥५१०

प्र०—विधिवत्पारदसेवनेन सिद्धीनां प्राप्तिमाह—य इति। स्पष्टम्। अत्रार्या वृत्तम् ॥ ५१० ॥

विधिपूर्वक पारद सेवन करने से सिद्धियों की प्राप्ति।

उ०—जो पारद (पारा) अग्निस्थायी होचुका है तथा स्वर्ण आदि बनाने में समर्थ है, ऐसे बद्ध पारद का विधिपूर्वक सेवन करने से सिद्धियों की प्राप्ति होती है ॥ ५१० ॥

---

१ 'संयतते' इति पाठान्तरं रसकामधेनौ।
२ 'शुद्धो' इति पाठो रसेन्द्रचिन्तामणौ।
३ 'रसः स' इति च पाठान्तरं रसकामधेनौ।

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३।१६२) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक रसहृदय ग्रन्थ का है, रसकामधेनु (पृष्ठ ५३१) में भी, रसहृदय से ही उद्धृत किया गयाहै।

(अथ रसभक्षणकालः)

प्रभाते भक्षयेत्सूतं पथ्यं यामद्वयाधिके ।
*नोल्लङ्घयेत्त्रियामं तु मध्याह्ने चैव भोजयेत् ॥५११॥

प्र०—रसभक्षणकालमाह—प्रभात इति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५११ ॥

पारद भक्षण करने का समय ।

उ०—प्रातःकाल पारदका भक्षण करे, और फिर दोपहर (६ घण्टे) के भीतर (आगे ५३८-५३६ तथा ५४२-५४३ श्लोकों में बताये गये) पथ्य का सेवन करे, तीन पहर कभी भी न बीतने दे और मध्याह्न (दोपहर) के समय भोजन करे ॥ ५११ ॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २०५) से उद्धृत किया है ।

---

* 'न' इति पाठान्तरं रसेन्द्रचिन्तामणौ ।

(मलबन्धहरः प्रयोगः)

ताम्बूलान्तर्गते सूते विड्बन्धो नैव जायते ।
सकणाममृतां भुक्त्वा मलबन्धे स्वपेन्निशि ॥५१२॥

प्र०—मलबन्धहरं प्रयोगमाह—ताम्बूलेति-स्पष्टम् । अमृता =हरीतकी । अत्रानुष्टप्छन्दः ॥ ५१२ ॥

मलबन्ध हर प्रयोग ।

उ०--संस्कृतपारद को, पान के भीतर रखकर खाने से, मलबन्ध (विबन्ध) नहीं होता है, यदि पारद के भक्षण के विकार से विबन्ध हो, तो रात्रि को छोटी पीपल और हरड़ का चूर्ण खाकर सो जाये ॥ ५१२ ।

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। २०६) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, 'रसार्णव' ग्रन्थ का है, रसकामधेनु (पृष्ठ ५४१) में भी इस श्लोक का उत्तरार्ध, रसार्णव से ही उद्धृत किया गया है ।

(अथ रसमात्राप्रमितिः)

वल्लमेकं नरेऽश्वे तु *गद्याणैकं गजे द्वयम् ।
सर्वरोगविनाशार्थं भिषक् सूतं प्रयोजयेत् ॥५१३॥

---

* 'गद्याणं च' इति पाठान्तरं रससंकेतकलिकायाम् ।

प्र० – रसमात्राप्रमाणमाह—वल्लमिति—स्पष्टम् । अत्रा-नुष्टप्छन्दः ॥ ५१३ ॥

पारद की मात्रा का परिमाण।

वैद्य, मनुष्यों को तीन रत्ती, घोड़ों को छत्तीस रत्ती, (आज कल की तोल से साढ़े चार माशा) और हाथियों को बहत्तर रत्ती (नौ माशा) की मात्रा में संस्कृत पारद को, सब रोगों को नष्ट करने के लिये दे ॥ १३ ॥

ज्ञातव्य—माधव ने इस श्लोक का पूर्वार्ध, रससंकेत-कलिका (उल्लास १ । ४८) से उद्धृत किया है। इस श्लोक में बताई मात्रा, आजकल अधिक है, आधुनिक समय में इस मात्रा का छठे ($\frac{1}{6}$) भाग से तिहाई ($\frac{1}{3}$) भाग तक देना चाहिये।

(घनसत्वादिजीर्णरसस्य मात्रा)

मतान्तरम्—

घनसत्वकान्त *काञ्चीशङ्करतीक्ष्णाभ्रादिजीर्णस्य ।
रसस्य गुञ्जा वृद्ध्या माषकमात्रं परा मात्रा ॥५१४॥

प्र०—घनसत्वादि जीर्णरसस्य मात्रामाह—घनेति–स्पष्टम् । अत्रार्यावृत्तम् ॥ ५१४ ॥

---

* 'ताम्रसङ्करतीक्ष्णादिजीर्णस्य' इति रसेन्द्रचिन्तामणौ, 'काञ्चीभास्करतीक्ष्णाभ्रजीर्णस्य' इति तु रसकामधेनावुद्धृते श्लोके पाठान्तरम्।

अभ्रकसत्वादिजीर्णपारद की मात्रा।

उ०--अभ्रकसत्व कान्तलौह, ताम्र तीक्ष्णलोह आदि जीर्ण किये हुये पारद की मात्रा, एक रत्ती के क्रम से बढ़ाकर, अधिक से अधिक एक माशा (आज कल की छै रत्ती) तक जाननी चाहिये॥ ५१४॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। १६३) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, 'रसहृदय' ग्रन्थ का है, रसकामधेनु (५३४ पृष्ठ) में भी, रसहृदय से उद्धृत किया गया है।

(हेमादिजीर्णपारदस्य मात्रा)

शिवः—

गुञ्जामात्रं रसं देवि ! हेमजीर्णं तु भक्षयेत्।
द्विगुणं तारजीर्णस्य रविजीर्णस्य च त्रयम् ॥५१५॥

प्र०— शिवमतेन हेमादिजीर्णपारदस्य मात्रामाह--स्पष्टम्। अत्रानुष्टप्छन्दः॥ ५१५॥

स्वर्णादिजीर्णपारद की मात्रा।

उ०—शिवजी का मत-हे पार्वती देवि ? स्वर्णजीर्णपारद को एक रत्ती, चाँदी जीर्ण किये हुये पारद को दो रत्ती, और ताम्र (ताँबा) जीर्ण किये हुये पारद को तीन रत्ती की मात्रा में भक्षण करे॥ ५१५॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १६४) से उद्धृत किया है, परन्तु वास्तव में यह, रसार्णव ग्रन्थ का है, रसकामधेनु (पृष्ठ ५३३) में भी, यह रसार्णव से ही उद्धृत किया गया है ।

(तीक्ष्णजीर्णपारदस्य भक्षणफलम्)

फलम्—

तीक्ष्णजीर्णस्य लक्षायुः पलमात्रस्य भक्षणात् ।
एवं दशपलं भुक्त्वा तीक्ष्णजीर्णस्य मानवः ॥५१६॥
तदा जीवेन्महाकल्पं प्रलयान्ते शिवं व्रजेत् ॥

प्र०—तीक्ष्णजीर्णपारदस्य भक्षणफलमाह—तीक्ष्णेति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५१६ ॥

तीक्ष्णलोहजीर्णपारद के भक्षण का फल ।

उ०—मनुष्य, तीक्ष्ण (फ़ौलाद) जीर्ण हुये पारद (पारा) को, मात्रापूर्वक एक पल (४ तोला) तक भक्षण कर लेने से, एक लाख वर्ष की आयु प्राप्त कर सकता है, यदि इसी प्रकार दस पल (४० तोला) तक भक्षण करले, तो महाकल्पपर्यन्त जीवित रह सकता है और प्रलय के अन्त में परमेश्वर में विलीन हो जाता है ॥ ५१६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १६७) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक,

'रसार्णव' ग्रन्थ का है, रसकामधेनु (५३४ ५३५ पृष्ठ) में भी, 'रसार्णव' से ही उद्‌धृत किया गया है।

(ताम्रजीर्णपारदस्यभक्षणफलम्)

भस्मनः शुल्वजीर्णस्य लक्षायुः पलभक्षणात् ॥५१७॥
कोट्यायुर्ब्राह्ममायुष्यं वैष्णवं रुद्रजीवितम्।
द्वित्रिचतुः पञ्चषष्ठे महाकल्पायुरीश्वरः ॥ ५१८॥

प्र०—ताम्रजीर्णपारदस्य भक्षणफलमाह—भस्मन इति-स्पष्टम्। अत्रानुष्टप्छन्दः ॥ ५१७-५१८॥

ताम्रजीर्णपारद के भक्षण का फल।

उ०—मनुष्य, ताम्र जीर्ण किये हुये पारद का, मात्रा पूर्वक एक पल (४ तोला) तक भक्षण कर लेने पर, एक लाख वर्ष, दो पल भक्षण करने पर एक करोड़ वर्ष, तीन पल भक्षण कर लेने पर ब्रह्मा की आयु के समान, चार पल भक्षण कर लेने पर विष्णु की आयु के समान, पाँच पल भक्षण कर लेने पर, महादेव की आयु के समान और छै पल भक्षण कर लेने पर, परमेश्वर के समान महाकल्प की आयु प्राप्त कर सकता है ॥ ५१७-५१८॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। १६८) से उद्‌धृत किया है, परन्तु वास्तव में यह श्लोक, 'रसार्णव' ग्रन्थ का है, रसकामधेनु (पृष्ठ ५३४) में भी, रसार्णव से ही उद्‌धृत किया गया है।

अथ हेमजीर्णपारदस्यफलम् ।

भस्मनो हेमजीर्णस्य लक्षायुः पलभक्षणात् ।
विष्णुरुद्रशिवत्वं च द्वित्रिचतुर्भिराप्नुयात् ॥५१९॥

प्र०—हेमजीर्णपारदस्य भक्षणफलमाह—भस्मन इति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५१६ ॥

स्वर्णजीर्णपारद के भक्षण का फल ।

उ०—मनुष्य, स्वर्णजीर्ण किये हुये पारद का, मात्रा पूर्वक एक पल (४ तोला) भक्षण कर लेने पर एक लाख वर्ष की आयु और दो, तीन तथा चार पल भक्षण कर लेने पर क्रम से विष्णुरुद्र आदि के समान आयु प्राप्त कर सकता है ॥ ५१६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । १६६) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, 'रसार्णव' ग्रन्थ का है, रसकामधेनु (पृष्ठ ५३४) में भी, 'रसार्णव' से ही उद्धृत किया गया है ।

अस्यानुपानम्—

वह्वे बलाबलं ज्ञात्वा हेमजीर्णस्य रक्तिकाम् ।
घृतेन मधुना चाद्यात्ताम्बूलं कामिनीं व्रजेत् ॥५२०॥

प्र०— हेमजीर्णपारदस्यानुपानमाह—वह्नेरिति — स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५२० ॥

स्वर्णजीर्णपारद का अनुपान ।

उ०—मनुष्य, जठराग्नि के बलाबल को समझकर, स्वर्णजीर्ण पारद को, एक रत्ती की मात्रा में, विषमरूप में मिश्रित घृत और शहद के साथ खावे और फिर पान खाकर स्त्री के साथ रमण करे ॥ ५२० ॥

(पूर्णसंस्कृतपारदभक्षणेन कामान्धता)

१एको दोषो हि सूक्ष्मोऽस्ति भक्षिते भस्मसूतके ।
त्रिसप्ताहाद्वरारोहे कामान्धो जायते नरः ॥ ५२१ ॥
नारीसङ्गाद्विना २देवि ह्यजीर्णं तस्य जायते ।
मैथुनाच्चलिते शुक्रे ३जायते प्राणसंशयः ॥ ५२२ ॥

प्र०—पूर्णसंस्कृतपारदभक्षणजन्यकामान्धतां निर्दिशन्नाह—एक इति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५२१-५२२ ॥

पूर्णसंस्कृतपारद के भक्षण से उत्पन्न हुई कामान्धता ।

उ०—हे पार्वती देवि ? संस्कृत पारद के भक्षण करने में, एक सूक्ष्म दोष यह है कि इसके इक्कीस दिन सेवन करने

---

१ ‘एको हि दोषः सूक्ष्मोऽयं’ । २ ‘देहे’ ।
३ ‘त्रिसप्ताहात्वधिक्रमात्’ इति च पाठान्तरं रसकामधेनावुद्धृते श्लोके ।

से मनुष्य कामान्ध हो जाता है। संस्कृत पारद सेवन करने वाले पुरुष को, मैथुन न करने पर अजीर्ण हो जाता है और मैथुन द्वारा वीर्य के चलायमान होने पर, प्राणों के जाने का संशय उत्पन्न हो जाता है ॥ ५२१-५२२ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २८१-२८२) से उद्धृत किये हैं, परन्तु वास्तव में यह श्लोक, 'रसार्णव' ग्रन्थ के हैं, रसकामधेनु (५४३ पृष्ठ) में भी, रसार्णव से ही उद्धृत किये गये हैं।

तस्मादजीर्णशमनोपायमाह—

युवत्या जल्पनं कार्यं तावत्तन्मैथुनं त्यजेत् ।
लघुतां शेफसो ज्ञात्वा पश्चाद्गच्छन् सुखी भवेत् ५२३

प्र०—पारदजन्याजीर्णशमनोपायमाह-युवत्येति-स्पष्टम् । अत्रानुष्टुप्छन्दः ॥ ५२३ ॥

पारद से उत्पन्न अजीर्ण की शान्ति का उपाय ।

उ०—पारद से उत्पन्न हुये अजीर्ण को शान्त करने के लिये, स्त्री के साथ बातचीत करे, परन्तु पारद सेवन करने तक मैथुन न करे, लिङ्ग की लघुता जान कर, व्यवहार करने पर सुखी होता है ॥ ५२३ ॥

ज्ञातव्य—माधव ने इस श्लोक का पूर्वार्द्ध, रसेन्द्रचिन्तामणि (अ० ३ । २०३) से उद्धृत किया है।

(योगिनः पारदसेवनानियमः)

ब्रह्मचर्येण वा योगी सदा सेवते सूतकम् ।
समाधिकरणं तस्य क्रामणं परमं मतम् ॥ ५२४॥

प्र०-योगिनः पारदसेवननियममाह—ब्रह्मेति-स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५२४ ॥

योगी पुरुष के लिये पारदसेवन का नियम ।

उ०—योगीपुरुष सदैव ब्रह्मचर्य का पालन करता हुआ पारद का सेवन करे। समाधि लगाने से ही, उस योगी के शरीर में पारद का भली भांति प्रसारण होता है ॥ ५२४ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २०४) से उद्धृत किया है।

अथ रससेवनकर्तुराहारादिनियममाह—

(पारदभक्षणेऽपथ्यम्)

[1]अत्यशनातिपाने च ह्यतिनिद्रादिजागरे[2] ।

१- अतिपानं चात्यशनं ' इति पाठान्तरं रसेन्द्रचिन्तामणौ रसकामधेनौ च ।

२-' प्रजागरम् ' इति रसेन्द्र चिन्तामणौ ' अतिजागरम् ' इति तु रसकामधेनौ पाठान्तरम् ।

स्त्रीणामतिप्रसङ्गं १चाप्यध्वानं च विवर्जयेत् ॥५२५॥
अतिकोपं २महाहर्षमतिदुःखमतिस्पृहाम् ।
शुष्कवादं जलक्रीडामतिचिन्तां ३च वर्जयेत् ॥५२६॥

(ककाराष्टकम्)

४कूष्मांडं कर्कटीं चैव ५कारवेल्लं कलिङ्गकम् ।
६कुसुम्भिकां च कर्कोटीं कदलीं काकमाचिकाम् ॥५२७॥
ककाराष्टकमेतद्धि वर्जयेद्रसभक्षकः ।

(अन्ये वर्ज्यपदार्थाः)

पातकं च न कर्त्तव्यं पशुसङ्गं च वर्जयेत् ॥५२८॥
७लिङ्गच्छायां न लंघेत नारीच्छायां न लङ्घयेत् ।

१–रसेन्द्रचिन्तामणिसम्मतोऽयं पाठः स्वीकृतोऽस्माभिः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'च ह्याध्मानं' इति पाठो मुद्रितः ।

२-'चातिहर्षं नातिदुःखं' इति रसेन्द्रचिन्तामणौ, 'चातिहर्षमतिलौल्यम्' इति तु रसकामधेनौ ।

३–'विवर्जयेत्' इति रसकामधेनौ ।

४–'कूष्माण्डकं कर्कटीञ्च' इति रसेन्द्रचिन्तामणौ ।

५–'कलिङ्गं' इति रसेन्द्रचिन्तामणौ 'कालिङ्गं' इति तु रसकामधेनौ ।

६–'कुसुम्भकं' इति रसकामधेनौ पाठान्तरम् ।

७–'अधिकोऽयं पाठो रसकामधेनौ ।

चतुष्पथे न १गन्तव्यं विण्मूत्रं न च लङ्घयेत् ॥५२९॥
२वराणां निन्दनं देवि ! स्त्रीणां निन्दां च वर्जयेत् ।
सत्येन वचनं ब्रूयादप्रियं न वदेद्वचः ॥ ५३० ॥
३कुलत्थानतसीतैलं तिलान्माषान्मूसरिकान् ।
४कपोतान् कांजिकं चैव तक्रभक्तं५ च वर्जयेत् ॥५३१॥
हेमचन्द्रादयः प्राहुः कुक्कुटानपि वर्जयेत् ।
६लवणाम्ले कटुं तिक्तं पित्तलं च विवर्जयेत् ॥५३२॥
तिलतैलं दधिक्षीरं द्राक्षां च पनसं तथा ।
बदरं नारिकेलञ्च सहकारं सुवर्चलम् ॥ ५३३ ॥
७नारङ्गं काञ्चनारं च शोभाञ्जनमपि त्यजेत् ।
न वादजल्पनं कुर्याद्दिवा ८चापि न पर्यटेत् ॥५३४॥

१-'कर्त्तव्यं' इति रसकामधेनौ ।
२-'धीराणां' इति रसेन्द्रचिन्तामणौ ।
३-'कुलित्थाँश्चातसी'।
४-'कपोतकं काञ्जिकान्नं'।
५-'तथैव च' इति च रसकामधेनौ ।
६-'कट्वम्लं तीक्ष्णलवणं पिच्छिलं पित्तलं च यत्' इति रसकामधेनौ 'कट्वम्लतिक्तलवणं पित्तलं वातलं च यत्' इति तु रसेन्द्रचिन्तामणौ ।
७-'नागरङ्गं कामरङ्गं' इति रसेन्द्रचिन्तामणौ ।
८-'च शयनं तथा' इति रसकामधेनौ पाठान्तरम् ।

नाग्निं स्पृशेच्च पादेन न गाश्च ब्राह्मणीं न च।
नैवेद्यं नैव भुञ्जीत कर्पूरं वर्जयेत्सदा ॥ ५३५ ॥
कुंकुमालेपनं वर्ज्यं न स्वपेत्कुशलः क्षितौ।
न १तु हन्यात्कुमारीं च २वातलानि च ३वर्जयेत्५३६
क्षुधार्त्तो नैव तिष्ठेत ह्यजीर्णं नैव कारयेत्।
दिवारात्रं जपेन्मन्त्रं नासत्यवचनं वदेत् ॥५३७॥

प्र०-रससेवनकर्तुराहारादिनियमनिर्देशप्रसङ्गे ऽपथ्यमाह अतीति-स्पष्टम्। अत्रानुष्टप्छन्दः ॥ ५२५-५२७ ॥

उ०—पारद सेवन करने वाले के लिये आहार आदि का नियम—

पारद भक्षण करने में अपथ्य।

पारद सेवन करने वाला पुरुष, अधिक खाना, पीना अत्यन्त सोना और जागना स्त्रियों से बातचीत अधिक करना, अत्यन्त मार्ग चलना, बहुत क्रोध, हर्ष, दुख, स्पृहा, व्यर्थ का बादविवाद, जल क्रीड़ा तथा अधिक चिन्ता करना छोड़ दे। ॥ ५२५-५२६ ॥

ककाराष्टक।

पारद (पारा) खाने वाला पुरुष, (१) कूष्माण्ड

१-'च'। २-'मातुलानी' इति रसेन्द्रचिन्तामणौ।
३-'अति वर्जयेत्' इति च रसकामधेनौ, पाठान्तरम्।

(कुहड़ा, पेठा), (२) ककड़ी, (३) करेला, (४) तरबूज़ा, (५) कसूम, (६) ककोड़ा, (७) केला, (८) मकोय, इन पदार्थों का भक्षण करना छोड़ दे ॥ ५२७ ॥

त्याग करने योग्य अन्य पदार्थ।

हे पार्वती देवि ! पारद सेवन करने वाला पुरुष, पाप कर्म तथा पशुओं के साथ मैथुन न करे, लिङ्गछाया तथा स्त्रियों की छाया को न लांघे, चौराहे पर न जाय, मल (विष्ठा) तथा मूत्र को न लांघे, उत्तम धीर पुरुषों और स्त्रियों की निन्दा करना छोड़ दे, सत्य वचन बोले, अप्रिय वचन न बोले, कुलथी, अलसी का तैल, तिल, उड़द, मसूर, कबूतर का मांस, कांजी, तथा मठा और भात का खाना छोड़ दे, हेमचन्द्र आदि का मत है कि मुर्ग़ (कुक्कुट) का मांसरस तथा अण्डा खाना भी छोड़ दे, तथा नमक, खटाई, चरपरे, कड़वे, पित्तकारक पदार्थ, तिलका तैल, दही, दूध, दाख (मुनक्का), कटहल, बेर, नारियल, कचनार और संहजना का खाना छोड़ दे, व्यर्थ में वादविवाद न करे, दिन में भी व्यर्थ भ्रमण न करे, अग्नि, गाय और ब्राह्मणी को पैर से न स्पर्श करे (छूवे), नैवेद्य न खावे, कपूर तथा केसर का लेप न करे, पृथ्वी पर शयन न करे कन्याओं को न मारे, वायुकारक पदार्थ खाना छोड़ दे, भूखा न रहे, अजीर्ण न होने दे, दिनरात मृत्युञ्जय मन्त्र का जप करे और असत्य वचन न बोले ॥ ५२६-५३७ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० २०७-२१७) से उद्धृत किये हैं, परन्तु वास्तव में यह श्लोक 'रसार्णव' ग्रन्थ के हैं, रसकामधेनु (५३६-५४१ पृष्ठ) में भी; रसार्णव से उद्धृत किये गये हैं।

(पारदभक्षणे पथ्यम्)

हितं १दुग्धान्नमुद्गाज्यशाल्यन्नादि सदा भजेत्२ ।
शाकं पौनर्नवं देवि ! मेघनादं ३सवास्तुकम् ५३८॥
सैन्धवं नागरं मुस्तां पञ्चमूलानि भक्षयेत् ।
आत्मज्ञानं कथा पूजा शिवस्य च विशेषतः ।
एतांस्तु ४समयान् भद्रे ! न लङ्घयेद्रसभक्षणे ॥६३९॥

प्र०-पारदभक्षणे पथ्यमाह—हितमिति-स्पष्टम् । अत्रानुष्टुप्छन्दः ॥ ५३८-५३९ ॥

पारद भक्षण करने में पथ्य ।

उ०—हे पार्वती देवि ? पारद का भक्षण करने वाला पुरुष, हितकारक दूध, अन्न (गेंहू आदि), मूंग की दाल, घृत, साठी चावल आदि, पुनर्नवा (बिसखपरा) चौलाई और वथुआ को शाक, सैन्धवनमक, नागरमोथा तथा भसीड़े का सदैव सेवन करे, आत्मज्ञान और अधिकतर परमेश्वर की कथा और पूजा करना न छोड़े ॥ ५३८-५३९ ॥

१-‘ मुद्गान्नदुग्धाज्यशाल्यन्नानि ’ इति रसेन्द्रचिन्तामणौ ‘ मुद्गान्नदुग्धाज्यं शाल्यन्नानि ’ इति तु रसकामधेनौ ।

२-‘ यतः’ इति रसेन्द्रचिन्तामणौ, ‘ततः’ इति तु रसकामधेनौ । ३—‘ च वास्तुकम् ’ इति रसकामधेनौ ।

४-‘ समयात् ’ इति रसेन्द्रचिन्तामणौ पाठान्तरम् ।

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २१८-२१६) से उद्धृत किये हैं, परन्तु वास्तव में, यह श्लोक, 'रसार्णव' ग्रन्थ के हैं, रसकामधेनु (५३६ पृष्ठ) में भी, रसार्णव से उद्धृत किये गये हैं ।

(पारदभक्षणविधिः)

अथ रसवाग्भटे—

१अथातुरो रसाचार्यं साक्षाद्देवं महेश्वरम् ।
साधितं २पारदं शृङ्गदन्तवेणवादिधारितम् ॥५४०॥
अर्चयित्वा यथाशक्ति देवगोब्राह्मणानपि ।
पर्णखण्डे धृतं सूतं जग्ध्वा ३तदनुपातः ॥५४१॥

प्र०—रसरत्नसमुच्चयोक्तं पारदभक्षण-विधिमाह-अथेति-स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५४०-५४१ ॥

रसवाग्भट के मत से पारदभक्षण करने की विधि ।

उ०—रोगी पुरुष, रसशास्त्र के प्रारम्भिक आचार्य साक्षात् महादेव और गौ ब्राह्मण आदि की यथाशक्ति पूजा

१—अयं श्लोकार्धो मुम्बय्यांमुद्रितायुर्वेदप्रकाशे नास्ति ।

२—'च रसं' । ३-'स्यादनुपानतः' इति च पाठान्तरं रस-रत्नसमुच्चये ।

करके, बैल आदि के सींग, हाथीदांत तथा बांस की नली (और शीशी आदि) में रखे हुये संस्कृत पारद तथा उसके प्रयोगों को, पान के टुकड़े में रखकर, उचित अनुपान के साथ खावे ॥ ५४०–५४१ ॥

ज्ञातव्य—माधव ने यह श्लोक, वाग्भट (रसवाग्भट) रचित रसरत्नसमुच्चय (अ० ११ । १२२–१२३) से उद्धृत किये हैं।

(पारदभस्मभक्षणे पथ्यवर्गः)

घृतसैन्धवधान्याकजीरकार्द्रकसंयुतम्१ ।
तण्डुलीयकधान्याक २ पटोलालाबुकादिकम् ॥५४२॥
३कुस्तुम्बरी मरीचानि सैन्धवं समभागिकम् ।
व्यञ्जनार्थं कृतं दद्याद्रससेवकभोजने ॥ ५४३ ॥
गोधूमजीर्णशाल्यन्नं गव्यं क्षीरं घृतं दधि ।
हंसोदकं ४मुद्गयूषः पथ्यवर्गः समासतः ॥५४४॥

प्र०—पारदभस्मभक्षणे पथ्यवर्गमाह–घृतेति । अत्रानुष्टप्छन्दः ॥ ५४२—५४४ ॥

१—' संस्कृतम् ' ।

२—' पटोलालम्बुषादिकम् ' इति च पाठान्तरं रसरत्नसमुच्चये ।

३—अयं श्लोको मुद्रितरसरत्नसमुच्चये नास्ति ।

४—' मुद्गरसः ' इति पाठान्तरं रसरत्नसमुच्चये ।

पारदभस्म के भक्षण करने में पथ्यवर्ग ।

उ०—पारदभस्मका भक्षण करने वाले पुरुष के लिये भोजन में घृत, सैन्धव (सैन्धा) नमक, धनिया, जीरा और अदरक सहित चौलाई, धनिया, परवल तथा तुम्बी का शाक पथ्य हैं, इनमें से धनिया काली मरिच और सैन्धव नमक समान भाग ले । तथा गेंहू पुराना साठी आदि चावल, गाय का दूध, घृत और दही, हंसोदक (शरद ऋतु में दिन में सूर्य की किरणों से गर्म और रात्रि को चन्द्रमा की किरणों से ठण्डा हुआ जल) तथा मूंग की दाल का यूष संक्षेप रूप से यह पथ्यवर्ग है ॥ ५४२-५४४ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । १२४-१२५) से उद्धृत किये हैं । रसतरङ्गिणी (तरङ्ग ७ । ६०-६२) में निर्दिष्ट 'रससेवन में पथ्य' के श्लोक, इन श्लोकों के ही अनुवादमात्र हैं ।

(पारदभस्मभक्षणे कुपथ्यम्)

बृहतीबिल्वकूष्माण्डं वेत्राग्रं कारवेल्लकम् ।
१माषान्मसूरान्निष्पावान् कुलत्थान् सर्षपाँस्तिलान् ॥
॥५४५॥
२बन्धनोद्वर्तनस्नानताम्रचूडसुरासवान् ।

१–'माषं मसूरं निष्पावं कुलित्थं सर्षपं तिलम्' ।
२—'लङ्घनोद्वर्तन' इति च पाठान्तरं रसरत्नसमुच्चये ।

आनूपमांसंधान्याम्लं भोजनं कदलीदले ॥
कांस्ये च गुरुविष्टम्भि तीक्ष्णोष्णं च भृशं त्यजेत् ॥
॥ ५४६ ॥

प्र०—पारदभस्मभक्षणे कुपथ्यमाह—वृहतीति—स्पष्टम् । अत्रानुष्टुप्छन्दः ॥ ५४५-५४६ ॥

पारदभस्म के भक्षण करने में कुपथ्य ।

उ०—पारदभस्म (रससिन्दूर) के भक्षण करने के समय, कटेहरी, बेल, कुह्मड़ा (पेठा) बेंत का आगे का भाग, करेला, उड़द, मूँग, लोबिया, कुलथी, सरसों तथा तिलका भक्षण न करे । बन्धन, उबटन और स्नान न करे, मुर्ग़ (कुक्कुट) का मांस, शराब, आसव, आनूप (जलमय) स्थान के जन्तुओं का मांस और कांजी का भक्षण न करे, केले के पत्ते तथा कांसे के बर्तन में भारी तथा विष्टब्धता (क़ब्ज़ी) करने वाला और अत्यन्त तीक्ष्ण तथा गर्म भोजन खाना छोड़ दे ॥ ५४५-५४६ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । १२६-१२७) से उद्धृत किये हैं ।

(विचित्ररसयुक्तभोजनम्)

निषिद्धवर्जं मतिमान् विचित्ररसभोजनं कुर्यात् ।
स्रवति न यथा रसेन्द्रो न च नश्यति जाठरो वह्निः॥
॥५४७॥

* रसेन्द्रचिन्तामणिसम्मतोऽयं साधीयान् पाठःस्वीकृतोऽस्माभिः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'वर्जयित्वा निषिद्धं तु विचित्ररसभुग्भवेत्' इत्येवमशुद्धच्छन्दोमयः पाठः समुपलभ्यते ।

प्र०—विचित्ररसयुक्तभोजनं निर्दिशन्नाह वर्जयित्वेति—स्पष्टम् । अत्रगीतिवृत्तम् ॥ ५४७ ॥

विचित्ररसयुक्त भोजन ।

उ०—पारदभस्म का भक्षण करने वाला पुरुष, पहिले बताये हुये निषिद्ध पदार्थों का सेवन करना छोड़कर, अनेक प्रकार के विचित्र रसों युक्त भोजन का भक्षण इस भांति करे, कि जिससे पारद का शरीर से स्राव न हो तथा जठराग्नि भी नष्ट न होने पावे ॥ ५४७ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २२५) से उद्धृत किया है ।

अथाज्ञानादशोधितपारदभक्षणे-तद्विषशमनोपायमाह—

*यद्यज्ञानात्कथमपि नागादिकलङ्कितो रसो भुक्तः ।
तत्स्रावणाय +विज्ञः पिबेच्छिफां कारवेल्लभवाम् ॥५४८

प्र०—अशोधितपारदभक्षणजन्यविषशमनोपायमाह—यदिति—स्पष्टम । अत्रार्यावृत्तम् ॥ ५४८ ॥

---

* 'कथमपि यद्यज्ञानात्' इति रसेन्द्रचिन्तामणौ रसकामधेनौ च पाठान्तरम् ।

+ पिबेद्गोजल 'कटुकारवेल्लशिफाः' इति च रसकामधेनौ पाठान्तरम् ।

नागादियुक्त अशुद्धपारद के भक्षण करने से-उत्पन्न विष की शान्ति का उपाय।

उ०—यदि किसी प्रकार अज्ञानता से पृष्ठ २३-२४ में वर्णित नाग बङ्ग आदि स्वाभाविक दोषों से युक्त, अशुद्ध पारद का भक्षण, किसी ने कर लिया हो, तो बुद्धिमान् वैद्य, उस अशुद्ध पारद को शरीर से बाहर निकालने के लिये, करेला की जड़ को गोमूत्र में पीसकर पीवे ॥ ५४८ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। २२४) से उद्धृत किया है, परन्तु वास्तव में यह श्लोक, 'रसहृदय' ग्रन्थ का है, रसकामधेनु (५४२-५४३ पृष्ठ) में भी, रसहृदय से ही उद्धृत किया गया है।

अन्य रसशास्त्रों में अशुद्ध पारद के भक्षण से उत्पन्न नागदोष को शान्त करने के लिये, करेला के साथ पाठा का प्रयोग भी किया गया है। यथा—

पिवेन्मूलं कारवेल्ली पाठायुक्तभवं वरम्।
नागदोषः शमं याति पारदस्य न संशयः॥

(रसकामधेनु ५४३ पृष्ठ)

(अथ रसाजीर्णे शमनोपायमाह)

१रसाजीर्णे महाव्याधीन् लक्षयेद्भिषगुत्तमः।
अभ्यङ्गमनिलक्षोभे तैलैर्नारायणादिभिः॥ ५४९ ॥

१—'अयं श्लोकार्धो मुद्रितरसरत्नसमुच्चये नास्ति।

अरतौ शीततोयेन मस्तके परिषेचनम् ।
तृष्णायां नारिकेलाम्बु मुद्गयूषं सशर्करम् ।
उद्गारे सति दध्यन्नं २कृष्णजीरं ससैन्धवम् ॥५५०॥

प्र०—रसाजीर्णे तज्जान् महाव्याधीन् निर्दिशन् तच्छमनोपायमाह—रसेति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५४६-५५० ॥

पारद के अजीर्ण से उत्पन्न महाव्यधियाँ—और उनकी शान्ति का उपाय ।

उ०—पारद के अजीर्ण से उत्पन्न हुई महाव्याधियाँ—उत्तम वैद्य, पथ्य आदि का पालन न करने पर, पारद के अजीर्ण से उत्पन्न हुई मूर्च्छा, सूजन तथा शूल आदि महाव्याधियों की परीक्षा करे।

पारद के अजीर्ण से उत्पन्न हुईं महाव्याधियों की चिकित्सा--वायु का प्रकोप होने पर, नारायण तैल आदि को शरीर पर मालिश करावे, मस्तक आदि में पीड़ा होने पर, मस्तक पर ठण्डा जल डलवावे, प्यास बढ़ने पर खांड सहित नारियल का जल और मूंग की का यूष दे तथा अधिक डकारें आने पर, कालाजीरा और सैन्धवनमक मिलाकर दही भात खिलावे ॥ ५४६--५५० ॥

ज्ञातव्य—माधव ने यह श्लोक, रसरत्नसमुच्चय (अ० ११ । १३२-१३३) से उद्धृत किये हैं।

२—'कृष्णमीनं' इति पाठान्तरं रसरत्नसमुच्चये ।

पारद के अजीर्ण से उत्पन्न हुई महाव्याधियाँ।

पारद के अजीर्ण से, मूर्च्छा, सूजन, भ्रम (घुमेर, मस्तक में चक्कर आना), काँपना, वमन, मोह, ज्वर, हिचकी, (दमा, स्वाँस), जंभाई, कान, मुख, आँख, कोख, अण्डकोश, उदर (पेट) तथा शिर में थोड़ी थोड़ी दाह (जलन) होना, विबन्ध (क़ब्ज़ी) तथा सम्पूर्ण अङ्गों का क्षय होना और अन्य कई महाव्याधियाँ उत्पन्न हो जाती हैं। यथा—

(१) रसराजे त्वजीर्णे तु प्रत्ययोऽयं भवेत्प्रिये ?।
मूर्च्छाशोफौ भ्रमः कम्पश्छर्दिर्मोहो ज्वरस्तथा ॥
हिक्कावेपथुशूलानि निद्राऽऽलस्यमरोचकः।
जिह्वास्तम्भो ह्यतीसारः कासश्वासविजृम्भिकाः ॥
कर्णस्य चक्षुः कुक्षौ च वृषणोदरमूर्धनि।
मन्ददाहो विबन्धश्च जातः सर्वाङ्गसंक्षयः।
अन्याँश्चैव महाव्याधीन् रसाजीर्णे तु लक्षयेत् ॥
(रसकामधेनु ५४१ पृष्ठ)

(२) नाभिभूते भवेच्छूलं निद्राऽऽलस्यं ज्वरो ऽरुचिः।
जाड्यं मलग्रहो दाहो रसाजीर्णे भवेन्नृणाम् ॥

(रसाजीर्णे भेषजम्)

(प्रथमः प्रयोगः)

१चविका स्वर्जिकाक्षारं कारवेल्लीरसप्लुतम्।

१—'रसकामधेनुसम्मतोऽयं साधीयान् पाठः स्वीकृतोऽस्माभिः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे रसेन्द्रचिन्तामणौ तु 'कार्षिकं' इति पाठः, परन्तु नैषः समीचीनः प्रतिभाति स्वर्जिकाक्षारस्य कर्षप्रमाणेऽप्रयोगात्।

२गोमूत्रं सैन्धवयुतं ३तस्य संस्रावणं परम् ॥५५१॥
तस्य = रसाजीर्णस्य ।

प्र०—रसाजीर्णे प्रथमं प्रयोगमाह—चविकेति—त्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५५१ ॥

उ०—पारद से उत्पन्न हुये अजीर्ण की चिकित्सा—

प्रथम प्रयोग ।

पारद के अजीर्ण को दूर करने के लिये, चव्य और सज्जीखार को, चार गुने करेले के रस के साथ मिलाकर पीवे अथवा सैन्धवनमक सहित गोमूत्र को पीवे ॥ ५५१ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २२१) से उद्धृत किया है, रसकामधेनु (५४२ पृष्ठ) में भी, यह श्लोक मिलता है। रसकामधेनु (पृष्ठ ५४१, श्लोक २५०) के एक प्रयोग में कांजी का प्रयोग मिलता है। यथा—

'काञ्जिकं स्वर्जिका क्षारं कारवेल्लीरसप्लुतम्'

२—रसेन्द्रचिन्तामणिरसकामधेनुसम्मतोऽयं पाठः, मुम्बय्यां मुद्रितायुर्वेदप्रकाशे तु 'गोमूत्रसैन्धवयुतं' इति पाठः समुपलभ्यते ।

३—'रससंस्रावणं' इति पाठान्तरं रसकामधेनौ ।

(द्वितीयः प्रयोगः)

१कर्कोटीसिन्धुगोमूत्रं कारवेल्लीरसप्लुतम्।
२ सौवर्चलसमायुक्तं रसाजीर्णे पिबेन्नरः॥ ५५२॥

—रसाजीर्णे द्वितीयं प्रयोगमाह-कर्कोटीति-स्पष्टम्। अत्रानुष्टप्छन्दः ५२॥

द्वितीय प्रयोग।

मनुष्य पारद से उत्पन्न हुये अजीर्ण में, सैन्धवनमक और कालानमक को, चारगुने ककोड़ा तथा करेला के रस और गोमूत्र में मिलाकर पीवे॥ ५५२॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३। २२२) से उद्धृत किया है, रसकामधेनु (पृष्ठ ५४१, श्लोक २५०) में, यह श्लोक कुछ पाठान्तर से मिलता है।

(तृतीयः प्रयोगः)

शरपुङ्खां सुरदालीं पटोलबीजं च काकमाचीं च।
*एतेषामेकतमं क्वथितमजीर्णे रसायने तु पिबेत्॥५५३॥

१—'सिन्धुकर्कोटि'।

२ 'सौवर्चलसमोपेतं रसाजीर्णी पिबेद् बुधः' इति च पाठान्तरं रसेन्द्रचिन्तामणौ।

* 'एकतमान्तु क्वथितामविजीर्णरसायने' इति पाठान्तरं रसेन्द्रचिन्तामणौ।

रसाजीर्णे तृतीयं प्रयोगमाह-स्पष्टम् । अत्र गीतिवृत्तम् ॥५५३

तृतीय प्रयोग ।

उ०—पारद के अजीर्ण में सरफोंका, देवदाली, परवल के बीज और मकोय, इनमें से किसी एक के क्वाथ को पीवे ॥ ५५३ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ३ । २२१) से उद्धृत किया है । इन औषधियों में से अकेले सरफोंका (शरपुङ्खा) का प्रयोग, बङ्गदोष की शान्ति के लिये भी होता है—

बङ्गदोषप्रशान्त्यर्थं शरपुङ्खां च भक्षयेत् ।

(रसकामधेनु ५४३ पृष्ठ)

(सदैव हितकराः पदार्थाः)

हारीतं प्रत्यन्त्रियः—

धान्यादीनां च सर्वेषां यवगोधूमषष्टिकाः ।
नेष्टास्तु विदलाः सर्वे मुक्त्वा मुद्गांस्तथाऽऽढकीम् ॥५५४

आज्यं स्नेहे मधुषु मधुरं चेक्षुजातं हि यत्स्यात्,
श्रेष्ठं खण्डं बत वरसितं क्षारयुक्तं न तत्स्यात् ।
हिङ्गु श्रेष्ठं सकलसुरभौ सैन्धवं सिन्धुजेषु,
रागे यूषाः प्रवररजनीसूरणार्द्राश्च कन्दे ॥५५५॥

प्र०—सदैव हितकरपदार्थवर्णनप्रसङ्गे हारीतं प्रत्युक्त मात्रेयवचनं निर्दिशति--धान्येति—स्पष्टम् । अत्र प्रथमे श्लोके-ऽनुष्टप् द्वितीये च मन्दाक्रान्तावृत्तमस्ति ॥ ५५४—५५५ ॥

सदैव हितकर पदार्थ ।

महर्षि आत्रेय ने, हारीत मुनि को निम्नलिखित सदैव हितकर पदार्थ बतलाये हैं—

सब प्रकार के धान्यों में जौ, गेंहू और साठी चावल सदैव हितकर हैं, परन्तु मूँग तथा अरहर की दाल को छोड़ कर शेष दालें हितकर नहीं हैं। सब प्रकार के स्नेहों (घृत, तैल, वसा, मज्जा) में घृत, सब मधुर पदार्थों में ईख के रस से बने हुये मधुर पदार्थ और उनमें भी मिश्री सर्वोत्तम हितकर है क्यों कि उसमें क्षार का अंश (खारीपना) बिलकुल नहीं होता है, सम्पूर्ण सुगन्धित पदार्थों में हींग तथा सब नमकों में सैन्धकनमक हितकर है, राग (रागषाडव, अनार तथा अंगूर के रस से युक्त मूंग का यूष) सञ्ज्ञक यूष में साधारण यूष तथा कन्दों में हल्दी, जिमीकन्द और अदरक हितकर हैं ॥ ५५४-५५५ ॥

ज्ञातव्य—रसकामधेनु (पृष्ठ ५४१) में उद्धृत हुये 'रसहृदय' ग्रन्थ के श्लोक में भी, इसीप्रकार रसायनसेवन करने में हितकर पदार्थों का वर्णन मिलता है--

मुद्गाढकी विवर्ज्यं सर्वे विदला रसायने नेष्टाः ।

(दोषकारकपदार्थाः)

अशुभं पत्रशाकं तु सर्वाणि द्विदलानि
संस्कृतानि विधानेन न स्युर्दोषकराणि च॥ ५५६ ॥

प्र०—दोषकरपदार्थानाह—अशुभमिति—स्पष्टम्। अत्रानुष्टप्छन्दः ॥ ५५६ ॥

दोषकारक पदार्थ।

उ०—पत्तों के शाक (सरसों आदि के पत्तों के शाक) दोषकारक होने से अशुभ है और जिनका विधि पूर्वक संस्कार नहीं हुआ हो, वे सब दालें दोषकारक हैं ॥ ५५६ ॥

(पारदसेविनां त्याज्यमन्नम्)

केशादिजुष्टं कृतशीतमुष्णं,
शाकावरान्नैर्बहुलं महोष्णम्।
निशोषितं यल्लवणाधिकं च,
संत्याज्यमन्नं रससेविभिस्तत् ॥५५७॥

तक्रं हितं स्नेहगतं तथा दधि,
गोक्षीरजातं सकलं हितं स्यात्।
मुक्त्वा च तैलाम्बुसुरारनालं,
स्यादम्बुपानं न हितं रसायने ॥ ५५८ ॥

तैलं च चित्रागिरिजाभवं यत्,
सुस्वादहीनं शटितामदग्धम् ।
विनष्टदुग्धं त्वशुभं च सर्वं,
खादेत्कदाचिन्न रसायनी नरः ॥५५९॥

प्र०—पारदसेविनां त्याज्यमन्नमाह—केशादीति—स्पष्टम् । अत्र ५५७ संख्यके श्लोके उपजातिवृत्तम्, ५५८ संख्यके श्लोको इन्द्रवज्रावृत्तम्, ५५९ संख्यके श्लोके चोपजातिवृत्तमस्ति ।

॥ ५५७-५५९ ॥

पारदरसायन सेवनकरने वालो के लिये त्याग देने योग्य अन्न ।

उ०—पारदरसायन सेवन करने वाले पुरुषों को बाल (तथा तिनका) आदि से युक्त, ठंडा किया गया गर्म, अधिकतर शाक तथा खराब अन्न से युक्त बहुत गर्म, रात्रि भर रखा हुआ (बासा भोजन) तथा अधिक नमकीन भोजन त्याग देना चाहिये, घृत रहित छाछ (मठा) और दही तथा गाय की छाछ, दही आदि सब हितकर हैं, तैल, मद्य, और कांजी को छोड़ कर जल पीना हितकर नहीं है । इन्द्रायण अथवा जमालगोटा तथा अलसी का तैल और स्वादरहित, कचूर आदि से पकाया हुआ तैल तथा फटा हुआ दूध, यह सब दोषकारक होने से कभी नहीं खाने चाहिये ॥ ५५७-५५९ ॥

(रसायने श्रेष्ठमाहारजातम्)

पुष्पजातं फलं सर्वं मधुरं मांसशर्करम् ।
पाकयुक्तमशीर्णं च श्रेष्ठमुक्तं रसायने ॥ ५६० ॥
असितायाः सवत्सायाः प्राहुर्दुग्धं जलैः शृतम् ।
बलवृद्धिकरं वृष्यं श्रेष्ठमुक्तं रसायने ॥ ५६१ ॥

प्र०—रसायने श्रेष्ठमाहारजातमाह—पुष्पेति—स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५६०-५६१ ॥

पारद रसायन सेवन करने में श्रेष्ठ आहार ।

उ०—पारदरसायन सेवनकरने में, फूल वाले, पके हुये, जो फटे न हों, ऐसे मधुर फल, माँस तथा खांड श्रेष्ठ कहे गये हैं । जल डाल कर पकाया गया, बछड़े वाली काली गाय का दूध, बल बढ़ानेवाला तथा वीर्य वर्द्धक है ॥ ५५०—५५१ ॥

(पारदसेविनां पेयम्)

गव्यं सुदुग्धं सलिलार्धकेन,
संपाच्य तत्क्षीणजलं सुशीतम् ।
खण्डेन वा शर्करया समेतं,
रसेन्द्रभोक्ता प्रपिबेत्सदैव ॥ ५६२ ॥

दिव्यान्तरिक्षं धुनिजं च कौपं,
स्वयं विशीर्णाद्रिशिलातलोद्भवम्।
तडागजं सारसमौद्भिदं यत्
तोयं मतं त्वष्टविधं मनोरमम् ॥५६३॥

अक्षारं स्वादु मृष्टं दिनमणिकिरणैर्वासरे तप्तमादौ,
रात्रौ शीतांशुरोचिस्त्रिविधिसुपवनान्दोलितं दोषहीनम्।
कर्पूरैः राजचम्पैरतिशयविमलैः पाटलैर्लासुपुष्पै,
स्त्वग्धान्यैर्वासितं यद्वरशिशिरजलं सूतसेवी पिबेद्धि ॥
॥ ५६४ ॥

प्र०—पारदसेविनां पेयमाह—गव्यमिति—स्पष्टम्। अत्र ५६२-५६३ संख्यकश्लोकेकेषूपजातिवृत्तम्, ५६४ श्लोके च स्रग्धरा वृत्तम् ॥ ५६२-५६४ ॥

पारदसेवन करने वालों के लिये पेय पदार्थ।

उ०—पारद सेवन करने वाला पुरुष, गाय के दूध में आधा पानी मिलाकर अग्नि पर गर्म करे और पानी जल जाने पर उस दूध को खांड अथवा बूरा मिलाकर पीवे। जल आकाश जल, नदी, कूआ, स्वयं टूटी हुई पत्थर की शिलाओं से उत्पन्न हुआ जल, तडाग, सरोवर, तथा झरने का जल, इस आठ प्रकार के सुन्दर जल को पीवे। क्षार रहित (जो खारी न हो), मधुर, शुद्ध, दिन में सूर्य की किरणों से गर्म

हुआ, रात्रि में चन्द्रमा की किरणों से तथा शीतल, मन्द, सुगन्धित तीनप्रकार के वायु से, दोषरहित, अत्यन्त शुद्ध, कपूर और चम्पा, पाटला तथा इलायची के फूल, दालचीनी और धनिया से सुगन्धित हुआ जल पीवे ॥ ५६२-५६४ ॥

(पारदसेविनां विहार)

मर्दनम्—

श्रीनारायणसञ्ज्ञकेन च बलातैलेन चान्येन वा,
कार्यं मर्दनकोविदै रसभुजां मल्लैः सदा मर्दनम् ॥

उद्वर्त्तनम्—

चातुर्जातलवङ्गकुङ्कमनिशामुस्तासुमांसीभवै-
श्चूर्णैर्भृष्टमसूरमुद्गयवजैरुद्वर्त्तनं कारयेत् ॥ ५६५ ॥

स्नानम्—

सौख्योष्णैः सलिलैर्द्रुतं रसभुजां स्नानं सुजीर्णेऽशने,
वातं पित्तकफौ निहन्ति बलकृत्त्वग्वर्णकृद्बृंहणम् ।
रूपद्योतिकरं मनः प्रशमनं कामस्य संवर्धनं,
नारीणां च मनोहरं श्रमहरं देहे रसक्रामणम् ॥ ५६६ ॥

प्र०—पारदसेविनां विहारमाह—श्रीनारायणेति—स्पष्टम् । रसभुजां = पारदसेविनाम् । अत्र शार्दूलविक्रीडितं वृत्तम् । ॥ ५६५—५६६ ॥

पारदसेवन करने वालों के लिये विहार।

उ०—मर्दन–पारद (पारा) रसायन सेवन करने वाला पुरुष, मर्दन करने में चतुर मनुष्यों से नारायण तैल, बला तैल अथवा अन्य किसी (प्रसारिणी तैल आदि) तैल से शरीर की मालिश करा के मर्दन करावे।

उद्वर्तन (उबटन) फिर दालचीनी, इलायची, तेजपत्र, नागकेशर, लौंग, केसर, हल्दी, नागरमोथा भुँजे हुये मसूर, मूंग और जौ के चूर्ण को पानी तथा तैल के साथ मिलाकर उबटन करावे।

स्नान—पारद सेवन करने वाला पुरुष, पहिले दिन का भोजन पच जाने पर, गर्म जल से स्नान करे, यह वायु, पित्त तथा कफ को नष्ट करता है और बलकारक, त्वचा (चमड़ा) के रङ्ग (वर्ण) को सुन्दर तथा कोमल बनाने वाला, पुष्टिकारक, कान्तिवर्द्धक, चित्त की खिन्नता को दूर करने वाला, कामशक्तिवर्द्धक, स्त्रियों के लिये मनोहर, थकावट दूर करने वाला और शरीर में पारद को फैलाने वाला है। ॥ ५६५-५६६ ॥

(मृतपारदादिपरीक्षा)

श्लोकद्वयं तत्र प्रागध्येतव्यं मृतपरीक्षार्थं, यथा—

कचकचिति न दन्ताग्रे कुर्वन्ति समानि केतकीरजसा।
*योग्यानि हि प्रयोगे रसोपरसलोहचूर्णानि ॥ ५६७ ॥

---

* 'योज्यानि' इति पाठान्तरं रसेन्द्रचिन्तामणौ।

वल्मीककूपतरुतलरथ्यादेवालयश्मशानेषु ।
जाता विधिनाऽपि हृता औषध्यः सिद्धिदा न स्युः ॥५६८॥

प्र०—मृतपारदादिपरीक्षां निर्दिशन्नाह—श्लोकेति—स्पष्टम् । परीक्षामाह—कचेत्ति—स्पष्टम् । रथ्या = प्रतोली । अत्र प्रथम श्लोके मृतपारदादिपरीक्षावर्णनं, द्वितीयश्लोके च पारदमर्दनादिकर्मणि प्रयुज्यमानौषधीनामसिद्धिहेतुवर्णनं चास्ति । अत्रार्यावृत्तम् ॥ ५६७–५६८ ॥

मृतपारद आदि की परीक्षा का निर्देश ।

उ०—मृतपारद आदि की परीक्षा के लिये, पहिले यह दो श्लोक पढ़ने चाहिये—

परीक्षा—जो मृतपारद (पारा) आदि रस, अभ्रकभस्म आदि उपरस, स्वर्ण, बङ्ग, लोह आदि धातुभस्म, खाने पर दांतों के आगे के भाग में लगने पर, 'करच', 'करच' यह शब्द न करें और केतकी के पुष्प के पराग के समान हों, उनका ही प्रयोगों में व्यवहार करना चाहिये ॥ ५६७ ॥

औषधियों की असिद्धि का कारण—साँप की बांबी, कूआ, वृक्ष के नीचे, पगडंडी (छोटा मार्ग), मन्दिर और श्मशान (मरघट) में उत्पन्न हुई, विधिपूर्वक खोदकर लाई गई भी औषधियाँ लाभ (सिद्धि) कर नहीं होती हैं ॥५६८॥

ज्ञातव्य—माधव ने यह दोनों श्लोक, रसेन्द्रचिन्तामणि (अ० ८ । ५-६) से उद्धृत किये हैं, इनमें से प्रथमश्लोक में मृतपारद आदि की परीक्षा और द्वितीयश्लोक में औषधियों की असिद्धि का कारण बताया गया है ।

(अन्तर्धूमगन्धकजारणाय शाम्भवीमुद्रानिर्देशः)

*अथ सर्वप्रयोगयोग्यतया रसेन्द्रमारणाय शाम्भवीं मुद्रामभिदध्मः ॥ ५६९ ॥

प्र०—अन्तर्धूमगन्धकजारणाय शाम्भवीं महामुद्रां निर्दिशन्नाह—अथेति—अथ = अन्तर्धूमगन्धकजारणादौ, सर्वप्रयोगयोग्यतया = सर्वेषु प्रयोगेषु योग्यतया = साधनस्वरूपया, रसेन्द्रमारणाय = रसेन्द्रे = पारदे गन्धकजारणाय, अत्र मारणशब्दो जारणवाची ज्ञेयः ५७२–५७३ संख्यकेषु वक्ष्यमाणश्लोकेषु गन्धकजारितपारदगुणनिर्देशात् । शाम्भवीं = शम्भुना प्रोक्तां, शिवेन वर्णितां मुद्रामभिदध्मः = व्याचक्ष्महे ॥ ५६९ ॥

अन्तर्धूमगन्धक जारण करने के लिये शाम्भवीमुद्रा ।

उ०—अन्तर्धूम पाकविधि से गन्धकजारण करने के लिये, सब प्रयोगों में साधनस्वरूप 'शाम्भवी मुद्रा' का वर्णन करेंगे ॥ ५६९ ॥

ज्ञातव्य—माधव ने यह सूत्र, रसेन्द्रचिन्तामणि (अ० ८ । ७) से उद्धृत किया है ।

(शाम्भवीमुद्रानिर्माणविधिः)

अधस्ताप उपर्यापो मध्ये गन्धकपारदौ ।
यदि स्यात्सुदृढा मुद्रा मन्दभाग्योऽपि सिद्ध्यति ॥५७०॥

---

* 'अथ' इति पाठो नास्ति रसेन्द्रचिन्तामणौ ।

यदि कार्यमयो यन्त्रं *दिह्यात्तं मृत्स्नया तदा ॥५७१॥

प्र०—शाम्भवीमुद्रानिर्माणविधिमाह—अध इति–मध्ये = यन्त्रस्य मध्ये, गन्धकपारदौ निधाय. अधः = यन्त्रस्य तले, अधोभागे, तापः = अग्निः, उपरि च, आपः = जलानि, यदि सुदृढा मुद्रा स्यात्तदा मन्दभाग्योऽपि = हीनभाग्योऽपि वैद्यः. सिद्ध्यति = सिद्धिं प्राप्नोति, गन्धकजारणे कर्मणि साफल्यं लभते, इति भावः। यदि गन्धकजारणार्थमयो यन्त्रं कार्यं = कर्त्तव्यं भवेत्तदा लौह–सारेण यन्त्रं निर्माय सन्धौ मृत्स्नया = तोयमृदा, दिह्यात् = लेपं कुर्यात् ।

अयंभावः—लौहघटे लौहकटाहे वा संस्कृत पारदगन्धकौ निक्षिप्य, लौहघटोपर्यावर्तयुक्तमन्यलौहघटस्य मुखं, लौहकटाहोपरि तु तवकं निधाय तोयमृदा सन्धिरोधं विधाय, मदनमुद्रया वा गाढमालिप्य, जलेन पूरयित्वा, अधस्तले चाग्निं प्रज्वाल्य गन्धकं जारणं कुर्यात् ॥ ५७०—५७१ ॥

शाम्भवीमुद्रा की निर्माण विधि ।

उ०—यन्त्र के बीच में संस्कृतपारद और गन्धक रखकर यन्त्र के नीचे अग्नि जलावे और यन्त्र के ऊपर जल भरकर, यदि दृढ (मज़बूत) मुद्रा लगादी जाय, तो भाग्यहीन वैद्य भी गन्धकजारण करने में सफलता प्राप्त कर सकता है, यदि गन्धकजारण करने के लिये, लोह का यन्त्र बनाना हो तो उत्तम तीक्ष्ण (फ़ौलाद) लोह से यन्त्र बनाकर, सन्धि बन्द कर जलमृत्स्ना (तोयमृत्स्ना) का लेप कर दें । इसका यह

* 'तदा तत्सार इष्यते' इति पाठान्तरं रसेन्द्रचिन्तामणौ ।

भाव है, कि लोहे के घड़े में संस्कृतपारद और गन्धक भरकर ऊपर से पेचदार मुखवाले दूसरे लोह के घड़े को रखदे, मुख के पेच की रेखाओं के कारण ऊपर के लोह के घड़े का मुख नीचे के घड़े में चला जायगा, फिर जलमृत्स्ना से सन्धि बन्दकर, मज़बूत मदनमुद्रा देकर, गन्धक का जारण करे, अथवा लोह की कढ़ाई में संस्कृतपारद और गन्धक रखकर, ऊपर लोह के तवे से ढक दे और मदनमुद्रा का गाढ़ा लेपकर, यन्त्र के ऊपर जल भरकर, यन्त्र के नीचे अग्नि जला कर गन्धक का जारण करे।

मदनमुद्रा—मोम एक प्रस्थ, चुम्बकलौह एक प्रस्थ, लौहचूर्ण एक प्रस्थ, गूलर का दूध एक प्रस्थ, इन सब को एकत्रित कर, तीन दिन तक कूट कर, एक गोला बनावे और उस गोले को, जल से भरे हुये घड़े में रखकर, घड़े को चूल्हे पर स्थापितकर तीव्र अग्नि से तब तक पकावे, जब तक कि वह गोला पानी में तैरता रहे, जब गोला पानी में डूब जाय, तब अग्नि को बुझादे और जल के शीतल होने पर, गोले को निकालकर उससे लेप करे ॥ ५७०-५७१ ॥

ज्ञातव्य--माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ८। ८-६) से उद्धृत किये हैं।

(अन्तर्धूमगन्धकजारितपारदगुणाः)

समे गन्धे तु रोगघ्नो द्विगुणे राजयक्ष्मजित्।
जीर्णे गुणत्रये गन्धे कामनीदर्पनाशनः ॥ ५७२ ॥

चतुर्गुणे तु तेजस्वी सर्वशास्त्रविशारदः ।
भवेत्पञ्चगुणे सिद्धः षड्गुणे मृत्युजिद्भवेत् ॥५७३॥
इत्याद्युक्तमेव ।

प्र०—अन्तर्धूमगन्धकजारितपारदगुणानाह—सम-इत्याद्युक्तमेव प्राक् १४४ पृष्ठे १२१-१२२ श्लोके, तत्रैवास्य व्याख्या द्रष्टव्या ।अत्रानुष्टप्छन्दः ॥ ५७२-५७३ ॥

अन्तर्धूमगन्धकजारितपारद के गुण ।

उ०—यह दोनों श्लोक, पहिले भी १४४ पृष्ठ पर (१२१--१२२ श्लोक) आ चुके हैं, वहीं १४६ वें पृष्ठ पर इसकी उद्योत व्याख्या देख लें ॥ ५७२--५७३ ॥

(विधिसंयुक्तस्य विषस्याप्यमृतसदृशरसायनत्वम्)

अमृतं च विषं प्रोक्तं शिवेन च रसायनम् ।
*अमृतं विधिसंयुक्तं विधिहीनं तु तद्विषम् ॥५७४॥

प्र०—विधिसंयुक्तस्य विषस्याप्यमृतसदृशरसायनत्वमाह-अमृतमिति-स्पष्टम् । अत्रानुष्टप्छन्दः ॥ ५७४ ॥

विधि युक्त विष की अमृत के समान रसायनता ।

उ०—शिवजी ने, विधि पूर्वक प्रयोग किये गये विष को भी, अमृत के समान रसायन कहा है और विधिरहित

* मुम्बय्यां मुद्रितायुर्वेदप्रकाशे श्लोकस्यायमुत्तरार्द्धो नैवास्ति ।

प्रयोग किये गये अमृत के समान औषधि को भी, विष के समान हानिकर बतलाया है, इसलिये संस्कृतपारद (पारा) को भी विधिपूर्वक प्रयोग करना चाहिये ॥ ५७४ ॥

ज्ञातव्य—माधव ने यह श्लोक, रसेन्द्रचिन्तामणि (अ० ८ । १४) से उद्धृत किया है । बम्बई की आयुर्वेद ग्रन्थमाला में मुद्रित 'आयुर्वेदप्रकाश' में यह श्लोक, पञ्चकर्म का वर्णन करने वाले ५०३ वें श्लोक के पश्चात् अप्रासङ्गिक रूप से मुद्रित है, इसलिये हमने रसेन्द्रचिन्तामणि के अनुसार 'प्रसङ्गानुसार' इस स्थान पर, इस श्लोक को मुद्रित किया है ।

अथ कतिचिद्रसायनप्रयोगाः—

(१ गन्धामृतो रसः)

भस्मसूतं द्विधा गन्धं शतं कन्याम्बुमर्दितम् ।
रुद्ध्वा लघुपुटे १पाच्यमुद्धृत्य मधुसर्पिषा ॥५७५॥
